नप्राधान्येनव्यज्यते अरवंडग ज्जा विषह्निराज्यूद्धा धानवंजनो पयोसोश्रयुञ्जननन्यतिम्पागेया गा
निप्राधान्येनव्यज्यते वस्तुनालंकृतेर्यथा निप्रातिप्ररधिया पक्ष्मन्नगो हष्टि महह्या: स्ववलेवयस्य
याले॰ रिष्ठिनियनानियत्रमावनत्रव्यतिकरमेस्य समनिषस्यवस्याः अत्रव्यतिकरमेमत्वस्याः
समन्निषिद्धेति न वस्तुनापरस्परविरुद्धा अपि निर्विषेन्मारादयोग्वस्याभवनीतिविरोधालंकारेण
व्यतिकरपदेन प्राधान्येन प्रकाश्यते अलंकारेण वस्तुना यथा वाणिजेनाविपुगणमेदावक इत्यप
एणहि अपणा॰ घणाभरवस्त्रस्पणाविस्त्रद्वजाएणाव्वलयमेहारो अत्रमनभरवघसेन विपुद्ध।
जातिमात्र हारोन वस्तुनीति हेत्वलंकारेणानवस्त्वकथमानपवहारोस्मीति वस्तुन वलती।
तिपरेन व्यज्यते अलंकारेणालंकारस्य यथा समोहसामलंगोधमिल्लोकलिअललिअणाअ
देहो॰ णाघरवंधाइवलेलहिं असरोसरअमेगरजा अत्रमहरनसंगारेधम्मिलः स्मरइतिवहूप
कारलंकारेन यथा केशपाशः स्कंधयोः पतितो यथा रतिविरमाव्यापितहेतुः कामुको।
मूर्हिमोति भावनात्स्कंधपादप्राधान्येन व्यज्यते अथ कविवद्धहतमोडोक्तिमात्रनिष्पन्नशरीरस्य
अर्थस्य ध्वनिभेदेषु पद प्राधान्येन वस्तुना वस्तुनो व्यक्तिर्यथा णावप्रतिमामिश्रकस्मस्य को ३९
नलिभणासम्हसमसुम कोसिरगाममगाणपडोसरआणावनहस्यजः अत्र यथोक्तिवनस्तुनान्य

स्त्रामपिप्रथममनरक्तस्त्वमभूत्त्वंननन्वनिवस्तुत्वावधुममममि अथकस्यपश्यस्यस्वयमागीयट्प्राधान्ये
नयोन्यते अत्रपुरीषरजनीवेश्यपमानेरपेक्षणाकथंपत्नत्वमितिचिन्त्यम् अत्रैववस्तुनालं
कारस्यपथा संहृत्यावणिग्वहुवनामसरस्मिंश्चकवालीमहीरागागराय हारोगणिवागिरिश्च स्यात्त्ववरमोन।
दाकेहरमिश्रम अत्रविधुवनसमरस्तिरूपकस्यांजनानामप्रयोजकनपागार्ध्यमन्वस्तमात्राणाहारके
दानेनरथ्येहोगमनारनाहिलक्षणानवाधयाभवरनसम्भवकथयकीर्हागतिव्यतिरेकालंकारःकेह
पदप्रकाश्यः अलंकारणावस्तुनायथापविमतिपरवारविवलसवयागणपुलाहूतम्हम स्व
येयस्तुणयत्स्त्राहाएताहीत्रिरस्रमिमहिकिमित्रत्रनरक्तजिरादिषीतिहत्वलेकारणासेकेननिकनने।
गच्छनकामकेहृष्टायोरिगच्छतिमनसापरचरदगहीत्यागच्छतीवस्तकितिपरप्राधान्येनवर्तनेयथा
वाविहलखलनंअंसहितिदिडिणघ्रेणानरलनरदिहिवीरयक्रस्यमिमेणाअग्रदयागरडोतिघाति
प्रविविन्नो अत्रनरीहलेलनागहनेकनमकेनमपामगृहप्रवेशममयेपस्त्रादागनेकामकेहृष्टापुनर्दीग
मनायवृद्धिएवंद्वारस्पर्शवाजननवाघटःस्फोरितरतिमयावगनेननममाघासेविधापमीहितस्यहृद्येवनगृह
नेपुस्तनिकेतमवंसमूर्च्छयपघ्राशेनिवस्तद्वारस्यशंसितेनापहृस्यागाप्कसमिमेणातिपरेनशास्ने अलंकारे
णालंकारस्यपथाजाहूमत्ररसेराग्रविहूम्नतारसाजस्यमाणामावुहाविणावाठवुपरवहृम्रहहहवेकहिहिय
समत्र्यस्यावपस्येननवहरयरशीजिकामलिंगाकारेणास्यानक्तिनावृहोपरवधूर्णमिलषमीतिनवावतिनेकेन

का॰प्र॰
श्री
40

ग्यकत्तेउपमात्रयालंकारः प्राधान्येनपरवहपदद्योत्यः प्रकाशते शब्दार्थोभयशक्तिमूलत्वपदप्रकाशोनभव।
ति नत्रवाक्यस्यैवप्राधान्यात्. एवंएवविशेषभेदाः प्रबंधेप्यर्थशक्तिमूलः अर्थशक्तिमूलः पदवाक्ययोः प्रबंधेच
प्रबंधश्चसंचरितेननानावाक्यसमुदायः सचग्रंथरूपस्तस्यानरूपकरणानुपपत्तेः अत्रपदवाक्ययोरुदाहृतेऽपि प्र
बंधेयथागृध्रगोमायुसंवादादौ अलंस्थित्वाश्मशानेस्मिन्गृध्रगोमायुसंकुले कंकालबहुलेघोरेसर्वप्रा
णिभयंकरे नचेहजीवितःकश्चित्कालधर्ममुपागतः प्रियोवायदिवाद्वेष्यःप्राणिनांगतिरीदृशी इति
दिवाप्रागल्भ्यवतोगृध्रस्यस्तावत्कपुरुषसर्जनपरंवाक्यमेतत् कश्चादिमोऽयंस्थितोमरुताःस्त्रेहकृतस्मा ये
प्रतम् वहूविघ्नोमहूर्त्तनायंजीवेदपिकदाचनन्यमकनकवर्णाभंवालमप्राप्तयौवनं गृध्रवाक्यात्कथमहो
जध्वमविशंकिताः इतिनिशादिनाञ्जुकवाक्यसमुदायप्रबंधस्तत्रत्वेष्टसाधनत्वध्वनिस्तनिशिप्रगल्भ
स्यगोमायोस्तत्प्रागवर्जनपरमेवंश्लोकद्वयमितिप्रबंधएवव्यंजकत्वेनप्रथते अत्रस्वतःसंभविनावस्तुना
गमननिवर्जनरूपवस्तुव्यक्तिः एवमन्येप्येकादशप्रभेदाद्रष्टव्याः पदैकदेशरचनावर्णेष्वपिरसादयः र
सादयोलक्ष्यक्रमाः पदैकदेशरचनायावर्णेष्वपिशब्दात्प्रबंधेपदवाक्ययोश्चपदप्रभवउत्पत्तेवप्रतिपादि
ताः पदंनामद्विविधम् सुवंतंतिङंतं तत्रपदैकदेशानामयथात्स्वरूपः प्रकृतिभागः प्रकृतेरेकदेशाक्षरसमि॰
स्वरूपभागश्च तत्रपदवाक्ययोरुदाहृतंप्राक् पदैकदेशादिरुदाहियते तत्रयथात्स्वरूपप्रकृतेरन्यात्क श्री

कपदैकदेशोरचनादिवाक्रियेया कालिहिश्रीगाश्वमगाकरविमलयरह णाश्वनजोस्य ल सा।

शृंगारादिः अलंकारः १ प्रेयस्वदलंकारः भेदयादयः नोक्ताः २ ऊर्जस्वदलंकारः अलंकारः १

ते गुणीभूतौरसौरसवत् भावस्तुप्रेयः रसभावाभासौऊर्जस्वीभावप्रशांतिःसमाहितःइत्यस्त्येवए
षामलंकारव्यवहारोनपुनर्भावोदयादिषु तत्कथमेतदुच्यतइतिचेत् परैन्यवचनेविनामहचसिनौ
दरः तर्हितावत्सिद्धत्वावानवश्यंब्रूयात् रसादिनानुसन्धानात्इति ननुएवाहतेषुध्वनिगुणीभूतव्यंग्ययो
र्भेदेषुध्वनिभेदैःगुणीभूतव्यंग्यभेदैरलंकारभेदैर्वाविषयसंकरःसंसृष्टिर्वावर्त्तते तत्कथंचितध्वनि
रितिक्वचिद्गुणीभूतव्यंग्यइति तत्रापिक्वचिदलंकारध्वनिरितिक्वचिद्रसादिध्वनिरित्यादि एवंतुगुणीभू
तव्यंग्यइत्यादिव्यपदेशानांनियमःइतिचेत् प्राधान्यात् यत्रहियत्प्रधानंतत्रतेनव्यपदेशः प्राधान्यं
चेतिभाषितश्चमत्कारः सचसहृदयहृदयैकवेद्यइतिनासिद्धः अथवाच्यांगभावेनशब्दशक्तिमूल
स्यलक्ष्यक्रमस्यगुणीभावोयथा जनस्थानेभ्रांतंकनकमृगतृष्णांधितधिया वचोवैदेहीतिप्रतिपद
मुदश्रुप्रलपितं कृतालंकाभर्तुर्वदनपरिपाटीषुघटनामयाप्तंरामत्वंकुशलवसुतानत्वधिगता ॥१॥ अ
त्रपादत्रयद्योत्यापिरामेणसहोपमा मयाप्तंरामत्वमित्यनेनवाच्यत्वं नीतातदंगंचशब्दशक्तिमूलानु
रणनरूपोद्वितीयः वाच्यस्यैवार्थशक्तिमूलस्यांगभावोयथा आगत्यसंप्रतिवियोगविसंष्ठुलांगी
मंभोजिनींक्वचिदपिक्षपितत्रियामः एतांप्रसादयतिपश्यशनैः प्रभातेतन्वंगिपादपतनेनसहस्ररश्मिः
अत्रार्थशक्तिमूलोनायकनायिकावृत्तांतोवाच्यःविकमलिनीवृत्तांतोध्यारोपेणतदंगतयैवस्थितः स
मासोक्त्यावपोढरागेणविलोलितयत्रसर्वत्रप्रतीयमानार्थोपस्कृतवाच्यस्यैवप्राधान्यात् अयंचपादपतने

मयारामत्वंप्राप्तं तेनरामेणकुशलवौ प्रतीयस्यांएतादृशी सीताप्राप्तामयातु कुशलवसुधनंत स्यभावः कुशलवसुतानाप्ता रामेण रावणमृगस्वपत्नीच स्वनाशात्तामयात तंकुरस्वामिमृगस्वपत्नी प्रयावनमन्दनास्ता रामेणप्रतिपदं इति उदश्रुवचः हेसीते इतिप्रलपितं नप्रात्नु वैइतिनिश्चयेनदर्शि इतिकथितं सुवर्णस गम्प्रलक्षपा प्रभृता बुद्धिर्यस्यातेनरामेण जनस्थानेखभूतस्य नेसीतान्वेषणार्थंभ्र मितं स्वर्णमेवमृग तृष्णातया प्रभृता बुद्धिर्यस्यतेनमया जनस्थाने दत्तजननाम्स्यानेयाचनार्थंभ्रमितं मित्यर्थः ६

अलंकारस्यप्राधान्येअलंकारध्वनिरिति रसादिप्राधान्येरसादिध्वनिरित्येवंव्यपदेशः ६

शब्दशक्तिमूललक्ष्यक्रमवाच्यस्ययथा ७

केनापिनायकेन नायिकाखंडिता तथेते ३

चरणपातेनवा किरणस्पर्शेन ३

विंबसंपातेवा प्रतिपदपति = ३

अन्यच्चरोव्यतीताराम...

...दपतननीतक ...

केतकेन जम्बू(जलमलनाशकं वाति मेलीमिति सिद्द =)

९१

४१ का॰ प्र॰ ५१

तिष्ठ्ठिप्ठ सङ्गाते पिनशाब्दशाक्तिमूलत्वेन व्यपदेश्यः किंत्वर्थशक्तिमूलत्वेन प्राधान्येन व्यपदेश इति न्यायात् मूर्च्छावाप्राधावस्था ४

तद्ध्येतिरेकेणापि नायकनापि कावृत्तांतव्यक्तिसंभवच्च। न चौपमात्रं व्यंग्या। उल्लासस्यकालेयादिवत् वीसंजलभुजव्यंग्ये लंमौणं ५

श्लेषाभावात्। न च वाच्यसिद्ध्यंगत्वं विकमलिनीवृत्तांतस्येतन्नैरपेक्ष्येणैव सिद्धेरिति। वाच्यसिद्ध्यंगं द्वि

धा। एककर्तृकपदवाच्यांगमन्यकर्तृकपदवाच्यांगं च। तत्राद्यं यथा भ्रमिमरतिमलसहृदयतां प्रलयं मू

र्च्छां तिमः शरीरसादं च मरणं च जलदभुजंगप्रसह्य कुरुते विषं वियोगिनीनां। अत्र हालाहलरूपो विष

शब्दार्थो व्यंग्यः जलेऽभिनियमना तेन जलदभुजंगेति रूपस्य वाच्यस्य सिद्धिं करोति। अन्यथो जयंशप्रमुख ः ६

पमासंदेहसंभवात्। यथा वा मम। तादृग्भूतं तरसप्रसादकतककोदांबुधारायितः। जीयासुः कवि

रोगकारवहितैवम वति = ९ रत्नश्रीणां भवतेः स्तास्तावचोभंगयः सपीन्द्विग्रहिणः पुरातनतरान्सघोनवान्कुर्वती याभिः कसुमहौष वचोभंगीभिः ८

धीभिरगदंकारायितैर्भारती। अत्र प्रसादइत्यत्र जलप्रसादरूपोऽर्थो व्यंग्यः। स च वाच्याया कतककोदांबुधारो

पमायाः प्रंगं। अन्यवक्तृकपदवाच्यस्यासिद्ध्यंगं यथा। गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते किंत्वे ए नगवब्रनदीर्घ च्युतिर्यस्य वा धैर्य

शास्तोन्ततः ५ एतयो प्रीतेरस्ति ५ वं विजनस्थयोर्हतजनैः संभावयत्यन्यथा। इत्यामंत्रणभंगिसूचितव्यथावस्थानरवेदालसा माश्लिष्यं किंजुर्वन्द्र ५ च्युति र्यस्य हे = ६

गो लक्कोत्करांचिततनुर्गोपीं हरिः पातु वः॥१॥ अत्राच्युतेत्यनेन सोल्लुंठनं त्वं मद्विषये च्यवसे इति व्यंग्यमेवावस्थानद्

ति यद्वा अच्युतो धैर्यादस्खलितस्त्वमतो व्यर्थमवस्थानमिति दर्शनेनेत्यादिना संभोगेनेव तृप्तिरिति

किं त्वेवमित्यादिना द्वयोरपकीर्तिर्जातैवास्त्येवालानं वंचया [redacted] वुइतिरवेदस्य व्यज्यते तच्च इत्या मंत्रण

भंगिसूचितव्यथावस्थानखेदालसामित्येतद्वाच्यसिद्धिलक्षणं तेनैतं विना एतद्विशेषणपदार्थस्य ४१

वाच्यस्य। राम॰

...मेद्रापरस्यंनं ४ सं॰१

नेत्रयोर्विद्युत्स स्वरिस्तु कोलाहलसुग्रीवाए = उत्ति:१० ... ऐश्वर्याया ६ ब्राह्मणातिक्रमे = ६ व्यापारवल्ल = ४

एसमगतं: प्रत्युक्ति: शरीरस्याभात्। अस्फुटं यथा। अदृष्टे दर्शनोत्कंठा दृष्टे विश्लेषभीरुता। नादृष्टेन न दृष्टेन भवता लभ्यते सुखं।

अत्रादृष्टे यथा न भवसि वियोगदुःखं च यथा नोत्पद्यते तथा कुर्या इति व्यंग्यम्। सहृदयस्यापि न स्फुटं। संदि

ग्धप्राधान्यं यथा। हरस्तु किंचित्परिवृत्तधैर्य्यश्चंद्रोदयारंभ इवांबुराशिः। उमामुखे बिंबफलाधरोष्ठे व्या

पारयामास विलोचनानि। अत्र चुंबितुमैच्छदिति व्यंग्यं युगपल्लोचनत्रव्यापारणं वाच्यं। तयोः प्राधान्ये सा

धकबाधकमानाभावेन संदेहः। वाच्यस्यापि लौकिकत्वेन चमत्कारकारित्वादुत्कंठातिशयव्यंजकत्वाच्च। तु

ल्यप्राधान्यं यथा। ब्राह्मणातिक्रमत्यागो भवतामेव भूतये। जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते।१। अत्र जा

मदग्न्यः क्षत्राणामिव राक्षसानामपि क्षयं करिष्यतीति व्यंग्यमिव वाच्यमपि प्रधानमेव दुर्मनायत इति गंभीरो

तया चमत्कारित्वात्। विग्रहवैरस्यैरविवक्षितत्वाच्च। काक्वाक्षिप्तं यथा। मथ्नामि कौरवशतं समरे न कोपाद्दुः मवहारेए ९

शासनस्य रुधिरं न पिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणेन। अत्र मथ्ना

मीति व्यंग्यं। तच्च वाच्यस्य निषेधस्य सहभावेनैव व्यवस्थितं। घरकम्मवावडाए बहूए सीअंति अंगाइं। अत्र द

त्तसंकेतः कश्चिल्लतागृहं प्रविष्ट इति व्यंग्यं। तस्माद्वाच्यं चमत्कारकारि श्रवणसमकालमेव गांवसा दसंतन्य वस ५

मानतारूपस्या तिसौंदर्यात्। उत्कंठातिशयपर्य्यवसन्नत्वात्। एषां भेदा यथायोगं वेदितव्याः पूर्ववत् एव

वद्भुनेरिव। चकारो भिन्नक्रमः। पूर्ववच्चेत्यर्थः। यथायोगं यथासंभवं तेनायमर्थः। न केवलमेतेषामेतद्व्यंग्यस्य भे

दाः। किं त्वर्थांतरसंक्रमितवाच्यादिभिर्यथा ध्वनेर्भेदास्तथा असंभाविनो विहायान्यस्यापि तैरूपाद्यैर्मि: शुद्धभेदाः

संकरसंसृष्टिभ्यां योजने तेषामेषां च संकीर्णभेदाः ... मात्रेणालंकारव्याप्तेनिव

४२
का॰ १॰
42

धनाः तदुक्तं ध्वनिरूपता व्यज्यंते मात्रेण यदालंकृतयस्तदा ध्रुवं ध्वन्यंगता तासां काव्यवृत्तेस्तदाश्रयात् इत्यत्र ध्वन्यं
गता व्यंग्यतया ध्रुवं ध्वन्यंगता ध्वनिनैव ता व्यज्यंते। तद्व्यंजकस्य ध्वनित्वमेवेत्यर्थः कुतः काव्यवृत्तेस्तदाश्रयात् काव्यप्र
वृत्तेस्तदभिसंधानपूर्वकत्वात्। वस्तुमात्रापेक्षया अलंकारस्य चारुत्वनियमादित्यर्थः। ननु यद्यलंकारापेक्षया वस्तुमा
त्रस्यातिशयानियमस्तदा कथमलंकारेण वस्तुमात्रव्यंजने ध्वनित्वमिति चेदुच्यते सएवार्थो वाच्यः (सन्नतया चमत्का
रोति यथा व्यंग्यतापन्न इत्यनुभवसिद्धमतो वाच्यतापकर्षहेतुः (व्यंग्यतानूत्कर्षायेति स्थितं। यत्र चालंकारेण वस्तुमा
त्रं व्यंग्यं तत्रालंकारस्य वाच्यत्वेन किंचिदुत्कर्षाद्युज्यते एव ध्वनित्वं। यत्र तु वस्तुनालंकारो व्यज्यते तत्र वस्तुनोऽलंकार
योर्वाच्यत्वव्यंग्यत्वाभ्यामतिशयेनैवोत्कर्षापकर्षाविति कुतो गुणीभूतव्यंग्यत्वावकाशः इदं तु चिंत्यं
एवं चारुत्वाभावनिबंधनगुणीभूतव्यंग्यत्वं मा भूदारूढत्वादिनिबंधनं तु तस्मिन् को वारयतेति। यत्तु
नरथानामेव भेदानां संकीर्णत्वमात्रातिदेशकमिदं सूत्रमिति व्याख्यानं तदबोधात्। तथा सति हि
यथायोगमित्यनेन वस्तुव्यंग्यालंकाररूपभेदपर्युदासवैयर्थ्यं संकरादीनां तथा प्रव्याहतेः ए
सू॰ = वं सजातीययोगो ध्वनेरुक्तः इदानीं विजातीययोगमाह। सालंकारैर्ध्वनेर्यैश्च योगः संसृष्टसंकरैः।
सालंकारैरिति विभिन्नार्थैकरूपनानाशब्दैः श्लेषः। एकत्रालंकारपदस्य भावप्रधानत्वात्।
तथा च तैरेवालंकारैरलंकारसहितैश्च तैरित्यर्थः। तेन ध्वनिना भूतव्यंग्येन वाच्यालंकारेण
च ध्वनेर्योग इति पूर्वापराभ्यामुक्तं भवति। तदुक्तं ध्वनिरुक्ता। स गुणीभूतव्यंग्यैः सालंकारैः
सह प्रभेदैः स्वैः संकरसंसृष्टिभ्यां पुनरप्युद्योतते बहुधा इति। सध्वनिः सालंकारैर्
...भूतव्यंग्यैः स्वैः प्रभेदैः ... तदन्वयः। अन्योन्ययोगादेवं स्या ४२
राम॰

दूदसंख्यातिभूयसी॥ एवं ध्वन्यादिभेदैस्तत्प्रभेदयोजनेति प्रभूता संख्या भवतीत्यर्थः। एतैः प्र
भेदैरुपनिबध्यमानः पुरातनोप्यर्थो नवनवीभवतीति प्रति सप्रयोजनं ध्वनिभेदोपदर्शनम्। यद्
ध्वनिकृता। ध्वनेर्यः सगुणीभूतः व्यंग्यस्यात्मा निदर्शितः। एतेनानंतमायाति कवीनां प्रतिभागुणः
इति। तदेवमनंतानां ध्वनीनां व्यापारयोगिनां ध्वनीनां गुणीभूतव्यंग्य[redacted]नां वक्काव्यभेदानामनु
गतोपाधिना संकलने त्रयो भेदाः व्यंग्यस्य त्रिरूपत्वात्। तथाहि। किंचिद्व्यंग्यवाच्यत्वसहं किंचिद्वत
दसहं वाच्यत्वसहत्वं त्वभिधया प्रतिपाद्यमानस्यापि चमत्कारकारित्वं। तयोराद्यं वस्तुमात्रमलंका
रश्च। अलंकारप्राधान्येपि च यालंकारत्वं। तयोक्तं प्राक्। रसादिलक्षणस्त्वर्थो न कदाचिद्वाच्यत्वं
सहते। नहि सामान्यतो रसभावादिपदैः विशेषतः शृंगारनिर्वेदादिपदैर्वाभिधीयमानश्चमत्कारी
स्यादिति त्वेवं। अभिधानेपि विभावाद्यप्रतीतौ चमत्काराभावाद्विभावादिप्रतीतौ त्वनभिधानेपि चमत्
स्य चमत्कारकारित्वादित्यन्वयव्यतिरेकाभ्यां विभावादिपदैरेव प्रतीयमानमर्थेति निर्णीयते। तेनासौ व्यं
ग्य एव चमत्कारकारी। ननु विभावादिवाचकपदैर्लक्ष्य एवास्तु रसादिः। नहि विभावादिवाचिपदं विनाऽन्
यावेदपि तत्प्रतीतिरिति चेन्न। मुख्यार्थबाधादिविरहात्‌ ननु व्यंजनायाः शब्दविषाणायमानत्वात्कु
तो व्यंग्यवैरूप्यकृतो भेद इति चेदुच्यते। लक्षणामूले वस्तुमात्रव्यंग्यं विना लक्षणैव न संभवतीति प्राक्प्रति
पादितं। अभिधामूलेष्वपि साक्षात्संकेतितोऽर्थस्तेन समयमपेक्षमाणा व्यंग्यैवेति निर्विवादं। अभिधाया

नियमनात्। अर्थशक्तिमूलेष्वनर्गां कर्तव्य। यतः पदस्य प्रथमपदार्थस्मृतिस्तस्य पदार्थैर्विशेषाणामन्व

४३
का॰ प्र॰
43

यरूपविशेषरूपस्य वाक्यार्थप्रत्ययः ततो व्यंग्यप्रतीतिरिति तृतीयकक्षायां कुतोऽभिधायाः प्रसरणं। द्विती
यकक्षायामेव तदनपेक्षणात्। यतोऽभिहितान्वयवादे अशाब्द एवान्वय आकांक्षादिवशेन प्रतीयते शब्दबु
द्धिकर्मणां विरम्य व्यापाराभाव इति च सर्वसिद्धं। येऽप्यन्विताभिधानवादिनः देवदत्त गामानय इत्यादि प्र
योजकवृद्धवाक्यं प्रयुक्तात् तदनंतरं प्रयोज्यवृद्धेन सास्नादिमंतमर्थमानीयमानमालोक्य अयमे
तद्विषयकैतत्क्रियागोचरकार्य्यताज्ञानवान् तद्विषयकचेष्टावत्त्वात् तद्विषयकप्रवृत्ति — म
द्वदिति प्रयोज्यवृद्धस्य ज्ञानमनुमिमीते। ततः कारणं विना कार्यानुपपत्त्याऽखंडवाक्यस्यान्वय
व्यतिरेकाभ्यां तज्ज्ञानेन कार्य्यत्वकारणत्वरूपां शक्तिमवधारयति। अथ ज्ञेयसंबंधं विना वाच्यस्य
शक्तिरनुपपन्नेति। अर्थापत्त्याऽखंडवाक्यस्यार्थेऽखंडवाक्यस्य वाच्यवाचकरूपसंबंधमवधारय
ति। यदुक्तं। शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया। अन्य
थानुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकां। अर्थापत्त्यावबुध्येत संबंधं त्रिप्रमाणकमिति। त्रिप्रमाण
कमिति। जात्यपेक्षया त्रित्वं न तु व्यक्त्यपेक्षया। एवमखंडयोः संबंधमवधार्य विशेषतो व्युत्पद्यते।
कथमित्थं। अनंतरं तेनैव प्रयोजकेन चैत्राश्वमानय देवदत्त गां नय इत्यादिवाक्येषु कस्यचिदन्यस्य
पदस्यावाये कस्यचिदुद्धारे च सति यस्य वाक्यभागस्यान्वयव्यतिरेकाभ्यां यस्य वाक्यार्थभागस्या
न्वयव्यतिरेकावुपलभते। तत्तस्य शक्तिमवधारयति। तत्र शक्त्यवधारणमन्वितएव पदार्थे ४३ राम॰

प्रथममन्वय एव वाक्यस्य शक्तिग्रहात् । पदार्थमात्रशक्तावुपजीव्यविरोधात् । व्यवहारेणान्वितज्ञानस्यै
वोपस्थापनाच्च । नन्ववाक्यं विना कश्चिदाद्युत्पत्तिर्व्यवहारेणैवाद्युत्पत्तेर्व्यवहारस्य च प्रवृत्ति नि
वृत्तिरूपस्य पदमात्रेण कर्तुमशक्यत्वात् अतो वाक्यस्थितानामेव पदानामन्वितेष्वेव पदार्थेषु संकेत
ग्रहादन्विता एव पदशक्याः । त एव च वाक्यार्थ इति न वाक्यार्थबोधे शक्तेर्विरामः । नन्वभिहितानां पदा
र्थानामन्वयोऽशक्य एव प्रतीयते योग्यतावशादित्युक्तं । ननु तथापि संसर्गविशेषोऽशक्य एव पदा
र्थसामान्यान्वित एव शक्तिग्रहात् । अन्यथा गामानयेति पदं श्रुत्वा अश्वमानयेत्यादिवाक्ये तत्त्वेदमान
यन पदमित्यादिप्रत्यभिज्ञा न स्यात् पूर्वस्य गवान्वितानयस्य अश्वान्वितानयनेऽशक्तत्वात् तेनार्थभेदे
न भेदादिति चेन्न । पदार्थत्वेन सामान्येन विशेषाणामेवान्वये शक्तिग्रहात् नहि निर्विशेषं सामा
न्यमिति । अन्वितानां च विशेषरूपत्वादित्याहुः । तेषामपि मते सामान्येनैव रूपेण विशेषः शक्यो
न तु विशेषरूपेण । तथा च पदार्थान्तरसामान्यान्वितपदानां शक्ति गवादि विशेष्यान्वितस्तु विशे
षोऽवाच्य एव । तस्मादभिहितान्वयवादेऽनन्वित एवाभिधानं न ये तु पदार्थसामान्यान्वितः स्वार्थ
ः संकेतविषयो गवादिविशेषान्विता नयनादिरूपस्तु संकेतित एवेत्यवाच्य एव वाक्यार्थः । यदपि
कैश्चिदुच्यते शब्दश्रवणाय कत्वं वा । न प्रथमः शब्दस्यार्थानुत्पादकत्वात् चरमं पुनरनुमन्यते
परं तु संकेतवत्वेन ज्ञातस्य अज्ञातस्वरूपमात्रेण ज्ञातस्य वा ज्ञापकत्वेऽतिप्रसंगान्न । न चान्वयाविशे

वाच्य संकेतग्रह इति चेत्। लोष्टाद्यन्वितानयनादेर्विशेषस्योपस्थापकांतराभावेन शब्दादेवोप
स्थितिर्वाच्या॥ तथा च तत्र संकेतग्रहे शब्दात्तदुपस्थितिः। शब्दाच्च तदुपस्थितौ संकेतग्रह इत्यन्योन्या
श्रयात्। तस्मान्निमित्तकानुरोधेन नैमित्तिकानि कल्प्यंत इत्यविचारिताभिधानं। अथ सोयमिषोरिव दी
र्घदीर्घव्यापार इति यत्परः शब्दः स शब्दार्थ इति च निःशेषच्युतेत्यादौ विधिरेव वाच्य इति भट्टमतोपजीविनः। अ
स्यार्थः। यथा बलवता प्रेरित इषुरेकेनैव वेगाख्येन व्यापारेण मर्मच्छेदमुरोभेदं प्राणहरणं च रिपोर्विध
त्ते तथैक एव शब्द एकेनैवाभिधाख्येन व्यापारेण पदार्थस्मृतिवाक्यार्थानुभवव्यंग्यप्रतीतिं च विधत्ते। अ
तो व्यंजकत्वाभिमतस्य शब्दस्य वाचकत्वमेव। किंच। यत्र शब्दस्य तात्पर्यं स शब्दार्थ इति निःशेषेत्यादौ
तात्पर्यविषयतया विधिर्वाच्य एवेति। ते तात्पर्यं वाचोयुक्तेस्तात्पर्यमजानंतः पराबस्ताद्वाक्यवर्त्तिपदो
पस्थापित एव हि तात्पर्यमुच्यते न प्रतीतिमात्रे भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति सि
द्धांतः। अस्यार्थः। भूतं सिद्धं भव्यं साध्यं तयोः समभिव्याहारे भूतं भव्याय साध्यायोपदिश्यत इति का
रकपदार्थाः क्रियापदार्थेनान्वीयमानाः सिद्धा अपि प्रधानक्रियानुकूलतया साध्यीभूततया स्वक्रिय
यायोगात्साध्यायमानतामाप्नुवंति स्वरूपेण सिद्धा अपि साध्यक्रियाविशिष्टतया साध्या इव भवंती
ति। ततश्च दहनेनादग्धमात्रं दह्यते न तु दग्धमपि। तथा यावदेवाप्राप्तं तावदेव शब्देन विधीयते न तु प्राप्त
मपि। यथा अग्रत्विक्प्रचरणेऽन्यतः प्राप्ते लोहितोष्णीषा ऋत्विजः प्रचरंतीत्यनेन लोहितोष्णीषत्वमा
त्रं विधीयते न तु ऋत्विक्प्रचरणं वा उष्णीषस्याविप्राप्तौ तु लोहितमाच्छदवस्यान्यतः सिद्धो वद्धाज्ञ ४४

होतीत्यनेनदध्नः करणत्वंनतुदधिहवनंवा।एवंरक्तंपटंवयेत्यादौरक्तत्वपटवयनानांमध्येएकस्यद्वयो
स्त्रयाणांवासिद्धौ एकविधिर्द्विविधिस्त्रिविधिर्वा।ततश्च यावदेवविधेयतावत्येवतात्पर्यंविधेयंचशब्दो
पात्तमेवेतिलब्धं शब्दोपात्त एवतात्पर्यमिति।यदिच षतीतिमात्रेतात्पर्यंतदा दूर्वाधावतीत्यादौ दूर्वादि
समानसंवित्संवेद्यतयाप्रतीतेः ऽपराद्धेर्यपिकदाचित्तात्पर्यंस्यात्।ननुतद्वाक्यपदोपस्थापितएवतात्प
र्यमितिनव्याः प्रिः।विषंभुंक्ष्वमाचास्यगृहेभुंक्ष्वाइत्यत्रविषंभुंक्ष्वेतिवाक्यस्यमात्रेत्यादिवाक्येतात्पर्यमितिचे
न्नैवं।यतएतदेकमेववाक्यंचकारस्यैकवाक्यतासूचकत्वात्।अन्यथातद्वैयर्थ्यप्रसंगात्।नचाख्यातवाच्य
क्रिययोः साक्षादन्वयः संभवति गुणानांचपरार्थत्वादसंबंधः समत्वात्स्यादितिन्यायात्।तद्वाक्यचैक
दानोभवितव्यमत्रान्वयेनततोविषभक्षणादप्येतद्गृहभोजनमनिष्टहेतुरतः।सर्वथानास्यगृहेभुंक्ष्वेत्याद्य
तिवाक्यार्थः।तथाचतद्वाक्यस्यशब्दोपस्थापितएवतात्पर्यमितिसिद्धं।तस्माद्यत्परः शब्दइत्यादिपद्धतं
तत्तात्पर्यज्ञानात्।यदपिसोयमिषोरिवेतितदप्ययुक्तं।यतः शब्दश्रवणानंतरंयावानर्थः प्रतीयतेतावति
सर्वत्रयदिशब्दस्याभिधैवस्यात्तदा चैत्रपुत्रस्तेजातः कुमारीतेगर्भिणीत्यादिवाक्यानंतरंहर्षशोकयोः
प्रतीतिः तयोरपितद्वाक्यस्याभिधास्यात्।अथतच्छब्दप्रतिपाद्येसर्वत्राभिधाः।हर्षादिपरस्तुनतस्मात्प्राद्
युच्यतेतर्हिलक्षणीयेप्यभिधैवस्यादितिलक्षणोच्छेदः किमितिच श्रुतिलिंगवाक्यप्रकरणस्थान
समाख्यानांपारदौर्बल्यमर्थविप्रकर्षादितिसूत्रेणभगवान्जैमिनिः श्रुत्यादिषुपूर्वपूर्वबलीयस्त्वंप्र

४५
का० प्र०
45

तिपादयांबभूव। सर्वत्रैवाभिधाप्रसंगे उक्तदौर्बल्यबीजाभावात्। सूत्रं तु प्रकृतार्थविच्छेदकत्वेपि बहूपका
रकत्वादुपन्यस्तत्वाच्च व्याक्रियते। श्रुतिलिंगादयः षडिह विनियोजकाः। तत्र विरुद्धयोरेकदेशसंनिपाते स
मुच्चयो न संभवतीति। एकेनापरस्य बाधो वक्तव्यः। स च बलवता दुर्बलस्येति स्थिते दौर्बल्यप्रतिपाद
कं सूत्रं श्रुतिलिंगेत्यादि। अस्यार्थः। श्रुत्यादीनां समवाये एकत्रोपनिपाते तेषां मध्ये यदपेक्षया यत्परं
तदपेक्षया तत्तद्दुर्बलं कुतः अर्थविप्रकर्षात्। पूर्वापेक्षया विलंबेनार्थप्रत्यायकत्वात्। यथैवैतत्तथो
दाहरणैः स्फुटीकरिष्यते। तत्र निरपेक्षो रवः श्रुतिः। यथा व्रीहीनवहंतीति। अत्र क्रियाफलभागित्वं कर्म
त्वं बोधयंती द्वितीया निरपेक्षैव व्रीहीणामवघातशेषित्वं प्रतिपादयति। अर्थविशेषप्रकाशनसा
मर्थ्यं लिंगं। यथा बर्हिर्देवसदनं दामीति। अत्र लवनार्थप्रकाशतया बर्हिर्लवने विनियोगः। परस्प
राकांक्षावशात् क्वचिदेकस्मिन्नर्थे पर्यवसितानि पदानि वाक्यं। यथा। देवस्य त्वा सवितुः प्रसवेश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीत्यत्र लिंगेन निर्वापे विनियुज्यमानस्य सवितार्थभा
गस्य एकवाक्यताबलेन देवस्य त्वेत्यादिभागस्यापि तत्र विनियोगः। लब्धवाक्यभावानां पदानां कार्यां
तरापेक्षावशाद्वाक्यांतरेण संबंध आकांक्षापर्यवसन्नं प्रकरणं यथा समिधो यजतीत्यादौ अस्य हि
दर्शपौर्णमासकथंभावाकांक्षायां पाठवशाच्छेषत्वं स्थानं क्रमः स चानेकस्याम्नातस्य संनि
[illegible]षोमीययो लिंगेनैव द्वयोर्विनियोगसिद्धेः दधिरसीत्यत्र तु न लिंगादि विनियोजकं किंतु
यस्मिन्देशे वा सत्ते उपांशुयाजविधानं तस्मिन्नेव प्रदेशे मंत्रस्य पाठ इति क्रमादुपांशुयाग ४५

त्संज्ञाऽस्यादिनियोगः समाख्यायोगबलं यथा हौत्रं औद्गात्रमित्यादि तत्र हि होतुरिदं हौत्रमित्यादियो
गबलेन हौत्रादिसमाख्यातानि कर्माणि होत्रादिभिरनुष्ठेयानि। अथैषां विरोधोदाहरणानि। तत्र श्रु
ति लिंगयोर्विरोधे लिंगस्य दुर्बलत्वं यथा। कदाचनस्तरीरसि नेंद्र सश्चसीत्यादिकाया ऋचो विनि
योजिका श्रुतिः। ऐंद्र्या गार्हपत्यमुपतिष्ठत इति। अत्र चेंद्रप्रकाशनसामर्थ्यरूपात् लिंगादिंद्रोपस्था
पने विनियोगः प्रतिभाति। अन्यप्रकाशकस्यान्यत्र विनियोगायोगात्। श्रुत्या गार्हपत्योपस्थापने
स प्रतीयते। गार्हपत्यमिति द्वितीया हि कर्मविभक्तिस्तया कामपि क्रियामपेक्ष्य प्रकृत्यर्थस्य शेषि
त्वं बोधयति। क्रियाजन्येष्टफलभागित्वस्य तदर्थत्वात्। एवं ऐंद्र्येति तृतीया प्रकृत्यर्थशेषत्वं क्रिया
प्रतिसाधकत्वमत्वरूपकरणत्वस्य तदर्थत्वात्। तदत्र श्रुतिलिंगयोर्विरोधः। न च वाक्यनिरपेक्षया द्वि
तीयया शेषित्वमात्रं प्रतीयते। न त्वैंद्रीमृचं प्रति। तत्र गार्हपत्यमृचं प्रत्युपसंभवतीति कुतो विरोधः।
[redacted] ऐंद्र्येति पदमपेक्ष्य विशेषबोधनाद्विरोध इति
चेन्न। तर्हि श्रुतेर्विरोधः। किंतु वाक्य तत्र लिंगापेक्षया दुर्बलमेवेति। यतः शेषशेषिभावः सामान्यतः
श्रुत्यैवावगम्यते पदांतरपेक्षया तु विशेषव्यवस्थाप्यते। विशेषसंबंधमात्रस्य पदांतरसंबंधात्प्रतीतेः
तस्माच्छ्रुत्या सामान्यतः प्रतिपाद्यो सौ वाक्यलभ्यविशेषमपेक्ष्य लिंगप्रतिपाद्येन विरुध्यते तत्रायं पू
श्रु वपक्षः सामर्थ्यज्ञानमपेक्ष्य श्रुतिर्विनियोजिकानश्च समर्थं श्रुतिः सहस्रेणापि विनियोक्तुं शक्यते। यथा व
ह्निः प्रत्येकं जलवाहे। अतो लिंगस्य बलवत्त्वात् ऐंद्र्येंद्रोपस्थापनेऽस्या विनियोगः तदनुरोधित

४६ याद्वितीया सप्तम्यर्थे तया आरब्धया। गार्हपत्यसमीपे ऽनयाइंद्र उपस्थातव्य इत्यर्थः पर्य्यवस्यति सिद्धांत
रू॰ प्र॰ स्तु श्रुतिः स्वरूपसत्तामात्रमपेक्ष्यते ननु तद्बाधमपि येन लिंगं बलवद्भवेत्। तस्य च पूर्वं सत एवज्ञाने
46 विनियोगान्यथानुपपत्त्या पश्चादुपजायते लिंगं तु विनियोजने श्रुतिमपेक्षते। नह्यनेनेंद्र उपस्थातव्यः।
इति लिंगात्स्वरतः प्रतीयते किं त्वीदृगिंद्र इत्येतावन्मात्रं। तथा च प्रकरणाम्नातसामर्थ्यादिंद्रप्रका
शनसमर्थाया ऋचः अन्यथानुपपत्त्या विनियोगः कल्पनीयः। तथा चार्थविप्रकर्षः। तथाहि। श्रुतार्था
पत्तिसाधकन्यायेन शब्दोपस्थापितेनैव शाब्दी आकांक्षा पूर्य्यत इति लिंगेनानया इंद्र उपस्थातव्य
इति श्रुतिः कल्पनीया। ततस्तया विनियोगो भवेत्। ततो यावत् लिंगश्रुतिकल्पनाय प्रक्रांतव्या
पारं तावत्। प्रत्यक्षया श्रुत्या गार्हपत्ये विनियोगः सिद्ध एवेति प्रकरणे निराकांक्षे कयानुपपत्त्या श्रु
तिः कल्पनीया। तस्मात् श्रुतेर्बलवत्त्वात् तदनुगुणतया सामर्थ्ये नीयमाने इंद्रपदं परमैश्वर्य्यवा
चकतया गार्हपत्यतात्पर्य्यकमित्यवधार्य्यते लिंगवाक्ययोर्यथा पुरोडाशस्य स्थानकरणस्याप
नेस्वरूपयोः सदनसादनयोः प्रकरणे स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि। त
स्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति मंत्रः पठितः तत्र कल्पयामीत्यंतः पूर्वभागः
सदने शेषभागस्तु सादने प्रयोक्तव्य इति लिंगात्प्रतिभाति। अयं च मंत्र एकं वाक्यं। यस्सदाहोपेणय ४६ रा॰

त्कल्पयामि तस्मिन्सीदेत्येकार्थावच्छिन्नत्वाद्विभागे साकांक्षत्वाच्च। ततश्चैकवाक्यत्वात्समस्त एवोभ
यत्र विनियोक्तव्यो देवस्य त्वेत्यादिवदिति वाक्यादवगम्यते। तदनयोर्विरोधः। अत्र पूर्वपक्षः। अत्र स्यैकवा
क्यत्वे निश्चिते पश्चात्तदुपपत्तये ऽभिधानसामर्थ्यं कल्पनीयं। यत्कल्पितया श्रुत्या विनियोगो भवेत्। यथा
देवस्य त्वेत्यादिमंत्रे अग्नये निर्वपामीति पदयोः समवेतार्थयोरेकवाक्यतया अतादृशपदांतराणां
सामर्थ्यकल्पना। तथा चैकवाक्यत्वनिर्वाहाय कल्पितं सामर्थ्यं न तद्बाधितुमर्हति। किंतु विनियोजिकां श्रु
तिं कल्पयत् सम[illegible]स्तमंत्रविनियोजिकामेव कल्पयतीति वाक्यस्योपजीव्यत्वेन बलवत्वात् समस्त
स्यैवोभयत्र विनियोग इति सिद्धांतस्तु यद्येकवाक्यतामवगम्यैव सामर्थ्यमवधार्येत तदोपजीव्यत्वाद्वा
क्यं बलवद्भवेत् न त्वेवं प्रत्युतावच्छिन्नसामर्थ्यानां सन्निहितपठितानां पदानां सामर्थ्यवशेन प्रयोजने
नतया एकवाक्यत्वावधारणं। यावंति पदानि प्रधानमेकमर्थं प्रतिपादयितुं समर्थानि विभागे साकांक्षा
णि भवंति तावंति एकं वाक्यं भवंति। अत्र च पूर्वोक्ते मंत्रे प्रकाश्यमानः प्रधानं सदनसादने चात्र तयोर्भ
ते तयोश्च सदनप्रकाशनसमर्थः पूर्वभागः सादनप्रकाशनसमर्थः शेषभागः इति प्रथमं प्रतीताभ्यां तत्सा
मर्थ्याभ्यां क्लृप्तेन श्रुतिद्वयेन तद्भागे वत्तद्भागयोः प्रत्येकं विनियोगे सिद्धे तावतैव प्रकरणपाठोपपत्तेः स
मस्तस्यैकवाक्यताबुद्धिरुत्पन्नाप्याभासी भवति। लिंगेन बाधात्। तथा क्लृप्तमपि सामर्थ्यं न श्रुत्यंतरं
कल्पयितुमर्हतीत्यर्थविप्रकर्षाद्वाक्याद्दुर्बलं। तस्मात् यावांतरवाक्ये वैरोधि च लिंगं नास्ति तत्र समवेतार्थ

४७ केनएकेनपदेनद्वाभ्यांत्रिभिर्वासहैकवाक्यतापन्नंतदंतराणामपिसामर्थ्यंविनियोजकश्रुतिकल्पनानुकूलक
का॰ प्र॰ ल्पयति।यथात्रैवस्योनतइत्यादिभागानां।वाक्यप्रकरणयोर्यथादर्शपौर्णमासप्रकरणेइदंद्यावापृथिवी
47 भद्रमभूदित्यादिकःसूक्तवाकनिगदःपठितः।तत्रचइंद्राग्नीइदंहविरजुषेतामवीवृधेतांमहोज्यायोक्रा
तामग्नीषोमाविदंहविरजुषेतामवीवृधेतामहोज्यायोक्रातामित्यवांतरवाक्यद्वयंश्रूयते।तत्रपौर्णमा
स्यामिंद्राग्नीनदेवतेइतिलिंगात्तत्पदमपनीयते।अमावास्यायांतुसमवेतार्थत्वात् तत्प्रयुज्यते।तत्रैवंसं
दिह्यते।इंद्राग्निपदैकवाक्यतापन्नानि।अवीवृधेतामित्यादिपदानितत्रापनेयानि।अथवाप्रयोक्तव्या
न्येवेति।तत्रप्रकरणात्प्रयोगःप्रतिभाति।असमवेतार्थतयादेवतामात्रस्यापनयनात्।वाक्यात्तुतान्यप
नेयानीतिप्रतीयते।येनसहपदैकवाक्यतापन्नं।तेनसहैवतदपनयनौचित्यात्।तदनयोर्विरोधः।तत्र
प्रकरणमेवांगसंबंधप्रतिपादकं अतस्तस्यबलवत्त्वाच्छेषभागःप्रयोक्तव्यएवेतिपूर्वपक्षेसिद्धांतःप्रक
रणंविनियोज्यस्वरूपसामर्थ्यमनपेक्ष्यनविनियोजकंयेनैवंभवेत्।किंतुतदपेक्षमेवकथमन्यथाप्रह्मोहंदे
वयज्ययाप्रजयापशुभिश्चग्रजनिषीयेति।एवानुमंत्रसमंत्रेतद्देवताविरहिणोदर्शपूर्णमासयोर्नविनियुज्येते।तत्र
एवोपसदः।साह्नस्यद्वादशाहीनस्येत्यत्रचएकाहविधेयसोमयागस्वरूपेसाह्नेज्योतिष्टोमादौद्वादशोपसत्तानवबो
यति।सापुनर्बहुदिवसविधेयासोमयागरूपाहीननामकक्रतुविशेषंनीयते अहूःखःक्रतावित्यनुशासनात्
स्वरूपालोचनायातुश्रुत्यालिंगेनवाक्येनवाअद्वितिप्रवृत्तिकेनयद्रूपमपनीयते।पदार्थोऽन्यत्रनीयतेतादृश
गावाशिष्टेनप्रकरणेनांतानुयस्यैतेयत्रतुविरोधिश्रुत्यादिकंनास्तितत्रप्रकरणंविनियोजकं।यथासमिधोयजति॥ ४७ राम॰

इत्यादिबोधितस्य सन्निधादेः अत्र तु यथा लिंगेनेंद्रादि भागोपनीयते। तथा वाक्येन तच्छेष भागोपीति। न पश्चा
त्प्रवृत्तिकस्य प्रकरणस्यावकाशः। न च तथास्य प्रश्नस्यास्तिइदं। यतो वाक्ये पदानां संबंधः प्रत्यक्षसिद्धः प्रकरणे त्वाकांक्षा
वशात्कल्पनीयः। तथा च वाक्ये प्रथममेवाभिधानसामर्थ्यं कल्प्यते ततस्तेन श्रुतिः तया विनियोग इति तृतीयः का
लो विनियोगस्य। प्रकरणे तु प्रथमं वाक्ययोः संबंधः कल्प्यते ततः सामर्थ्यं, ततः श्रुतिः अथ विनियोग इति चतुर्थः
कालः ततो वाक्यप्रथमं शेषभागस्यान्वये सिद्धे कृप्तापि श्रुतिरकिंचित्करी वाक्यविरोधादिति। प्रकरणस्थानयोर्य
था। राजसूयस्य प्रधानानानाकर्मात्मकस्य प्रकरणे प्रधानादभिषेचनीयादनंतरं शौनःशेपोपाख्यानमाम्नातः त
त्र किं समस्तराजसूयेऽस्य प्रधानैर्नानाकर्मात्मकस्य प्रकरणे प्रधानादभिषेचनीयादनंतरं शौ) तदंगं आहोस्विदभिषे
चनीयमात्र इति संदेहः तत्र प्रकरणस्य बलवत्वात्सर्वांगता काम्यते स्थानस्य तु बलवत्वेऽभिषेचनीयांगता तादन
योर्विरोधः। यद्यप्याकांक्षासत्वेपि उभयोरपि तुल्यबलता। अयमेतिपुत्रोराज्ञ इत्यादै गाथामानय प्रसादं पश्येत्यादि
(उभयविरहेणान्वयावबोधात्। तथापि विनिगमनाविरहादुभयोस्तुल्यबलत्वाद्विकल्पेनांगतास्त्विति पूर्वप
क्षे सिद्धांतः। आकांक्षासन्निधी द्वे अपि विनियोगप्रयोजके इत्युभयसंमतं। राजसूये च कथं स्यादित्याकांक्षा
त्र स्पष्टैव तिष्ठति यावदनुवर्त्तते। सन्निधानं च प्राकरणिकत्वेन सर्वदा बुद्धिसन्निहितत्वादस्त्येव। अभिषेचनीये च सत्य
पि सन्निधाने आकांक्षा उत्थाप्या सामर्थ्यकल्पनं श्रुत्युन्नयनं विनियोगः। अपरत्र एकवाक्यताकल्पनं सामर्थ्योन्न
यनं श्रुतिकल्पनं विनियोग इत्यर्थविप्रकर्षात् स्थानस्य दुर्बलत्वात् प्रकरणेन सर्वत्र राजसूये न शौनःशे
पोपाख्यानस्य विनियोगो न तु किंचिदिति स्थानसमाख्ययोर्यथा दर्शपौर्णमासप्रकरणे पौरोडाशिकसमा

म्नातेकांडेसान्नाय्यक्रमेणशुंधध्वंदैव्यायकर्मणइतिमंत्रः श्रूयते।सचप्रकरणाद्दर्शार्थः तथात्वंचतस्यसन्न
४८ वेतार्थतोवित्यात्।कस्याचित्शुंधनेविनियोगाद्भवेत् शुंधनीयंचात्रद्वयमुपस्थितं।सान्नाय्यपात्रंपुरोडाश
का॰ प्र॰ पात्रंच।तत्रसमाख्यावशात्पुरोडाशपात्रशुंधने विनियोगःप्रतिभाति।स्थानवशात्तुसान्नाय्यपात्राणां।तदन
48 योर्विरोधः।तत्रपूर्वपक्षः पौरोडाशशब्देनपुरोडाशसंबंधान्युच्यंते।तान्यधिकृत्यप्रवृत्तंकांडंपौरोडाशिकमि
तिप्रतिभाति।अतःसमाख्याश्रुतितएवसाक्षाद्विनियोजिका।क्रमस्तुप्रकरणाद्युत्पन्नयनद्वारातथेतिसमाख्या
वलवतीतिसिद्धांतस्तु।पौरोडाशिकपदेनपुरोडाशमंत्रविशेषेण संबंधमाह।किंतुपुरोडाशविशिष्टंकांडं
वैशिष्ट्यानुपपत्त्यातुसंबंधस्तत्रकल्प्यते।सोपिनशेषशेषिभावः किंतुसंबंधमात्रं।तद्द्वारेणतुमंत्रभेदस्यापि
तदनुमानं।तथाचसमाख्ययापिक्रमादिकमनुनीयविनियोगोनतुश्रुत्यैव।एवंचसमाख्ययाक्रमोनुमेयः ते
नप्रकरणं।तेनवाक्यंतेनलिंगंतेनश्रुतिः तयाविनियोगइतिसमाख्यायांषष्ठःकालोविनियोगस्य।स्था
नेतुक्रमः प्रत्यक्षएवेतिनकल्पनीयः।तथाचतेनप्रथमतएवप्रकरणमनुमेयं।तेनचवाक्यंतेनलिंगंतेनश्रुतिस्त
याविनियोगइतिपंचमःकालः।तस्मादर्थविप्रकर्षात्।समाख्यास्थानतोदुर्बलेतिनपुरोडाशपात्रशुंध
नेऽस्यविनियोगः।कथंतर्हिकांडस्यपौरोडाशिकसंज्ञा।पुरोडाशसंबंधिबहुमंत्रघटितत्वादित्यवेहि।तदुक्तं
निर्गलितोर्थः।एकद्वित्रिःचतुःपंचवस्त्वंतरप्रकारितं।श्रुत्यर्थंप्रतिवैषम्यंलिंगादीनांप्रतीयते।वाधिकैव
श्रुतिर्नित्यंसमाख्यावाध्यतेसदा।मध्यमानंतुवाध्यत्ववाधकत्वमपेक्षया।अयलमतिविस्तरेणेतिप्रकृति
मनुसरामः पूर्वोक्तंशुंधध्वंतैर्दैवैषम्यात्संपन्नपपन्नः।तथाहि।तत्रवेगव्यापारस्यस्वरूपसतएवजनक ४८ राम॰

तयादीर्घदीर्घतरत्वं संभवति। अभिधायास्तु ज्ञाततया एवानुकूलत्वात्। व्यंग्यनिष्ठतया चाज्ञानादित्यान्विता
भिधानवादे पि निःशेषेत्यादौ विधेर्व्यंग्यत्वमेवेति स्थितं किंच यदि वस्तुगत्या पदार्थांतरेणयोन्वितः सोभिध
योपस्थाप्यते तदा सान्विताभिधानं तदावश्यं व्यंजना स्वीकार्या। अन्यथा रात्रिं कुरुत इति शब्दस्य दुष्टत्वं न स्याद् दुष्टहेतो
रसभ्यार्थोपस्थितेस्तत्राभावप्रसंगात् तदर्थस्यान्यानान्वितत्वात्। किंच वाच्यवाचकभावातिरेकी व्यंग्यव्यंजकभाव इत्य
वश्यं काव्यतत्त्वज्ञैरपि स्वीकर्तव्यं। अन्यथा कष्टत्वादयोऽनित्यदोषाः असाधुत्वादयो नित्यदोषा इति विभागो न स्यादि
ति। वाच्यस्यार्थस्य विशेषेण कष्टादीनामपि सर्वत्र दुष्टत्वस्यैवाप्रसंगात्। व्यंजनाभ्युपगमे तु व्यंजनीयस्य वस्तुवि
धत्वेन रौद्रादौ व्यंग्येऽनुकूलत्वं शृंगारादौ तु दुष्टत्वमिति युज्यते विभागव्यवस्था। एवं पर्यायेषु मध्येकस्य चि
देव कुत्रचित्काव्यानुगुणत्वमित्यपि व्यवस्था न स्यात्। वाच्यार्थस्याविशेषात्। दृश्यते चासौ यथा। द्वयं गतं सं
प्रति शोचनीयतां समागमः प्रार्थनया कपालिनः इत्यादौ न पिनाक्यादिपदमनुकूलं किंतु कपालिपदं व्यंजकत
या कपाल्यादिपदमेव। ननु द्वयमप्येतदयुक्तं व्यंग्यत्वेनाभिमतस्य वाच्यत्वस्वीकार एवानुकूलत्वप्रतिकूल
त्वव्यवस्थोपपत्तेरिति चेन्न। अभिधास्वीकारे संकेतग्रहं विना तदनुपस्थितिप्रसंगस्योक्तत्वात्। किंचाका
व्यशास्त्रे वाच्यव्यंग्ययोः प्रतिपत्तिहेतुव्यापारभेदनिबंधनो भेदोऽवश्यं स्वीकर्तव्यः। वैधर्म्य दर्शनाद्वाच्यो
र्थः सर्वैरेक एव प्रतीयते इति नियतो व्यंग्यस्तु वक्तृप्रकरणादिविशादनियतः तथाहि गतोस्तमर्क इति वा
क्यात्तः सेनापतीन्प्रति शत्रूणां हठेनावमर्दनावसर इति। दूतीनामभिसारिकां प्रति अभिसरणमुपक्रम्यतामि
ति। सरव्या वासकसज्जां प्रति प्रियास्स प्राय स्तेप्रेयानिति कर्मकरस्य सह कर्म कुर्वंत प्रतिकर्मकरणान्निवर्त्यतामेहेति
भद्रत्यस्य धार्मिकं प्रति संध्याविधेयम् ... प्रवेशानिवाहि छं तत्प्रति दूरं नागा इति गृहीणा

४९
का॰ प्र॰
५१

गोपालकं प्रति सुरभवोगदं हं प्रवेशयंतामिति। दिवसेतिसंतप्तस्य वधूं प्रति संतापोऽधुना न भवतीति। आपणिकानां प्रत्या
न्प्रति विक्रेयवस्तु निसंहियंतामिति। नायकागमनप्रस्तावे प्रोषितभर्तृकायास्तत्सख्यकं प्रति नागतोऽद्य प्रेयानिति।
एकस्यैव वाक्यस्य वक्तृबोद्धृप्रति तत्तत्प्रकरणवशादेवमादिरनवधिर्व्यंग्योर्थः प्रकाश्यते। वाच्यस्तु सर्वान्प्रत्यविशिष्ट एव
ननु नैतद्वाच्यस्य वैधर्म्यं नानार्थसैंधवादिपदे नानार्थावगतिदर्शनादिति चेन्न। एकवाक्यवर्त्तिनस्तस्यार्थे
कानियमात्। यदग्रे वक्ष्यति। लक्षणीयार्थस्य नानात्वेप्यनेकार्थपदाभिधेयवन्नियतत्वमेवेति। तथा च लवणाश्व
धिकारिणः प्रतिसकलस्वामिनः सैंधवमानयेति पदद्वयोस्तदानियतत्वं तद्वदुर्वारमेवेति चेन्न। तात्पर्य्याज्ञाना
त्। न ह्यत्र सर्वैर्वाच्यैः सममसर्वेषां व्यंग्यानां भेदः प्रतिपाद्यते किंतु गतोस्तमर्क इत्यस्य वाच्यव्यंग्ययोस्तथाच
तद्वाच्यस्यानियतत्वं तदर्थप्रकरणैरेव सर्वेषां व्यंग्यस्यापि प्रतीतेः। तदयं नियतत्वानियतत्वरूपविरुद्धधर्म
संसर्गोभिहितः एवं विलक्षणस्वरूपकालादिभेदेपि भेदकोद्रष्टव्यः। वैधर्म्यसत्वेपि यद्यभेदः स्यात्तदा
नालानीलादेरपि न कश्चिद्भेदः स्याद्वैधर्म्यस्याविशेषात्। यदुक्तं। अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्मा
ध्यासः कारणभेदश्चेति। सुप्रसिद्धश्चतत्वतत्वस्वरूपादेभेदः। तत्रानिःशेषेत्यादौ मात्सर्य्यमुत्सार्य्य विचार्य
कार्य्यमार्य्याः समर्य्यादमुदाहरंति। सेव्याः नितंबाः किमुत भूधराणां किमुत स्मरस्मेरविलासिनीनामित्यादौ
कथमवनिपदर्पाद्यन्निशातासिधारादलनगलितमूर्ध्नां विद्विषां स्वीकृता श्रीः। ननु तव निहितारण्य
सौ किं न नीतास्त्रिदिवमपगतांगैर्वल्लभा कीर्त्तिरेभिः। इत्यादौ च स्वरूपभेदः प्रथमे हि वाच्यो निषेध
रूपो व्यंग्यस्तु विधिरूपः। द्वितीये वाच्यः संशयरूपः प्रतीयमानस्तु शांतेष्वंगनावेति वाक्करितरुचि
तैककोटिनिश्चयः तृतीयो वाच्यो निंदारूपः। प्रतीयमानः स्तुतिरूपः कालभेदस्तु सर्वत्र एवं हि

४९

वाच्यः प्रतीयते पश्चात्तु व्यंग्य इति वाच्यस्य शब्दमात्रमाश्रयः। प्रतीयमानस्य तु पदशब्दैकदेशोस्तु तद्वाक्या
दितदर्थवर्णसंघटनाद्यस्याश्रयभेदः वाच्यस्य व्याकरणकोशादिमात्रेणावगमः प्रतीयमानस्य तु प्रतिभाने
र्मल्येनाप्यधिकेनेति ज्ञापकभेदः। वाच्येन व्युत्पन्नमात्रस्य प्रतीतिमात्रं। अन्येन तु विदग्धपदवाच्यस्य सहृदयस्य
चमत्कृतिरिति कार्यभेदः। गतोस्तमर्क इत्यादौ दर्शितनये वाच्यः एकः प्रतीयमानस्त्वनंतोऽतिसंख्याभेदः कस्स
वएण होइ रोसो दट्ठूण पियाइ सव्वणं अहरं सभमर उप्पल घाइणि वारिअवामे सहसु एह्णि। इत्यादौ वाच्यार्थ
स्य संबोध्यासखी विषयः। तत्राहि वाच्योऽर्थः श्रोतर्य्येवतिष्ठते प्रतीयमानस्य तु भ्रमरेणास्याधरः खंडितो न
तूपप तिनेति। तत्कांतः मम्मैवं वैदग्ध्यमित्यस्य प्रतिवेशिनी इदं मया समाहितं पुनरेवं त्वया न विधेयमित्य
स्योपपति एव सपत्न्यादिविषयोपीति विषयस्य भेदः एवं स्वरूपादिभेदादवश्यमंगीकर्त्तव्यो वाच्यव्यंग्ययो
र्भेदः किंच वाचकव्यंजकयोरपि वैधर्म्यादिदो वक्तव्यः यतो वाचकस्य संकेतितार्थापेक्षा संकेतितं एव ह्यर्थे
ऽभिधा प्रवर्त्तते। न त्वेवं व्यंजकं अन्यत्रापि व्यंजनया प्रत्ययजननात्। यच्चोक्तं। तात्पर्यविषये शब्दः प्रमा
णमिति। तदितोप्यनुपपन्नं। यतो व्यंग्यस्य वाच्यताभ्युपगमेपि नानार्थन्यायेन तात्पर्यादेव नियमो वाच्यः।
अन्यथा सर्वत्र सर्वस्य प्रतीतिप्रसंगात्। तथा च पत्रवाणीरनिकुंजेत्यादौ व्यंग्यप्रतीतावपि वाच्य एव चारुत्वविश्रा
मः तत्र तात्पर्यविषयो व्यंग्योऽर्थः कथं प्रतीयते यत्र शब्द इत्युक्तमेनेतुच्छतरं। एतेन तात्पर्यमेव व्यंग्य
प्रतीतौ व्यापार इत्यपि निरस्तं। तस्मात्तात्पर्यमभिधावान्प्रतीयमानेऽर्थे व्यापारः ननु स्तुत्वलक्षणा नहि वा
च्यवत्स्तुत्योपि वस्तुस्थितौ विशेषव्यापे शोहृतुवी यतारामोस्मि सवसे इत्यत्र रामपदेन सर्वदुःखभाजनत्वं

५०
का॰प्र॰
50

प्रत्याख्यानरुचेः कृतं समुचितं क्रूरेण ते रक्षसा सोढं तच्च तथा त्वया कुलजनो धत्ते यथोच्चैः शिरः । व्यर्थं संप्रति बि-
भ्रता धनुरिदं त्वद्व्यापदां साक्षिणा रामेण प्रि[redacted]यजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम् इत्यत्र कातरत्वं । १ । रामो-
सौ भुवनेषु विक्रमगुणैरित्यत्र खरदूषणादिहंतृत्वं लक्ष्यते ऽतो रामपदलक्ष्य एवानेको भवति । अर्थान्तरसं-
क्रमितवाच्यादिविशेषव्यपदेशहेतुश्च भवति । एवमन्यत्रापि स्यात् । तदुक्तं । भाक्तमाहुस्तमन्ये इति । लक्षणीय-
विशेषावगमश्च प्रकरणादिसापेक्षेण वाक्यार्थेन स्यात्ततो नास्त्यतिरिक्तः प्रतीयमानः मैवं लक्षणीयस्य नाभावे पि
हि नानार्थसैंधवादिपदाभिधेयस्येव नियतत्वमेव न रस्य नियतसंबंधो मुख्येनार्थेन लक्षयितुं शक्यते । प्र-
तीयमानस्य प्रकरणादिवशेन नियतसंबंधोऽनियतसंबंधः संबद्धसंबंधश्चेति तत्स्वरूपं सोदाहरणमग्रे दर्श-
यिष्यते किंच अत्राएस्यणिनज्ञ इत्यादौ विवक्षितान्यपरवाच्ये कथं लक्षणा मुख्यार्थबाधा[redacted]भावात् ननु त-
त्रापि तात्पर्याधीनान्वयानुपपत्तिः छात्रिणो यान्तीत्यादाविति चेन्न लक्षणायाः प्रयोजननियमात् तस्य च व्यापा-
रांतरासम्यत्वात् । तदर्थं व्यंजनास्वीकारे किं प्रथमतोपि लक्षणया । यथा निरूढलक्षणायामिवान्यत्राप्यस्तु प्रयो-
जनानपेक्षेति चेन्न । यथा हि । संकेतग्रहसापेक्षाभिधा तथा मुख्यार्थबाधतद्योगरूढिप्रयोजनान्यतरस्य मुख्या-
र्थसंकेतग्रहस्य च सापेक्षा लक्षणा तत्कथं रूढेः प्रयोजनस्य चाभावे भवेत् । संकेतग्रहसापेक्षा ऽतएवाभिधा ध्य
[redacted]भूतासेयाहुः । किंच लक्षणाव्यंजनयोरभेदः लक्षणामुपजीव्यत व्यापारात् । नापि लक्षणानुगतमेव ध्व-
ननमिति ध्वनेस्तल्लक्षणमिति वाच्यं अभिधोपजीवनेनापि भावात् । अथ लक्षणाभिधोभयानुसार्येव वर्ण-
मात्रानुसारेणापि हि रसपतेरसादिव्यंजना । न च वर्णभावे ऽभिधा लक्षणा वानापि ... सार्थ्येव किंसंबंधेन नर्त

तीनेत्रत्रिभागावलोकनादिगतत्वेनापि प्रसिद्धेः तस्मादभिधा। लक्षणा तासर्ध्याविलक्षणस्तुरीयो ध्वनन
व्यंजनाद्योतनप्रकाशनादिपर्यायो व्यापारोऽनपह्नवनीय एवतत्र। यत्ता रत्यंणिमजुडंइत्यादौ व्यंग्ययोर्नियत
संबंधः कस्सवणं होइ रोसइत्यादौ अनियतसंबंधः नियतसंबंधत्वेस्ववाच्यव्यंग्यप्रतीत्योरेकविषयतात्मकत्वप्र
थमेतस्य भावः। प्राथिकरूपैकविषयत्वात् द्वितीये तु तदभावः सखीतत्कांतादि विषयभेदादिति केचित् तत्र
सम्यगाभाति। लक्ष्यस्य नियतसंबंधत्वं वाच्यं न चोक्तं तथा भाति। अन्ये तु प्रथमे विषयामेवसत्यता प्रतीतिर्द्वितो
ये तु कांतस्यैव सत्यतया अन्येषां त्वसत्यतया इति नियतानियतसंबंधत्वमित्याहुः तदपि न मनोरमं। यत एवं वाच्य
प्रतीतेरेवसत्यत्वासत्यत्वप्रतीतिविषयत्वरूपं वैलक्षण्यमात्रमुच्यते न तु व्यंग्यप्रतीतेस्तस्मान्नियतसंबंधत्व
मित्याहुः। तेन वाक्येन सह व्याप्यत्वरूपसंबंधनियमप्रतिपत्त्यमलसरूपामः संबंधसंबंधो यथा विवरीअरए
लच्छीबुम्हं णाहिकमलटुं हरिणोदाहिणणअणं रसाउलानतिठक्केइ अत्र हरिपदेन दक्षिणनयनस्य स
र्यात्मत्वं तन्निमीलनेन सूर्यास्तसमयस्तेन पद्मसंकोचः ततो ब्रह्मणः स्थगनं तस्मिन्सति गोपनीयांगस्या
दर्शनेन निर्यंत्रणं निधुवनं विलसितमिति संबंधसंबंधाभिद्योत्यंते। वेदांतिनः पुनः क्रियाकारकादिप्रपंचा
रोपणशब्दानां प्रवृत्तिर्धर्मधर्मिभावत्र प्रपंचगोचरो वा स्यात् ब्रह्मगोचरो वा नाद्यः प्रपंचस्य बाध्यत्वात् नो
त्यः ब्रह्मणो धर्मशून्यत्वात् अतः पदपदार्थविभागमंतरेणैव सत्यं ज्ञानमित्यादिवाक्यमखंडमेवाखंडब्र
ह्मवाचकमित्याचक्षते अत एव तन्मतानुसारेण प्रतीयमानेऽपि वाक्यस्य शक्तिरेव त्यपि न वाच्यं यतो व्यवहा
रमार्गे तैरपि पदपदार्थकल्पना [illegible] वाक्ये [illegible] यदि च पदपदार्थक

५१ का॰ प्र॰ 51 ल्पनाः विद्यायामविद्यायामपि नांगीक्रियते कुतस्तर्हि वस्तुसन्नवस्तुसन्न विभागं वाक्यार्थ एव वाक्यस्य संकेतग्रहमाश्रियेतेति चेन्न वा
क्यार्थस्यापूर्वत्वेनानंत्याच्च । तत्र संकेतग्रहस्याशक्यत्वात् अविद्यामार्गतिरस्कारे च कथमखंडयोरपि वाच्यवाचकभा
वः पारमार्थिकभेदाभावात् तस्मात्तन्मते पि विधाद्यर्थ्य एव महिमभट्टास्तु न तावदसंबद्धादेव वाच्यात् प्रती
यते सर्वस्मात्सर्वोपलब्धिप्रसंगात् संबंधाच्च व्यंग्यव्यंजकभावो भवन्नानियताद्भवतीति प्रतिबद्धरूपादेव भवती
त्युपेयं । प्रतिबद्धोप्यर्थो न स्वाधिकरणत्वेनाज्ञातो व्यंग्यं प्रतिपादयति सर्वत्र तत्प्रतीतिप्रसंगात् एवं च व्यंग्यव्यंजकभावो क
ऽनुमेयानुमापकभाव एव पर्यवसन्नो यतो व्याप्तत्वेन पक्षधर्मत्वनिश्चितत्वेन च सपक्षसत्त्वविपक्षासत्त्वपक्षसत्त्वलक्ष
णरूपत्रयवतो लिंगाल्लिंगिज्ञानमेवानुमानं तदेतदुक्तमनुमानं यत्तद्रूपं प्रतितेनानुमानेनानुमितसारूप्येतेनत्व
तिक्रियाव्यक्तेरिति हि तस्यार्थः एवमनुमानादेव व्यंग्यप्रतीतिः । तथा हि ॥ भम धम्मिअ वीसत्थो सो सुणओ अज्ज मा
रिओ तेण गोलाणइकच्छकुडंगवासिणा दरिअसीहेण । संकेतनिकेतनीभूतं गोदावरीनिकुंजं प्रच्छादयन्त्या व्यादिह
तोः कदाचित्संचरतो धार्मिकस्य तन्निवारणाय विनयवत्येयमुक्तिः तत्र निकुंजवासिसिंहकृतया श्वनिवृत्त्या
गृहे भ्रमणविधिर्वाच्यः स एव निकुंजभ्रमणायोग्यतानुमितये वप्रभवति । यद्भीरुभ्रमणं तत्तद्भयकारणनिवृ
त्युपलब्धिपूर्वकं निकुंजे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धौ पर्यवसानात् । भ्रमणस्य व्यापिका भय
कारणाभावोपलब्धिः प्रतीता तद्विरुद्धं च भयकारणं तदुपलब्धेः । यथा नात्र तुषारस्पर्शो वह्नेः । अनुमानं च
एवं । गोदावरीनिकुंजं च भीरुभ्रमणायोग्यं सिंहवत्त्वादिति । अत्रोच्यते । भीरोर्वीरस्य च भावस्य भ्रमणायोग्य [redacted]
[redacted] त्वमत्र साध्यं वीरस्य भावस्य वा विशेषो वा स्यादित्येनं तत्सामान्यस्यैव वा । आद्ये व्यभिचारः प्रभोर्गुरोर्वा निदे
शेन प्रियानुरागेण च निषिद्धमाद्दिप्रायस्य वा ताद्दशस्यापि तत्र भ्रमणदर्शनात् । एतावता अन्यो पि मध्यमेन तु विरो ५१ रामं॰

धः स्पर्शादिशंकया अपौरुषेयतया वाक्यनो विभ्रमतो विप्रलंभाद्यादिकुतूहलेन सिंहवद्देशे वीरस्य भ्रमणात् । किंच पदे
सिंहसद्भावो न मानांतरेणावधारितः किंतु पुंश्चलीवाक्यादवधारितः न च तद्वचनं निश्चायकं येन समं संबंधा
नियमादित्य निश्चयरूपा सिद्धिः एवं निःशेषच्युतेत्यादौ चंदनच्यवनादीनामुपभोगव्यंजकतयोपात्तानां तिरता नि
तद्व्याप्यानिकारणांतरतोपि संभवात् अतो वाव्यस्नानकार्यत्वेनोपात्तानि अनैकांतिकात्कथमनुमानं स्यात्
व्यक्तिरपि कथं तैरिति चेत् अधमपदसाहित्यादिति ब्रूमः अस्माकमपि तत्साहित्येनानैकांतिकता व्यतिरेक इति
चेत् भवेदप्येवं यद्यधमत्वं प्रमाणादवधारितं भवेत् । न त्वेवमस्ति । व्यक्तिरपि कथं तादृशात् भवेदिति चेत् धिङ्
मूर्ख व्यंजनायां न व्याप्तेर्नापि पक्षधर्मतायाः निर्धारणमंगं किंतु संभावितादप्येवंविधादेवंविधोर्थः प्रतीय
ते इति स्फुटी भव ॥ ॥ इति श्रीमहामहोपाध्यायश्रीगोविंदकृते काव्यप्रदीपे पंचम उल्लासः ॥ ५ ॥ ॥
एवं गुणीभूतव्यंग्ये निर्णीते चित्रभेदं दर्शयितुमवसरः तत्र यद्यपि प्राक् चित्रार्थचित्ररूपभेदद्वयं प्रथमो [redacted] ल्लास
एव दर्शितं तत्प्रभेदाश्चालंकारप्रभेदप्रदर्शनेनैव प्रदर्शिता भविष्यंतीति न किंचिदस्तित्र प्रदर्शनीयम् । तथा
पि प्रदर्शितभेदद्वयमेतावदनुपपन्नं । शब्दार्थालंकारयोरन्योन्यनैरपेक्ष्येणानुपलंभात् । उपलंभे वा उभय
सद्भावे तृतीयभेदप्रसंगादिति तदुपपादयति । शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतं । गुणप्राधान्यतस्तत्र
स्थितिः शब्दार्थचित्रयोः ।१। शब्दार्थालंकारयोरेकैकमात्रावस्थानपुरस्कारेण न विभागः किंतु प्राधा
न्यपुरस्कारेण तथा च नाविभागानुपपत्तिरिति भावः ननु तथापि विभागोऽनुपपन्न एव यतः क्वचित् [illegible] शब्दालं
कारमात्रं क्वचिच्चार्थालंकारमात्रं उभयोर्वा चित्रे तत्कस्य मतेन [illegible] इति चेत्सत्यमेव केचिदुभयांगीकार ।

५२
का॰प्र॰
52

रिणः ।तथा चोक्तं। रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः। न कांतमपि निर्भूषं विभाति वनिताननम्॥१॥ रूपकादिम
लंकारं वाह्यमाचक्षते परे। सुपां तिङां च व्युत्पत्तिं वाचां वांछंत्यलंकृतिं॥२॥ तदेतदाहुः॥ सौशब्द्यं नार्थव्युत्पत्तिरीदृशी
शब्दाभिधेयालंकारभेदादिष्टं द्वयं तु नः इति। अस्यार्थः। अर्थस्यैव विभावादिरूपस्यैव रसव्यंजकत्वात्तन्निष्ठो रूपकादिरेवालं
कारः। कैश्चिदुक्तः। केचित्तु काव्यस्यालंकारो वाच्यः। काव्यं च कविकर्मशब्द एवेति तदाश्रितानां सुपां तिङां च वोशि
ष्ठाव्युत्पत्तिरलंकारः। रूपकादिस्त्वर्थाश्रितो नालंकारो वाह्यः अलंकारप्रयोगस्तु तत्र गौण एवेति वांछंति। व्रसति
रेव कथं नार्थालंकार इति अत आह। तदेतदाहुरित्यादि। शब्दाभिधेयेति। शब्दवदर्थस्यापि काव्यत्वसंदर्भत्वाप्यत्व
मर्थस्यैव शब्दस्यापि रसप्रतीत्युपयोगित्वमत उभयाश्रितो उभयरूपोलंकार इति॥ तत्र शब्दचित्रं यथा। प्रथम
मरुणच्छायस्तावत्ततः कनकप्रभस्तदनु विरहोत्ताम्यत्तन्वीकपोलतलप्रभः। उदयति ततो ध्वांतध्वंसक्षमः क्षणदा
मुखे सरसबिसिनीकंदच्छेदच्छविर्मृगलांछनः॥ अत्रार्थालंकार उपमा गुणीभूता। शब्दालंकारस्त्वनुप्रासः प्रधानं
।आसामासिकवृत्तेरेव संरंभात् प्राधान्यस्य कविविवक्षामात्रनिबंधनत्वात्। अर्थचित्रं यथा॥ ते दृष्टिमात्रपतिता
अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलकाः खलाश्च। नीचाः सदैव विलासमलीकलग्ना ये कालतां कुटिलतामि
व न त्यजंति। अत्र शब्दालंकारोनुप्रासः सगुणीभूतोऽर्थालंकारस्तु समुच्चयः प्रधानं आरंभादासमाप्ति निर्वाहणात्
यथा चात्र किंचिच्छायापसत्वेप्यधमकाव्यत्वं तथोक्तं प्रथमोल्लास एव एषां भेदा अलंकारभेदाद्भवंतीत्यलंकारनिर्णये नि
वते निर्णेष्यंत इति॥ ॥इति श्रीमहोपाध्यायश्रीगोविंदकृते काव्यप्रदीपे षष्ठ उल्लासः॥६॥ ॥एवं ध्वनिनिर्णीतः काव्येसप्र
भेदेन निरूपिते शास्त्रावसरतया दोषाभावादीनि लक्षणस्यानि विशेषणानि विवेचनीयानि तत्र च दोषाभावप्रधाने सति
दोषे गुणादेरप्यकिंचित्करत्वात् ।यदाह॥ स्याद्वपुः सुंदरमपि श्वित्रेणैकेन दुर्भगमिति सति तु दोषाभावे गुणादिकं वि ५२ मा॰

नापि किंचिद्धादसंभवात्। अपदोषतैव विगुणस्य गुण इति न्यायात् अतः प्रथमं तस्मिन्निरूपणीये अभावस्य स्वरूपतो निरूप-
णानर्हतया प्रतियोगिनो रूपणाधीननिरूपणीयत्वाद्यापरिचये तज्ज्ञानासंभवाच्च दोषा निरूपणीयाः। नन्वसामान्ये अविज्ञा-
ते विशेषो जिज्ञासितेति तत्सामान्यलक्षणमाह। मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः। उभयोपयोगिनः स्युः श-
ब्दाद्यास्तेन तेष्वपि सः। मुख्यस्यार्थस्य हतिर्यस्मादिति व्यधिकरणत्वेपि गमकत्वाद्बहुव्रीहिः। करणसाधनो हतिशब्द इत्ये-
के। मुख्यत्वमर्थस्य न शब्दस्वलक्षणं। येनार्थासंगतिः स्यात्किंत्वन्यदित्याह रसश्च मुख्य इति रसस्यत इति व्युत्पत्त्या रस-
शब्देन भावादिरप्युपसंगृह्यते। नन्वेवं नीरसेषु न कश्चिद्दोषः स्यात् विभावा[illegible]द्यभावादित्यत आह। तदाश्रयाद्वाच्य
इति आश्रयणमाश्रयः। तथा च तेन रसेनाश्रयणादुपकारित्वेनापेक्षणाद्वाच्योपि मुख्य इत्यर्थः। न चैवं मुख्यशब्दार्थ-
स्य नानात्वेनाननुगमः। काव्ये प्राधान्येनोद्देश्यप्रतीतिविषयत्वेनानुगमात्। तदेवं रसवति सर्वे एव दोषा नीरसे तु अवि-
वितचमत्कारिवाक्यार्थप्रतीतिविघातका एव हेया इति मंतव्यः। नन्वेवं तयोरेव दोषाधारत्वमुचितं न तु शब्दादीनामि-
त्यत आह। उभयोपयोगिन इत्यादि। अत्र शब्दपदं प्रतिपादनात्मकशब्दनो व्यापारवतोः पदवाक्ययोर्वर्तते तेनाद्युप-
दाद्वर्णरचने संगृहीते इति प्रकाशस्वरसः। न च तत्र बीज्याभावः अन्यथा वर्णस्यापि शब्दपदेनैव प्राप्तेः शब्दाद्या इति
बहुवचनासंगतेः स्यादेतत् हतिर्विनाशः न च दोषेण रसो नाश्यते तस्मादलक्षणमेवैतत्। मैवं हतिशब्दस्यापक-
र्षवाचित्वात् नन्वेवं रसानुत्पत्तिप्रयोजके अव्याप्तिः अथानुत्पत्तिरेव हतिशब्दार्थः। तर्हि यत्र रस उत्पद्यते एवाप-
रं त्वपकृष्यते तत्राव्याप्तिः तदेतल्लक्षणमतिदरिद्रदंपत्योः सुरतरनिशि अवगुण्ठनीयवसनमिवैकेनापकृष्यमा-
णमपरं परिहरति किंचानुरूपस्य मुख्यार्थस्यानुत्पत्तिरपकर्षो वा न दोषाधीन इति अत्र ब्रूमः उद्देश्यप्रतीति

विघातलक्षणोपकर्षहेतित्वमाश्चार्यः। उद्देश्यापचप्रतीतिः रसवत्यवलंबिता अनपकृष्टत्वस्य विषयाच्च नीरसे तु अविलंबिता
चमत्कारिणी वार्थविषया। तथा च तादृशप्रतीतिविघातकत्वं सर्वेषामविशिष्टं। यतो दुष्टेषु कस्यचिद्रसस्याप्रतीतिरेव क
स्यचित्प्रतीयमानस्याप्यपकर्षः कस्यचित्तु विलंबः एवं नीरसे कस्यचिदर्थस्यानुभवमात्रस्याप्रतीतिरेव कस्यचिद्विलंबेन प्रतीतिः
कस्यचिदचमत्कारितेत्यनुभवसिद्धमित्युद्देश्यप्रतीत्यनुत्पादो व्यक्त एव तद्विघातकता च कस्यचित्साक्षात् यथा रस
दोषाणां कस्यचित्संस्परया यथा श्रवणार्थदोषाणां तेषु प्रकृतस्याविदर्थोपस्थितेरभावात् यथा असमर्थत्वादेः कस्य
चित्तद्विलंबात्। यथा निहतार्थत्वादेः कस्यचिद्वाक्यार्थबोधाभावात् यथा च्युतसंस्कृत्यादेः कस्यचित्तद्विलंबात्
यथा क्लिष्टत्वादेः कस्यचित्सहृदयवैमुख्यव्यग्रतायापादनेन यथा निरर्थकत्वादेः कस्यचिद्विरोध्युपस्थापने
न विपरीतोपस्थापनेन वा यथा विरुद्धमतिकृत्त्वादेरित्याद्यूहनीयं। विघातकत्वं च कस्यचित् ज्ञातस्यप
याव्याहतत्वादेः कस्यचित्तु स्वरूपस्य सत एव यथा निहतार्थत्वादेः स चायं द्विविधो नित्यश्चानित्यश्च तत्रानुक
रणादन्येन प्रकारेण समाधातुमशक्यो नित्यः यथा च्युतसंस्कृत्यादि अन्यादृशस्त्वनित्यः यथा अप्रयुक्तादिः
अथ विशेषलक्षणानि वक्तव्यानि तत्र द्विविधोप्ययं त्रिविधः शब्ददोषोऽर्थदोषो रसदोषश्चेति। तत्र शब्दार्थरसानां
यथा पूर्वमुपस्थितिः प्राथमिकीति तत्क्रमेणैव दोषभेदा निरूपणीया इति शब्ददोषाणां प्राथम्यं। शब्दस्तु विधा पदं त
देकदेशो वा वाक्यं च तदाश्रितः शब्ददोषोपि त्रिविधः तत्र पदानां वाक्यघटकत्वेन प्राथम्यात् प्रथमं तद्दोषनिरूपणमि
ति परमार्थः तेनेदं निरूप्यते। एवं पदैकदेशस्य पदापेक्षयापि प्राथम्यात्तद्दोषनिरूपणस्यैव प्राथम्यमर्हतीति। अत्र भास्करः।
सत्यमुच्यते परं तु पददोषेष्वेव यथासंभवं केचित्सैकदेशदोषा इति समादध्ये। तत्रातिमनोरमं। अस्त्वेवं तथापि पदैकदेश
दोषाणां प्रथमाभिधानापादने किमन्तरमिति। वयं त्वालोचयामः उपेक्ष्यतां तावत् प्राथम्यादिविचारणं प्रतिदेशासु पदे

शानंतरमेव नच पदैकदेशदोषोपदेशो ऽतिदेशेनैव तल्लाभे लाघवात् नच पदैकदेश एवास्तूपदेशः पदैकदेशाव
तीनामपि केषांचित् पदव्याप्तित्वेन तद्दर्थं पदे ऽप्युपदेशस्यावश्यकत्वादिति। पददोषविशेषलक्षणमाह। दुष्टं पदं श्रुतिकटु
च्युतसंस्कृत्यप्रयुक्तमसमर्थं निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्ली[redacted]लं संदिग्धमप्रतीतं ग्राम्यं नेयार्थम
थ[redacted] भवेत् क्लिष्टं अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव। दुष्टपदमिति प्रत्येकमभिसंबध्यते। ननु श्रुतिकटुप्रभृ
तिशब्दानां लक्षणपरत्वे विभागपरत्वाभावाल्लक्ष्यानुपस्थितौ लक्ष्यं लक्षणवाक्यत्वानिर्वाह इत्युच्यते रूढियोगाभ्यामभय
थोपस्थितौ लक्ष्यलक्षणयोरुभयोरपि प्रत्ययः। यथा घ्राणरसनचक्षुस्त्वक्श्रोत्राणींद्रियाणि भूतेभ्य इतींद्रियलक्षणस्त्व
गौतमीये। प्रथैषां लक्षणवाक्यत्वे त्रिधाश्लीलमित्यत्र त्रिधेति निरर्थकं तस्य विभागमात्रार्थत्वेन लक्षणोनुपयोगादिति चेन्न
अश्लीलशब्दस्य व्रीडादिव्यंजकत[redacted]त्रितयसाधारणैकावयवशक्तिविरहेण नानार्थतया लक्षणत्रयार्थत्वमित्यस्य तद
र्थत्वात् तत्र श्रुतिकटुत्वं यच्चपि श्रुत्युद्वेजकत्वं तच्च पुरुषभेदेनानियतं तथापि तज्जनकतावच्छेदकरूपवत्त्वं विवक्षितं तत
च्च परुषवर्णत्वं टवर्गादिसंयुक्तरेफलत्वरूपत्वं तच्च दुर्वचकत्वं॥ उदाहरणं॥ अनंगमंगलगृहापांगभंगितरंगितैः। तन्वंग्या
ऽलिंगितः कंठे कार्त्तार्थ्यं गंगपति मेव तद्द्वेजयतीति चेत्। तर्किताघ्राणत्वेन ज्ञानं न तथा उ तस्य च रूपस्य देवनाघः रसवि
शेषव्यंजकत्वात्त्वा नेपि शाष्टिंकता दृष्ट पदश्रवणेनो द्वेगाभावप्रसंगात् नचेष्टापत्तिरनुभवविरोधात्। अंत्ये तु स
त्यादयः प्रमाणं नहुविदितविशेषानपि तत्रैव तद्द्वेजयति नान्यत्रेति प्रमाणमस्ति किंचैववैयाकरणादौ वक्तरि
किंनिबंधनो दोषत्वाभावः स्यात् अत्रोच्यते रच्यायत्ते शब्दप्रयोगे करणीपतापश्चाद्प्रयोगेण श्रोतुरुद्वेगोत्पादक
बीयेति मण्वतद्बीज अतएव प्रतिकूलवर्णादस्य भेदस्तत्करणीपतापाहेतुत्वात् अतएव चानुकरणे वैयाकरणादौ व
क्तरि च श्रोतरि वा रौद्रादौ रसे व्यंग्ये नीरसे वा नायं [illegible] दोषत्वाभावः। [illegible] नुकरणीयतयास्यापत्याभावः

द्वितीये च तत्स्वभावावगमेनोद्वेगाभावात् तृतीये च श्रोतुस्तेनानुद्वेगात्। चतुर्थे तदनुगुणत्वेनोद्वेगाहेतुत्वात्।
पंचमे मुख्यार्थहतेरभावात् एवमर्थौचित्यप्रकरणादिवशेनाप्यनुद्वेजकतया दोषत्वाभाव उपपद्यते च्युतसं
स्कृतिः च्युता स्खलिता संस्कृतिः संस्करणं व्याकरणानुगमो यत्र यद्भाषासंस्कारव्याकरणलक्षणविरुद्ध
यत्तद्भाषायां च्युतसंस्कृतीत्यर्थः देश्यं तु न लक्षणविरुद्धं किंतु तदविषयः। संज्ञाशब्दानां बहुलं क्वचनेन संस्कृ
तत्वान्नतत्रातिव्याप्तिः। यथा एतन्मदविपक्वतिंदुकफलश्यामोदरापांडुरप्रांत हंत पुलिंद सुंदरकरस्पर्शक्ष
मं लक्ष्यते तल्लीयति शबरयुवति जनरंकुलं कुभाभयाभ्यर्थनादीनत्वा मनुना घोते कुचयुगं पत्रावृत्तमारूया॥ अत्र
मन्त्र लक्ष्यते तल्लीयति शब्रेकुंजरकुलकुंभाभयाभ्यर्थनादीनत्वा मनुनाथते कुचयुगं पत्रावृत्तमारूया॥
नाथते इति याचते इत्यर्थे च्युतसंस्कृतिसामान्यतास्त्विवादि सूत्रेणाप्रात्पस्यात्मनेपदस्य नियामकेनाशिषि नाथ इ
तिसूत्रेणाशिषितन्निषेधात् तस्मान्नाथति स्तनयुगमिति पठनीयं॥ ननु नाथत इतिस्य रूपं संस्कृतमेव तथा
चार्थविशेषेणतथेति वक्तव्यं। एवं चार्थदोषत्वं प्राप्तमिति मैवं यत्र शब्दपरिवर्तनेपि दोषोऽनुवर्तते तस्यार्थदोषत्वं
[redacted] यस्तु तथा सति निवर्तते तस्य शब्ददोषत्वमिति विभागात् अत्रार्थाप्रतीतिर्दूषकताबीजमिति नित्यदोषत्वं प्रनक
रणे त्वर्थपरत्वाभावाद्दोषत्वाभावः अप्रयुक्तं तथानुशासनसिद्धमपि कविभिर्यन्न प्रयुक्तं यथा यथायं दारुणाचारः
सर्वदैव विभाव्यते तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोथवा॥ अत्र दैवतानिंदुशिवत्यनेनाम्नातो घिशब्दः पुल्लिंगो दे
वतशब्दः कविभिर्न क्वापि प्रयुक्तः अत्र किं दूषकताबीजं न तावदप्रतीतिर्विरहवत्तात्सत्वात् शक्तिस्फूर्ति विरहमूल
पिनास्ति शब्दानुशासनेन तस्य तोऽप्रतिबंधकाभावादितिचेत् पदार्थोपस्थितिविलंबवस्तु बीजं अत एव श्ले
षयमकादावदोषत्वं उद्भूतचमत्कारसंपत्त्याप्रतीत्याविलंबस्य तत्रानुद्वेजकत्वात् वस्तुतस्तु ताद्दशाकविसम
यविलंघनप्रयोजनानुसंधानव्यग्रतया चमत्कारविरोधितैव दूषकताबीजं अत एवानुकरणे दोषत्वाभावः

यमकादावप्यदोषत्वं अन्यत्राप्रयुज्यमानस्यापि तदर्थकविभिः प्रयोगस्य दर्शनेन व्यग्रताभावादिति प्रती
तिविलंबः। असमर्थमित्यल्पार्थेन नञ् तेन पदार्थपरिपठितमपि प्रकृते तस्य तेन विवक्षितार्थसमर्पकत्वरहितमित्यर्थः।
समर्थस्यैवासामर्थ्यं विरुद्धमिति चेन्न। उपसंदानोपजीवित्वात् सामर्थ्यस्य यथा। हनधातोः पद्धति जघन जंघा
दिषु पदादि पदोपसंदानेन मार्गाद्यर्थोपसंदानेन वा गतौ सामर्थ्यं तत्पुनरविशिष्टस्य। यथा तीर्थांतरेषु स्नाने
न समुपार्जितसत्क्रियः। सुरस्रोतस्विनीमेष हंति संप्रति सादरात्। अस्यार्थानुपस्थितिर्दूषकताबीजमिति नियता
निहतार्थं निहतः प्रसिद्धेनार्थेनाप्रसिद्धतया व्यवहितो विवक्षितोर्थो यस्य तत् द्व्यर्थकवि प्रयोगान्नाप्रयुक्तसंकरः
॥उदाहरणं॥ यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन मुग्धा साध्वसतरलाविलोक्य परिचुंबिता सहसा।
अत्र शोणितपदं अस्य रुधिरे प्रसिद्धिस्तु ज्वलीकृतत्वरूपे विवक्षिता दूषकताबीजं प्रसिद्धस्यैव प्रागुपस्थित्या वि
वक्षितस्य विलंबोपस्थितिः अजोयमकादावदोषत्वं तत्रोपस्थितिविलंबस्यापि सहृदयसंमतत्वेनाविलंबा
उद्देश्यत्वात् अनुचितार्थं अनुचितो विवक्षितार्थतिरस्कारकोर्थो यस्य तत्। यथा। तपस्विभिर्या सुचिरेण
लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या। प्रयांति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः। अत्र शौ
र्ये प्रतिपाद्ये पदांतरानपेक्ष्यमेव पशुपदं कातरतामभिव्यनक्ति। तद्दोषस्तस्यादर्शनात्। विरुद्धमतिकृत् पदांत
रसापेक्ष्यं तच्चेति तस्मात् द्रुदः दूषकताबीजं च विवक्षिततिरस्कारकार्थोपस्थितिः अतोस्य नित्यदोषत्वं। निर
र्थकं अविवक्षितार्थकं वृत्तनिर्वाहमात्रप्रयोजनकमिति यावत्। अत एव वाक्यालंकाररूतं यमकादिति

र्वीहृतं चरवल्वादिपदमदुष्टं। तत्र निपातरूपं वादिपदं वहुवचनादि च। उदाहरणं। उत्फुल्लकमलकेसरपरागगौरद्यु
क॰प्र॰ तेममहिमौदि। प्रभिवांछितं प्रसिध्यतु भगवति युष्मत्प्रसादेन। १ अत्र हि पदं अर्थस्य विवक्षितत्वात् दूषकतावीजं त
५५ स्याश्चतता। ताद्दिनतावदर्थानुपस्थितिः। पदांतरैरेव याकदभिधेयोपस्थापनात् नचैवमवाचकादौ तत्र तदभिधेय
55 स्यवाच्यार्थघटकस्य पदांतरैरनुपस्थापनात्। नापि प्रतिकूलवर्णवद्रसविरोधिता चादीनां सार्थकत्वस्येतर
सविरोधित्वप्रसंगात् स्वरूपस्य ताद्रूप्यादिति उच्यते निरर्थकं प्रयुंजानस्य वचसि सहृदयानां वैमुख्यं दूषकता
वीजं प्रयोजनानुसंधानव्यग्रता वा। अवाचकं विवक्षितधर्मविशिष्टस्य विवक्षितधर्मिणः क्वापि न वाचकं यत्र
दित्यर्थः अतएवासमर्थाद्भेदस्तस्य क्वचिच्छक्तिस्वीकारात् एतादृशविशिष्टविरहश्च। क्वचिद्धर्मिणि शक्तावपि विवक्षिते
प्रकारे शक्तिविरहात्। क्वचित्प्रकारे शक्तावपि धर्मिणि शक्तिविरहात्। क्वचित्प्रकारधर्मिणोरुभयोरपि शक्त्यभवात्।
तत्राद्यं द्विधा। अपेक्षितयोगमनपेक्षितयोगं। तयोराद्यं यथा। अवंध्यकोपस्य विहंतुरापदां भवंति वश्याः स्वयमेव दे
हिनः। अमर्षशून्येन जनस्य जंतुना न जातहार्देन न विद्विषादरः। १८ अत्र पूर्वार्द्धे दारिद्र्यरूपापद्विघातकतया दा
तृत्वं विवक्षितमिति द्वितीयार्द्धे तद्विपरीत्यपर्यायकं जंतुपदमदातरि प्रयुक्तं। तच्च जायत इति योगमपेक्ष्य तस्य शक्तावपि
न विवक्षितयादातृत्वप्रकारेणास्यावाचकं। अनपेक्षितयोगं यथा। हा धिक् सा किल तामसी शशिमुखी दृष्टा मयायं
त्र सा। तद्विश्लेषकरेण च धकाचितमिदं दग्धं दिनं कल्पितं। किं कुर्मः कुशले सदैव विधुरो धाता न चेत्तत्कथं॥ तादृग्यामव
तीमयो भवति मे नो जीवलोकोऽधुना॥ अत्र दिनपदं प्रकाशमयमित्यर्थे विवक्षितं। तामसीत्यनेन तत्र ध्वस्यतमोम ५५
[redacted] भिधानोपादानात्।
पत्वस्यैवपरीत्या राम॰

तत्र च धर्म्मिणि योगमनपेक्ष्यैव रूढ्यादिना त्वेन शक्तं न पुनः प्रकाशमयत्वेनेत्यवाचकं। द्वितीयं यथा॥ जलं जलधर
हारमयं वर्षतीति वारिदः इदं त्वं हितममपानां कंकु ■ पानेष्वहेषते॥१॥ अत्र जलधरशब्दस्य जलधारकत्वप्रकारेण साम
र्थ्येऽपि न समुद्रे धर्म्मिणि सामर्थ्यं। यद्यपि योगशक्तिस्तत्राप्यस्त्येव तथापि रूढ्या प्रतिबंधनादनस्तित्वकल्पैव। तृतीयं त
पसर्गसंसर्गादर्थांतरगतमन्ययाच। तयोराद्यं यथा॥ जंघाकांडोरुनालो नखकिरणलसत्केसरालीकरालः। प्रत्यग्रा
लक्तकाभाप्रसरकिसलयो मंजुमंजीरभृंगः। भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी। संभूतांभो
जशोभां विदधदभिनवो दंडपादो भवान्याः॥१॥ अत्र विदधातिर्धारणे प्रयुक्तः। न च धारणे धारणत्वे वा समर्थः। द्विसं
सर्गेण करणे नियमितशक्तित्वात्। अंत्यस्तु वाक्यनिष्ठवाचकतायां शाश्वडित्याद्युदाहरिष्यते तदेवं निदूषणेऽनुक्ता
शेषपदसमर्थे धर्मे धर्म्मिणि ■ द्वयोरपि शक्तिविरहः। अवाचके तु धर्म्ममात्रे सः विदधदित्युदाहरणं त्ववाचकप्रकरणमध्ये
समर्थस्यैवेति प्रकल्पितं। तद्वाक्यावाचकत्वोदाहरणानवलोकननिबंधनं संदर्भविरुद्धं चेत्यनादेयं दूषकताबीजं तु
विवक्षितार्थानुपस्थितिरिति नित्य एवायम्। त्रिधाश्लीलमिति। अश्लीरस्यास्तीत्यर्थे सिध्मादित्वाल्लच्प्रत्य
यः कपिलकादित्वाद्रेफस्य लत्वं। तथा चकांत्यभाववदिति पर्यवसन्नकांत्यभावस्यातिप्रसक्त इति व्रीडा ■ जु
गुप्सामंगलव्यक्तिहेतुकस्तद्विशेषो वक्तव्यः। न चैतत्त्रयेऽनतिप्रसक्तमनुगतं रूपमस्तीति व्रीडादिहेतुकांकांतिम
त्त्वं नानार्थेऽपि मश्लील ■ शब्दः इत्यर्थः। तच्च प्रत्येकं त्रिविधं। क्वचिद्विवक्षितस्यैवार्थस्य व्रीडाद्यालंबनत्वात्। क्वचि
दविवक्षितार्थस्यार्थांतरस्य तथात्वात्। क्वचित्ताहशार्थस्य निर्वाहिणो विस्मृतिमात्रहेतुत्वात्। एवं त्रिष्वक्वचित्क
चिदुदाह्रियते। तत्र व्रीडाव्यंजकार्थांतरस्य तथाभावो यथा॥ साधनं सुमहद्यस्य धनशब्दस्य व्यंजनमर्थांतरं जु
गुप्साव्यंजको यथा। भूतार्थस्मृतिमात्रहेतुत्वं यथा॥ लीलातामरसाहतोऽन्यवनितानिःशंकदष्टाधरः। कश्चित्के
यन्नान्यस्य विलोक्यते। तस्य धीशालिनः कोऽन्यः सहेतारालितां भुवं। अत्र सैन्यार्थकस्य = २ त्रुटिः

५६ सरदूषितेद्धमाणद्धवव्यामीत्यनेनेत्रस्थितः। मुग्धाकुड्मलितानेनेनददती वायुं स्थितास्तस्यसा। भ्रांत्या धूर्त्ततयाथवानति
को॰ प्र॰ म्टेतेतेना निशंचुंविता। अत्रवायुशब्दः पानवायुंस्मारयति। नतुतत्पर्यतयावाच्यमुपपद्यते। अमैत्यक्तौ विवक्षितस्ये
56 वार्थस्यतया त्वयया॥ मृदुपवनविभिन्नोमत्प्रियाया विनाशात् घनरुचिरकलापो निस्सत्नोघजातः रतिविगलि
तवधेकेशपाशोसुकेश्याः सतिकुसुमसनाथेकंहरेदेषवर्हः। १ अत्रविनाशशब्दस्य विवक्षित एवार्थेसंगत्तः। एवंवि
धभिन्नभिन्नप्रकारोदाहरणेनप्रत्येकं त्रिः प्रकारकत्वमूहनीयंन्यायसाम्यात्। दूषकताबीजं अनुभवसिद्धरसापक
र्षकताद्दशार्थोपस्थितिः। नीरसेतु चमत्कारापकर्षत्वंतस्या अथवाताद्दशार्थोपस्थित्याश्रोतुर्वैमुख्यंतद्वीजं अतः
शमकथायांदोषत्वाभावः। ताद्दशोपस्थितेः शमपोषकत्वात् भाव्यमंगलादिसूचनेनकामशास्त्रस्थितौक्तनवै
मुख्याभावात्। शिवलिंगभगिनीब्रह्मांडादिशौक्षेतुनतथासंवीतग्राम्यत्वविहितेषु असभ्यार्थानुपस्थितेः। संदि
ग्धंविवक्षिताविवक्षितोभयार्थोपस्थापनानुकूलस्वरूपद्वयसंदेहविषयः। यथा। आलिंगितस्तत्रभवान्संपरा
येजयश्रिया। आशीः परंपरांवंद्यांकर्णेकृत्वाकृपांगुरुः॥१॥ अत्रवंद्यामितिपदं वंदीशब्दे सप्तम्यंतं। वद्याशब्दे द्वितीयां
तंवेतिसंदेहः। प्रथमेहठगृहीतमहिलायांकुर्विविति। द्वितीयेनमस्यामाशीः परंपरामित्यर्थोपपन्नोसाधकवाक्यप्रमा
णाभावात्। दूषकताबीजं। उद्देश्यनिश्चयाभावः अतोयत्रसंदेहएवोद्देश्यस्तत्रयमकचवाच्यादिमहिम्नाप्रकरणा
दिविशेनवानिश्चयस्तत्रवादोषत्वं। अप्रतीतमिति। नत्त्वोत्पार्थतयाशाद्वानुशासनातिरिक्तशास्त्रमात्रप्रसिद्ध
मित्यर्थः। अतएवाप्रयुक्तादिभेदः तस्यान्यत्रापिप्रसिद्धेः। उदाहरणम्॥ सम्यक्ज्ञानमहाज्योतिर्गलिताशयता
जुषः। विधीयमानमप्येतन्नभवेत्कर्मबंधनम्॥१॥ अत्राशयशब्दोमिथ्याज्ञानजन्यवासनार्थः। सचैवयोग ५६ वाम॰

शास्त्र एव प्रसिद्धः। एवं शास्त्रांतरप्रसिद्धमप्यूह्यं दूषकताबीजं। तच्छास्त्रानभिज्ञस्यार्थस्यानुपस्थितिः अतएव यत्र
तच्छास्त्राभिज्ञ एव प्र[redacted]तिपाद्यः। स्वयमेव वायुपरामर्शस्तत्र न दोषत्वं प्रत्युत व्युत्पादितस्य
कष्टं। तया गुणत्वं। ग्राम्यं ग्राम्ये केवले लोके प्रसिद्धं न तु शास्त्रेपि प्रसिद्धस्य कुतस्तस्य चोदाहरणं तेन दर्शितत्वात्॥
तस्मात्समस्तलोकप्रसिद्धं तस्मिन्देशे सर्वलोकैर्यदारव्यया। यद्वस्तु व्यवह्रियते तदित्यर्थः तेन देश्यमपि संगृही
तं। अतएवाग्रे स्वादनयानगल्लादय उदाहरणीयाः कमलमहिषीदध्यादयस्तु प्रत्युदाहर्तव्याः। उदाहरणं॥ शाका
विभावरीकांतसंक्रांतद्युतिते चरवं। तपनीयशिलाशोभा कटिश्च हरते मनः॥१॥ अत्र कटिशब्दः लोकानभि
ज्ञं प्रति तदर्थानुपस्थितिर्दूषकताबीजं। अतिवक्र्जवः वस्तुतस्तु नागरोपनागरौ विहाय ग्राम्यशब्दप्रयोगा
द्वक्तुर्वैदग्ध्यानल्पने श्रोतुर्वैमुख्यं तदेव्याल्लोच्यते अतएव दूषकादावधमे वक्तरि न दोषत्वं तस्य तथै
वौचित्येन वैरस्याभावात् कटिशब्देतु ग्राम्यतप्रयोजकं नाश्लीलत्वमिति न तत्संकरः। नेयार्थं नेयोर्थोय
स्य तत् नेयत्वं निरूढिलक्षणा। काश्चित्सामर्थ्यादभिधाताऽर्थ्यंते चाधुना। काश्चित्काश्चिन्नैव त्वश
क्तितद्युत्यनेन रूढिप्रयोजनाभ्यां विना या लक्षणा निषिद्धा तद्विषयत्वं। यथा॥ शरत्काले समुल्लासिपूर्णि
माशर्वरीप्रियं। करोति ते मुखं तन्वि चपेटापातनातिथिं॥१॥ अत्र चपेटापदं निर्जितत्वे लक्षणया प्रयुक्तं। न च
तत्रास्य रूढिर्वा प्रयोजनं मुखस्य शशाङ्कातिशायित्वकैर्थस्याप्रतीतेः दूषकताबीजं च वक्तृत्व भावेनार्थानुपस्थि
तिरिति नित्योयं दोषः। अयमेव क्लिष्टमित्यादि क्लिष्टादिकं दुष्टपदं समागतमेवेत्यभिसंबंधः। तदयमर्थः क्लि
ष्टत्वादिदोषत्रयं पदांतरसाहित्येनैव संभवतीति तथाच्य यदितयो पदयोः समासः तदैव समासेनैकपद्यात्सद

दोषता। समासे वाक्यदोषत्वमेव। इतरेषां तु समासे ऽसमासे च पददोषत्वं द्वितीयपदैरपेक्षे नैव दुष्टत्वादि
५८ ति। तत्राक्लिष्टं। अर्थप्रतीतौ क्लेशवत् यतो विवक्षितस्यान्वितविशेषस्य प्रागनुपस्थितेर्वा। आद्ये वाक्यप्रतिपत्ति
का॰ प्र॰ विलंबितात् इत्यर्थः। निहतार्थादौ तु पदार्थोपस्थितिरेव विलंबितेति ततो भेदः। द्वितीयं वक्ष्याप्रत्यासत्तेर्वा सामा
57 न्यशब्दात् प्रकरणाद्यभावे विवक्षित विशेषस्य प्रागनुपस्थितेर्वा। आद्ये वाक्यदोषत्वं धम्मिल्लस्येत्यादौ अन्त्ये
तु पददोषत्वमपि। तद्यथा। अत्रिलोचनसंभूतज्योतिरुद्गमभासिभिः। सदृशं शोभतेत्यर्थं भूपाल तव चेष्टि
तं। अत्र। अत्रिलोचनसंभूतेत्यादौ सामान्यतोऽन्वयबोधाविलंबेऽपि अत्रिलोचनसंभूतेत्यादिना चन्द्रादे
र्झगनुपस्थितिः अन्यस्यापि तथाभावात् नियामकस्याभावाच्च। अतः कुमुदेत्यस्यं व्यवधानेनोपस्थितिः
इदमेव कश्चित्रिदृष्टेः समुद्भूतस्योद्योतेनावभासिभिरिति पाठे द्वितीयभेदवाक्यदोषोदाहरणं द्रष्टव्यं दूषकता
वीजं प्रतीतिविलंबः। प्रहेलिकादौ तु तस्येष्टत्वाददोषत्वमत्तोक्त्यादौ तु गुणत्वमपि तदौचित्यात्। अविमृ
ष्टविधेयांशं अविमृष्टः — प्राधान्येन निर्दिष्टो विधेयांशो यत्र तत्प्राधान्येन विधिप्रतीतियोग्यता सा चानुप
सर्जनीभूतत्वे सत्युद्देश्यानंतर्यं। अतोऽन्यत्क्रीरोत्थयमित्यादौ न्यूनमप्युक्तेत्यादौ वा नाव्याप्तिः प्रथमेऽनुक्त
रूपं प्राधान्याभावेन द्वितीयो विधेयस्य प्रसज्यप्रतिषेधस्यानिर्देशेन विशिष्टविरहसत्वात्। उदाहरणं। मूर्द्ध्न्यु
द्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधाराधौतेशांघ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नां। कैलासो
ल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयासः। अत्र न
गरीरक्षणएव यत्प्रयासस्तन्न ... नात् अतएवैवचनानुवादो। प्राप्तेरे ५८ का॰

तुमिथ्यामहिम्नामफलत्वमेवोचितमतः किमेतत्फलमित्यादिनाभिसंबंधः स्यात्। तच्चबहुव्रीहावन्यपदार्थे
गुणीभूतं विशेषणप्राधान्येसमानन्नुशासनात्। किंचोद्देश्यंविधेयंचयदिपृथक्पदाभ्यामुपतिष्ठते। तदाप्र
थमोद्देश्याप्राप्तंविधीयते। नचसमासेपृथग्पपदादुपस्थितिः। अथपृथगुपस्थितोचनतथाप्यसन्निरिति। एवं
समासांतरेप्यविमृष्टंद्रष्टव्यं। तत्रकर्मधारयेयथा। स्त्रस्तांनितंबादवरोपयंतीपुनःपुनः केसरदा■मकांची।
न्यासीकृतांस्थानविदांस्मरेण द्वितीयमौर्वीमिवकार्मुकस्य॥१॥ अत्रद्वितीयत्वंमौर्व्यामुत्प्रेक्षत्वयाविधेयं। तच्चसमासे
गुणीभूतं मौर्वींद्वितीयामितिपाठेनिराबाधप्रतीतिः। नन्वत्रकांच्यांद्वितीयमौर्वीत्वंविशिष्टमेवोत्प्रेक्ष्यमतोनोक्तदो
षावकाशइतिचेन्न। तथापिहिविशेषणांशस्यद्वितीयत्वस्याप्राधान्यं द्वितीयसद्भावेएकस्य न्यासीकरणेवियात
मौर्वीत्वंतुतस्याप्रयोजकं। अन्यस्यापिसाद्वितीयस्यतदौचित्या दिति। वस्तुविशेषस्यपरिचायकतामात्रं। तस्माद्द्वि
ष्टविधा■वपिविशेषणमत्रप्राधान्येनवक्तव्यं। अतएवकथाकडारादेकासंज्ञेत्यत्रएकत्वस्याप्राधान्यप्रसंगभयेनस
मासोनाकारीतिव्याख्यातारः। अन्यथातत्रापिकत्रसंज्ञिन्युद्देश्येएकत्वविशिष्टसंज्ञाविधानेदोषोनस्यात्। बहुव्री
हीवंवताद्वितार्थगुणीभूतेन्यपदार्थेगुणीभावोयथा॥ वपुर्विरूपाक्षमलक्ष्य■जन्मतादिगंबरत्वेननिवेदितंवसु व
रेषुयद्बालमृगाक्षिमृग्यतेतदस्तिकिंव्यस्तमपित्रिलोचने॥॥ अत्रवरेषुमार्गणीयानांधर्माणांकैवल्यदर्शनप्र
स्तावात् जन्मनयलक्ष्यत्वंविधित्सितंतच्चसमासेन्यग्भूतं। अलक्षिताजनि रितिपाठेतुपौर्वापर्यविपर्यसत्वेपिसमा
सानिवंधमप्राधान्यंनिवर्तते। तत्समासेयथा। आनंदसिंधुरतिचापलशालिचित्तसंदाननैकसदनंक्षणमप्युमु
क्ता यासर्वदैवभवतातदुदंतचिंतातांतितनोतितववसंप्रतिधिग्धिगस्मान्॥ अत्रावांतरवाक्यप्रमुक्तेत्यनेननव
जलधरः। संनद्धोयंनदृप्तनिशाचरः सुरधनुरिदंदूराकृष्टंननामशरासनं अयमपिपटुर्धारासारोनवा — पर

५८
का॰ प्र॰
58

परात्मनश्च निकषाऽस्मिन्नन्यधाविद्युत्स्त्रियानमभोविश्रीसत्रेवप्रसज्यप्रतिषेध एव विधेयो न तु जुगोपात्मानमत्रस्तोभेजे धर्ममना
नातुरः। अगृध्नुरादेदे सोऽर्थानसक्तः सुखमन्वभूत्। १। इत्यत्रास्त्रस्ताघृध्नु वाघनु वादेनात्मगोपनादिवदप्रकृततानुवाद-
न्यकिंचित् विधेयमस्ति। न च समासे नञः प्रसज्यप्रतिषेधोऽर्थः किंतु पर्युदास एव। यदुक्तं। विधेर्यत्र प्रधानत्वं प्रतिषे-
धेऽप्रधानता पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् इति। कथं तर्हि अश्राद्धभोजी त्यादौ प्रसज्यप्रतिषेधः। लाभः पर्यु-
दासेनाक्षेपात् ननु पर्युदासेऽर्थो मुक्तत्वमेव विधीयतां फलाविशेषादिति चेत्। भवेदप्येवं यदि तथा सति तृणेन भवि-
ष्यत्यनेन संबंधः स्यात् स हि मुक्तत्वेनैव प्रतियोगिना विवक्षितो न च पर्युदासे तथा संभवः। नन्वेवमपि नाविमृष्टवि-
धेयांशता विधेयस्यानुपस्थितेः किंतु धारणे विद्ध्यादिति तद्वाचकत्वं एव स्यात्। समासे हृदयं तिरनिरूढत्वादिति चे-
न्न। प्राधान्येनानिर्दि[redacted]शस्य तथा प्युक्ततेः अत एव प्राधान्येनानिर्दिष्टो विधेयांशो यत्रेत्याह वृत्तिकृत्तु त्वप्राधान्ये-
न निर्दिष्ट इति। तर्हि विद्ध्यादित्यस्याप्यत्रैवांतर्भाव इति चेन्न। तदर्थस्यानिर्दिष्टस्याप्यविधेयत्वात्। अयुक्ते सत्याभावि-
मृष्टविधेयांशस्यावाचकप्रवेश इति चेन्न। उभयोरसंकीर्णस्य तत्संभवेऽप्ययुक्तत्वस्यं केरण्यदोषात्। दूषकतावीजं विव-
क्षिता प्रत्ययः तस्मान्नित्यदोषोऽयं। विरुद्धमतिकृत्तत्पदांतरसान्निधाने प्रकृतप्रतीतन्यक्कारप्रतीतिजनकं। तच्चे-
दमनेकधा प्रवर्त्तते क्वचित्समासांतरेण विग्रहेण यथा। (सु)धाकरकराकारविशारदविचेष्टितः। अकार्यमित्रमेको-
सौ तस्य किं वर्णयामहे। १। अत्र कोपं कार्यमंतरेण मित्रमिति विवक्षितं अकार्ये मित्रमिति तु प्रतीयते। क्वचित्साम-
पद्योः समासे विरुद्धार्थे निरूढघटनया यथा॥ विस्तारस्त्वपरिप्राप्तिर्जावनानंददायिनः कांताकांतस्य सहसा विद-
धाति गलग्रहं। १। अत्र कंठग्रहार्थितया विवक्षितो गलग्रहशब्दो रोगविशेषे निरूढः॥ १॥ क्वचिद्विवक्षितपरत्वेपदैवय्य-
र्थप्रसंगेनाविवक्षितविशेषपरत्वग्रहात्। यथा। नवप्रसूतपादिनाम भूतकरूपोऽसताव ज्ञातात्मनः तेन व्यारूजताधनुर्भे ५८

राम॰

गवतोदेवाद्भवानीपतेः तत्सुवत्तमदांधतारकवधाद्विश्वस्यदत्तोत्सवः स्कंदः स्कंदइवप्रियोहमथवाशिष्यःस्वयं
विस्मृतः॥१॥अत्रभवस्यपत्नीत्यर्थेभवानीतिसिद्धं तथाचभवपत्नीपतौप्रतीयमानेभवानीतिक्तः सद्भावश्रुतीयते।नहि
भवएवाभिधेयेभवपत्नीपतिरितिप्रयोगोयोग्यः।सचेतसांक्वचित्समासेव्यपिसमस्यमानपदयोर्व्यर्थतया
॥यथा॥गौरविपयद्वाहनतांप्राप्तवतःसोपिगिरिसुतासिंहः सविधेनैरहंकारःपायाद्वःसोंबिकारमणः॥अंबिका
रमणपदप्रयोगेगौरीप्रीतिकरत्ववत् मातस्वामित्वमप्यर्थः दूषकतावीजंविवक्षितार्थतिरस्कारकार्थोपस्थितिः
अत्रचयद्विरुद्धोर्थोविवक्षितायावतन्नादोषत्वं क्लिष्टादिविशेषेषुसमासगतत्वनियमाविधानात् श्रुतिकटुप्रभ्र
तिषुनियमोप्यनुक्तत्वात् तत्रासमासगतमुदाहृतमेवसमासगतेषु श्रुतिकटुर्यथा॥सादूरवसुधासांद्रतरंगि
तविस्तोचना।वहीनिर्हादना[redacted]दोयंकालश्चसमुपागतः॥समासोदकपद्यं।एवंच्युतसंस्कृ[redacted]त्यादयोद्रष्टव्याः॥उ
क्तान्यपददोषान् पदैकदेशेवाक्येचातिदिशति। ॥अपास्यच्युतसंस्कारमसमर्थनिरर्थकं वाक्येपिदोषाःसंत्ये
तेपदस्यांशेपिकेचन॥च्युतसंस्कारेत्यादर्शवप्रधाना निर्देशएतेइतिश्रुतिकट्वादिपदप्रवृत्तिनिमित्तभूताः
श्रुतिकटुत्वादयइत्यर्थः।अत्रचयत्रपदांतरसाहित्येनपदानांदुष्टत्वंसवाक्यदोषः नचासाधुत्वसमर्थनिरर्थकाणं
दुष्टत्वेपदांतरसाहित्यापेक्षेति तत्रितयापासनमितिसंप्रदायः।तदसत्।सोध्यैष्टेत्यादौश्रुतिकटोर्दुष्टत्वस्या
पेक्षत्वस्यानपेक्षणीयतयातदुदाहरणाविरोधात्।नचतत्रापितथैवेतिवाच्यं।परुषवर्णारब्धत्वस्यस्वतएवसत्वात्।
तथात्वेपिकृत्यपातुदेवोदुम्बवनइत्यादि।अप्रयुक्ताद्युदाहरणेव्याप्तिः।नहितत्रापि दुष्टत्वेपदांतरापेक्षेति।वस्तुमपि
शक्यते।किंवावाचकमप्यसमर्थसमानशीलंकिमितिनापास्तंव्रतीसर्वव्याख्यानेषुविनिगमकंवक्तव्यमितिःप्रवक्र
मः।विवक्षितधर्मिप्रत्यायकशब्दवतितिसेतातिमानायचयच्योतत्वेवाचवाकवतितिमभिप्रेतम्।न्यक्करोह्यय

५९
सा॰ प्र॰
59

मेवात्रमित्यत्रापिनाव्याप्तिः उद्देश्यविधेयाभिधायकयोर्द्वयोरपिस्फुटत्वात्। अत एव। विमृष्टविधेयांशमित्यत्रांश
पदोपादानायोगोसौभगेतवागतइत्युदाहरणेप्रकाशेस्फुटमेतत्। एवंचयुक्तंच्युतसंस्कृत्यादिव्युदसनं। नचास
मर्थसहोदरस्यावाचकस्यापिव्युदासोयुक्तः। तेनापिकेनचिद्विवक्षितधर्मित्वापनात्। यथोदाहृतेन्जंतुपदेन
व्युदस्तेषुपुनर्नकोप्यभेदोविवक्षितधर्मिप्रतिपादकइति। तत्रश्रुतिकटु वा यथागतं। यथा॥ सोध्यैष्टवेदांस्त्रिदशा
नयष्टपितॄन्नतार्प्सीत्समस्तंबंधून्। व्यजेष्टषड्वर्गमरंस्तनीतौसमीलपातंन्यवधीदरींश्च॥१॥ अप्रयुक्तंय
था॥ सपातुवोदुश्च्यवनोभावुकानांपरंपरां। अनेडमूकताद्यैश्चद्यत्यनुदोषैरसंमतान्॥१॥ अत्रदुश्च्यवनशब्दइंद्रे
अनेडमूकताशब्दश्चैडमूकेऽप्रयुक्तः। निहतार्थंयथा॥ सायकसहायवाहोर्मकरध्वजनियमितक्षमा
धिपते। अब्जरुचिभास्वरस्तेभातितरामवनिपश्लोकः॥१॥ अत्रसायकशब्दः खड्गे मकरध्वजः समुद्रेक्षमाशब्दो
भूमौ अब्जशब्दश्चंद्रेश्लोकशब्दोयशसिचप्रयुक्तः। नचैषामेतेषुप्रसिद्धिर्भूयस्त्वंचातःप्रसिद्धेः शरमदनक्षांतिप
नयपद्यैरर्थैर्निहतार्थः॥१॥ अनुचितार्थं॥ यथा॥ कुविंदस्त्वंतावत्पटयसिगुणग्राममभितो। यशोगायंत्येतेदिशिशिव
नग्नास्तवविभो। शरज्ज्योत्स्नाकांतस्फुटविकटसर्वांगसुभगा तथापित्वत्कीर्तिर्भ्रमतिविगताच्छादनमिह॥
अत्रकुविंदमितितंतुवायंपटयसीतिपटंकरोषीतिगुणेतितंतुनग्नेतिवस्त्रहीनेत्यशब्दत्याकारप्रश्लेषादपशः
विगताच्छादनमित्यवसनमित्यर्थेजुगुप्साव्यंजकत्वेनापकर्षद्योतकतयाऽनुचितार्थप्रकाशायंति। अवाचकंय
था॥ प्राभ्रभ्राड्विष्णुधामाप्यविषमाश्वः करोत्ययं। निद्रांसहस्रपर्णानांपलायनपरायणां॥१॥ अत्रप्राज
इत्यभ्रभ्राड्जलदः प्रकृष्टोऽभ्रभ्राड्यत्रतादृग्विष्णुधामेत्यस्याविशेषणं। अत्रप्राभ्रभ्राडितिप्रकृष्टजलदेविष्णु ५९
राम॰

धामेति विष्णुपदे। विषमामध्व इति समामध्येति निर्द्दिष्टेति संज्ञो चेसहस्त्रपत्रेति सहस्त्रदले प्रह्लष्टजलदत्वादिर्निर्ग्रि
कारेणवाक्यानि कानि चित्त्वात्र धर्म्मिलिशक्तन्येवेति यथोक्तवानुपदोषत्वं॥ अश्लीलं व्रीडादि यथा॥ रूपते
रूपसर्पतीकंपनावामलोचना॥ ततस्त्वहरणोत्साहवतीमोहनमादधे॥१॥ अत्रोपसर्पतीति सुरतारंभग्रहणे
नेतिताडनविशेषं॥ मोहनमिति निधुवनं चार्थांतरं प्रतिपादयद्व्रीडादायि॥ जुगुप्सादायि यथा॥ तेन्यैवं वांते
समभ्यंतिपरोत्सर्गं च भुंजते॥ इतरार्थग्रहे येषां कवीनां स्यात्प्रवर्त्तनं॥१॥ अत्र वांतोत्सर्गशब्दो छर्दितपुरीषार्थ
रत॰ ६ तयाप्रवर्त्तनमिति पुरीषार्थेतियजुगुप्सां ददयच्छति॥ अमंगलार्थं यथा॥ पितृवसतिमहं व्रजामि तां सहृदि
वारणेनयत्रमेभवतिसपदिपावकान्वये हृदयमशेषितशोकशल्यकम्॥१॥ अत्र पितुर्गृहं पावनेवश इति विवक्षि
ह्रितेपितृवसतिपावकान्वयशब्दौ स्मशानवह्निसंबंधरूपामंगलांतरौ॥ [redacted] संदिग्धं यथा॥ सुरालये ल्लास
प्राप्त ८ परः पर्याप्तकंपनः मार्गणप्राप्ति मोभास्वत् भूतिरेव विलोक्यतां॥ अत्र सुरालयेति देवगृहमदिरामंदिरयोः
प्राप्तपर्याप्तकंपन इति प्राप्तसैन्यत्व प्राप्तकंपत्वयोरुपस्थापकं॥ अप्रतीतं यथा॥ तस्याधिमात्रोपायस्य तीव्रसंवेग
ताजुषः॥ दृढभूमिः प्रियप्राप्तौ यत्नः सफलितः सखे॥१॥ अत्राधिमात्रोपायस्य तीव्रसंवेगताजुषः (?) दृढतान्वाजपायोपमादीर्घस्य तीव्रपरमः संवे
गो वैराग्यं यस्य तन्त्रात्युक्तस्य छ भूमिर्दृढसंस्कारः॥ मृदूपायो मध्योपायो ऽधिमात्रोपायश्चेति त्रिविधाश्चापियो
[redacted] मितः॥ प्रत्येकं मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्चेति त्रिविधाः॥ अत्राधिमात्रादयः शब्दा योगशास्त्रमात्र
प्रसिद्धाः॥ ग्राम्यं यथा॥ तांबूलभृतगल्लोयं भल्लं जल्पति मानुषः॥ करोति खादनं पानं सदैव तु यथा तथा॥१॥ अत्र गल्ल
भल्लमानुषखादनपानशब्दा ग्राम्याः॥ नेयार्थं यथा॥ वस्त्रवैडूर्यचरणैः ध्वस्तसत्वरजः परा॥ निष्कंपा रचिता नेत्र युद्धवो
धयसांप्रतं॥ अत्र वस्त्रवैडूर्यशब्देनाकाशार्थो विवक्षितः इति नेत्र गगनार्थं विवक्षितं॥ नचास्यतत्र शक्तिरिति वाच

कत्वलक्षणेनशाब्दसंबंधेनांबरपदंलक्षयति।तस्मात्तुगगनप्रतीतिः।यद्वावाचकवाच्यत्वलक्षणेनशाब्दसंबंधेनग
गनमेवलक्षयतीतिलक्षितलक्षणा।लक्षणैवेतिवस्तुगतिः।एवंवैडूर्यमित्यस्यमणौचरणेत्यस्यपादेसत्वरजःपरत्व
स्यतमसिनिकंपेत्यस्यत्वाचलायांभूमौपुंड्रमित्यस्यदंदैवेदनेस्यबोधनेलक्षणैव।नचतद्वीजंरूढिःप्रयो
जनंवेतिनेयार्थत्वं।क्लिष्टंयथा।धम्मिलस्यनकस्येद्त्यविकासंकुरंगशावाद्याः रजतस्सर्ववंधव्युत्सत्तेर्मान
संशोभा॥१॥अत्रकुरंगशावत्याधम्मिल्लस्यशोभांसेद्त्यकस्यमानसंनरज्यतीतिसंबंधप्रतीतिव्यवधानं।अवि
मृष्टविधेयांशंयथा।न्यक्कारोह्ययमेवमेपदयस्तत्राप्यसौतापसः सोप्यत्रैवनिहंतिराक्षसकुलं जीवत्यहोरावणः
धिग्धिक्शक्रजितंप्रबोधितवताकिंकुंभकर्णेनवास्वर्गग्रामटिकाविलुंठनवृथोच्छूनैः।किमेभिर्भुजैः॥१॥अत्र
प्राप्तपरिसत्वमयमित्यनूद्याप्राप्तंन्यक्कारकत्वंविधीयते।तोयमेवन्यक्कारइतिवाच्यं।अनुवाद्यमनुक्त्वैवनाभिधे
यमुदीरयेदितिवचनात्।अन्यथातुवैपरीत्येनविसंबेनतथाभावःप्रतीयेत।अयंन्यक्कारइति।उभयोःपदयो
र्दुष्टत्वाद्वाक्यदोषत्वं।अतएवसमासगतमेवदुष्टंपदंइत्युक्तं।अपिवात्रवृथोच्छूनैरिति असंगतं उच्छूनत्वमात्र
स्यैवानुवादौचित्यात्।नतुवृथात्वविशेषितस्य।किमेभिरित्यनेनवृथात्वस्यैवविधेयत्वात्।अर्थभेदापगमेकिंमे
भिरितिवैफल्याभिधानविरोधात् वृथोच्छूनस्यतदौचित्यात्।ननुन्यक्कारोयमित्यत्रवैपरीत्येनाविधेयत्वप्रत्ययाद
र्थदोषएवायंस्यादितिचेन्न।खल्वत्राविवक्षितोर्थोदुष्टः किंतु क्रमविशेषाद्विवक्षितार्थः प्रत्ययएवेतिशब्दविशे
षणवापराध्यतिशब्दांतरेणतत्प्रतीतेरेवकैवल्यात्।यथाविरुद्धमतिकृतीति।नकेवलाविधेयस्योपसर्जनत्वयु
क्तमत्वाभ्यामेवायंवाक्यदोषः।किंतुविधेयस्यानुपस्थित्याविपर्यया॥अपांगसंसर्गितरंगितंदृशोर्भुवोररालांत
विलासवेल्लितं विसारिरोमांचनकंचकंतनोस्तनोतियोसौसुभगेतवागतः।अत्रयोसावितिपदद्वयमुद्देश्यविधे

पार्थकतया विवक्षितं उद्देश्यवाचिनो यच्छब्दस्य स्वार्थपरामर्शकतच्छब्दापेक्षितत्वात् न चैतत्प्रतिपादितं। यच्छ
ब्दसांनिध्येनादसादीमां प्रसिद्धपराम॰र्शकत्वात् ननु केवलयोरपि यत्तदोः प्रयोगदर्शनात्साकांक्षत्वमेवानयोरसिद्धं
उच्यते॥ अनयोः परस्परार्थापेक्षार्थकत्वं नियतमेव एतदेवोच्यते। यत्तदोर्नित्याभिसंबंध इति। स चाभिसंबंधः शाब्दो वा आ
र्थो वा। तत्र द्वयोरुपादाने शाब्दः यथा दुर्मतिः श्रेयसि यस्य नादर इति एकस्य द्वयोरपि वानुपादाने त्वार्थः अनुपात्तस्या
पि सामर्थ्यादेवाक्षेपात्। तत्र तच्छब्देन यच्छब्दाक्षेपः प्रक्रांतप्रसिद्धानुभूतार्थकेन। यथा। कातर्य्यं केवला नीतिः
शौर्य्यं चापदचेष्टितं। अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः। अत्र स इति प्रक्रांतं राजानमाह। द्वयं गतं
संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः। कला च सा कांतिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौ
मुदी॥ अत्र सेति प्रसिद्धं। उत्कंपिनी भयपरिस्खलितांशुकांता ते लोचने प्रतिदिशं विधुरे क्षिपंती। क्रूरेण दारुण
तया सहसैव दग्धा धूमांधितेन दहनेन न वीक्षितासि। अत्र ते इत्यनुभूतेन त्रिष्वप्येषु यच्छब्दस्योपादानेनाकांक्षा
पेक्षणीयं। तदभावेप्याक्षेपादेवं यः पूर्वोक्तगुणवान्यः प्रसिद्धो येऽनुभूते इति प्रत्ययात्। विघातात यच्छब्दस्तु
उत्तरवाक्यगत एव सर्वत्र तच्छब्दाक्षेपसमर्थः। यथा। साधु चंद्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके। उ
द्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः। यथा च मम। मातर्भारति वत्सलत्वसहतया किं नाम नाचा
र्यते॥ मित्राणि स्थिरता विवेकविनयाकार्य्येषु सह प्रार्थितं। इत्यालोच्य विमुच्य मामिह मनागंतर्हितं स्थीय
तां यावत्त्वादृश विप्रयोगसुभगा लक्ष्मीर्नया लभ्यते॥ पूर्ववाक्यगतस्तु तदाक्षेपासमर्थतया तदुपादानमेवा
पेक्षते। यथा नोदाहरणे पूर्वार्धपादद्वयोर्व्यत्यासे। ननु पूर्ववाक्यगतोप्ययं तदाक्षेपसमर्थो यथा। तच्च तुर्यं दिहारि
तं कुवलयैरित्यादौ इति चेत्सत्यं समर्थो न तु सर्वत्र किंतु यदीत्येतावद्रूपस्तत्पर्यायः उत्तरवाक्यगतस्तु सक
लरूपस्तत्पर्यायेति निर्विशेषः। [illegible] तत्र भिन्नलिंगत्वमेव। एवं चेच्छब्दे पि द्वयोर

६१ का० प्र० 61

प्पनुपादाने प्यार्योपन्नंदाः संबंधः पनी भकेचिदिहनः प्रयंत्यवज्ञां जानंतितेकिमपितान्प्रतिनैषयत्नः ।उ
त्पत्स्यतेस्तिममकोपिसमानधर्माकालोह्ययं निरवधिर्विपुलाचपृथ्वी १ अत्र उत्पत्स्यतेऽस्तिवाममसमानधर्मा
तं प्रतिपन्न इतिस्फुटमेवावगम्यते। यथा श्रुतेनहिपूर्वार्द्धेन कथमप्यन्वयः। यत्तु प्रकांताद्यर्थकस्यतच्छब्द
स्यपच्छब्दापेक्षैवनेतिव्याख्यानं। तच्छक्तिविवेकाद्यनालोचननिबंधनंप्रकाशकारानभिमतंच। यदयंयच्छ
ब्दोपादानंनापेक्षतइत्याह ननुयच्छब्दंनापेक्षतइत्यादि तस्माद्यथाव्याख्यातमेवाहरणीयं एवंच योसौशुभ
गेइत्यत्रतच्छब्दस्यानुपादानादाक्षेपासंभवाच्च यच्छब्दः साकांक्षः ननुस्यादेतद्यदितच्छब्दपर्यायतातयास
ति। असौमरुच्चुंबितचारुकेसरः प्रसन्नताराधिपमंडलाग्रणीः वियुक्तरामातुरदृष्टिवीक्षितोवसंतकालोहनु
मानिवागतः। इत्यत्रादः शब्दः तच्छब्दार्थमेवाभिदधानःनातिदमर्थं। अयंसर्वेपात्यादिष्वापत्तिमातृबसे॥
तर्हि करवालकरालदोःसहायोयुधियोसौविजयार्जुनैकमल्लः। यदि भूपतिनासतत्रकार्येविनियुज्येततत
तःकृतेकृतंस्यादित्यत्रपुनरुक्तं स्यात् अदःशब्देनतदर्थाभिधानात्। न तर्ह्यंतरमस्यननिषेधात्। किं त्वनुजा
नीमस्तदर्थकत्वं कथमन्यथा योविकल्पमिदमर्थमंडलपश्यतीशनिखिलंभवद्वपुः आत्मपक्षपरिपूरितेजगत
स्यनित्यसुखिनःकुतोभयं। २। इत्यत्रेदमादस्यापितच्छब्दार्थकतादृदमदसोःसमानंशीलत्वादितिचेत्। सत्य
मात्थपरंतुयच्छब्दाव्यवहितानंतरवर्त्ती समानाधिकरणस्तच्छब्दोविप्रसिद्धमात्रेनिरूढः। किंपुनरिदमादिः
यथा। यन्नदूर्जितमत्युग्रंक्षात्रंतेजोस्यभूपतेः दीव्यताक्षैस्तदानेनन्नूनंतदपिहारितं। इत्यादौ तस्माद्योविक
ल्पमित्यत्रेदव्यवधानेनादःप्रयुक्तगोपुक्तेनत्वव्यवधानेन। कथंतर्हि नकेवलंयोमहतोपभाषतेशृणोति
तस्मादपियःसपापभागित्यत्रतच्छब्दोनयच्छब्दार्थइतिचेत् इत्यत्रयच्छब्देनव्यवधानात् योसावित्यत्रतु ६१ रामः

संधिनायच्छब्दनिविष्टैकदेशत्वेनाविच्छेदात्। ननु भवेदेवं यदि यत्तदोर्नित्याभिसंबंधः स्यात्स एव तु नास्ति
कथमन्यथा। यद्घटायां प्रतिजहि जगन्नाथनम्रस्य तन्मदत्यजैकयसराम्भष्ट्रस्यैकेनतदापरामर्षेपि द्विती
येयच्छब्दानिराकांक्षाप्रतीतिः द्वितीयतत्पदाभावात् न च तत्रात्तेपोपि पदः पूर्ववाक्यगतत्वादिति मैवम्
नरवत्वेकेनैवरूपेणयत्पदं परामर्शीनियम इति ब्रूमः किं त्वेकस्य ताभ्यां परामर्श इति तथा चात्रापि पापा
त्मकं वस्तु येन केनचिद्विशेषद्वयेन यत्पदाभ्यां परामृष्टं तत्पदेन तु पापत्वेनैकेनेति को विरोधः। वस्तुतस्तु
यद्घाति न पदद्वयं किंतु नित्यवीप्सयोरिति सूत्रेण वीप्सायां पदोद्विलापनीयमादेशः तथा चादर्शनाए
केनयसदेनतत्पदेन च द्वाभ्यां अप्येकेनैव रूपेण पापपरामर्षः आदिशब्दस्तु सामस्त्येन संबंधः परतायाह
कत्रूतियत्पदीयेनैवतेनतदुपपत्तौ तत्पदेपि वीप्सा यत्र तु तत्पदेपि वीप्सा तत्र न यत्पदे प्यादेशः किंतु भाभ्यां रूपे
पद्वयेन सर्वोपस्थानमिति सारं। प्रसमासवत्समासेष्वनेकपदगतत्वेनास्य वाक्यदोषत्वं यथा। किंत्वोभ
नविलंवितः सभरतोपनेतदेवंकृतं मात्रीस्त्रीलघुतागतिं किं मथ्यवामातेवमेमसधमा। मिथ्यैतन्मम
चिंतितं द्वितयमप्यार्यानुजोसौगुरुर्माताततातकलत्रमित्यनुचितं मन्ये विधात्राकृतं प्रत्रकलत्रेतातसंवंधस्या
नुजेवार्य्यसंबंधस्योत्कर्षाधायकत्वेन विधित्सतयेः समाकुलीभावः वाक्यदोषत्वं यथा तदुक्तं। सोयं षष्ठीतत्पुरुषस
मासः। एवं समासांतरेपि विरुद्धमतिकृद्यथा श्रितहामारत्नभवः शिवालिंगितमूर्त्तयः विग्रहत्यपणेनाद्य शेरते तेगता
सुखाः अवतांतिमंतोनुरक्तभवः कल्याणालिंगिताय द्वत्यपणेन दुःखाभाववंतः शेरते इति विवक्षितेभूमिपतिता
रुधिरस्याशिवाभिरालिंगिताः शरीरत्यपणेन गतप्राणेंद्रियाः शेरत इति विरुद्धं प्रतीयते अमतपरार्थः विरुद्धोप्य
र्थोविवक्षित इति ततो भेदः नव प्रकाशितविरुद्धसंकरः तत्रार्थस्यात्र तु शब्दस्य व्यंजकतयाविशेषात् यदेकदेशोपपद्य
संभवमुदाहरणानि॥ तत्र श्रुतिकटुकं यथा। अधमा तिपल [illegible] सत्वप्न मायामत्वा त्यारिणातिविसरत्वात्संगमेनांगना

याः प्रतिपद्विशकलस्तत्व मालोभयामासस्तदपि न हरिणाक्षी विस्मरत्यंतरालाः। एकत्र पदे वर्णद्वयकटुत्वे पददो
षत्वं पदस्यैव कटुत्वप्रतीतेः। एकस्यैव तथात्वे पदैकदेशदोषत्वं। न चैव सोढ्येष्टेत्यादौ प्रत्येकं पददोषाभावात्। क
थं वाक्यदोषतेति वाच्यं। न हि नानापददुष्टत्वेऽवाक्यदोषता किं तु नानापदव्याप्तिमात्रेण साच पदावच्छेदेन तदे
कदेशावच्छेदेन वेति विशेषस्त्वादित्यस्य कटुत्वासम्मतौ तद्वत्। सिद्धांकुरः देवकार्य्ये प्रयोपमर्यातर एव लभ्य। अ
पेक्षतेप्रत्ययमंगलब्धप्रैवीजांकुरः प्रागुदयादिवामः। अत्र सिद्धौ लब्धौ रित्युदाहार्य्यं॥ निहितार्थं यथा॥ प्राप्तस्य
यो विभ्रममंडनानां संपादयित्री शिशिरैर्विभर्त्ति वलाहकच्छेदविभक्तरागामकालसंध्यामिव धातुमत्तां॥ अत्र मत्ता
शब्दः सिहिवीलायां प्रसिद्धः। निरर्थकं यथा॥ आदावंजनपुंजलिप्तवपुषां श्वासानिलोल्लासितप्रोत्सर्पद्विरहान
लेन च ततः संतापितानां दृशां। संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो भल्लीनामिव पानकर्म कुरुते कामं कु
रंगेक्षणा॥ ॥ अत्र दृशामिति बहुवचनमविवक्षितार्थमेव वक्तृत्वपूरणायोपात्तं। एकस्याः कुरंगेक्षणाया दृग्बहुत्वा
भावात्॥ अलसचलितेत्यादिव्यापारभेदाद्बहुत्वमिति चेन्न। तत्रेक्षणैरितिवद्बहुत्वतदनुपानात्। नच भावसाधन
यायाद्दृक्‌शब्द एव व्यापारे वर्त्तते विशेषणानन्वयप्रसंगात्। एवं कुरुतइत्यात्मनेपदमपि निरर्थकं। नाथतइत्यपि
वा निरर्थकमेवाविशेषात्। एवं द्वयोरर्थयोर्बहुवचनमसाध्वेवेति उच्यते आशिषि नाथइत्यात्मनेपदेनाशिष्य
त्मनेपदं नियमयता पराभिसंबंधविवक्षायां तन्निषेधः प्रतिपाद्यतेइतितत्रैवासाधुत्वं नतु कर्त्रभिप्रेता क्रियाफ
लत्वाद्योतनमात्रमिति नासाधुत्वं। एवं बहुषु बहुवचनमित्येतत्सूत्रं बहुषु वचनं नियमयत् द्व्येकयोरुपस्थितयो
स्तं निषेधति न तु बहुत्वाविवक्षामात्रे दृशामित्यत्र वचनद्वित्वैकत्वे विवक्षिते येनासाधुत्वं स्यात् किं तु बहुत्वाविवक्षा
मात्रमिति सनर्थतैवेति युक्तमुत्पश्यामः। एतेनावयवाभिप्रायेण निरर्थकत्वं समुदायाभिप्रायेण त्वसाधुत्वमेवेति चं
डीदासमतमनादेयं ३ अवाचकं यथा॥ चापाचार्य्यस्त्रिपुरविजयी कार्त्तिकेयो विजेयः शस्त्रव्यस्तः सदन
मुदधिर्भूरियं हंतकारः अस्त्येवैतत्। किमु कृतवता रेणुकाकंठबाधां। बद्धस्पर्द्धस्तव परशुना लज्जते चंद्रहासः।

अत्र विजेय इति यत्प्रत्ययः कृत्प्रत्ययार्थे प्रयुक्तस्तत्र वाचकः ॥ अश्लीलं त्रिधा व्रीडादि यथा । प्रतिपेलवमतिपरिमितवर्णलघु-
तरमुदाहरति शठः । परमार्थतः स हृदयं वहति पुनः कालकूटघटितमिव ॥ अत्र पेलेति पेलवशब्दैकदेशोऽपांगसा
रक्ततया व्रीडादायि । जुगुप्सादायि यथा ॥ यः पूयते सुरसरिन्मखतीर्थसार्थस्नानेन शास्त्रपरिशीलनकील
नेन सौजन्यवान्यजनिकूजितमूर्जितानां सोऽयं दृशोः पतति कस्यचिदेव पुंसः । अत्र क्षयेति पूयव्यंजकतया जु
गुप्सादायि । अमंगलं यथा । विनयप्रणयैककेतनं संततं यो भवदंगतादृशः । कथमेष सतद्वदीक्ष्यतां तदभि
प्रेतपदं समागतः । अत्र प्रेतेति भागोऽमंगलस्य स्मारकः । संदिग्धं यथा । कस्मिन्कर्मणि सामर्थ्यमस्य नोत्तप
तेतरां ॥ अयं साधुचरस्तस्मादंजलिर्बध्यतामिह ॥ अत्र चरभागो भूतपूर्वे चरडिति चरट्प्रत्ययो वा चरेर्व
इति ठांतस्य चरधातुर्वेति संदेहात् पूर्वं साधुरिवासाधुश्चरतीति वार्थसंदेहः ॥ नेयार्थं यथा ॥ किमुच्यतेऽस्य भू
पालमौलिमालामहामणेः । सुदुर्लभं वचो वाणैस्तेजो यस्य विभाव्यते ॥ अत्र वाणशब्दो गीर्वाणे विव
क्षितः । न च तत्र समर्थः गीर्वाणशब्दयोरेव समस्तयोस्तदर्थे रूढिः । ननु तात्पर्यायांतरेण अत एव गीःश
ब्दादिशब्दोऽपि तत्रासमर्थः पर्यायप्रवृत्त्यसहत्वात् तस्माद्वाणः शब्देन गीःशब्दो लक्ष्यते । न च तत्र रूढिः प्र
योजनं वेति नेयार्थता । पंकजलध्यादिशब्देऽपि पदपरिवर्तनं द्रष्टव्यं । परं तु तत्रोत्तरपदमेव परिवृत्त्यसहं । वा
डवानलादौ तूत्तरपदमेवेति तदन्यपरिवर्तनेऽप्यदोषः । न च समर्थत्वं विवक्षितार्थप्रतीतिसामर्थ्याविरहाद्वाच्यतां
स च प्रसिद्ध्यभावात् समपाद्यभावाद्व्युत्पत्त्यप्रयुक्तावाचकानिहतार्थायोग्यासमर्थसंभेदा एव भवितुमर्हतीति
किमिति पृथङ्निर्दिष्टा इति चेत् तथापि परं त्वन्यैरलंकारकैर्भेदेन दर्शिता इति तथैव निर्दिष्टाः । किंचैवे
जात्यभावेऽपि शिष्यबुद्धिवैशद्याय प्रभेदा वक्तव्याः ॥ एवं तत्तोऽपि विभज्योक्ता इति । अथ वाक्यमात्रदोषान्

६३ 63 का॰ प्र॰

द्वयमाह। प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसंधिहतवृत्तं न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरा
त्तं। अर्द्धांतरैकवाचकमभवन्मतयोगमनभिहितवाच्यं। अपदस्थपदसमासं संकीर्णं गर्भितं प्रसिद्धिहतं।
भग्नप्रक्रममक्रममनत परार्थं च वाक्यमेव तथा॥ ॥अत्रापि रूढियोगाभ्यामर्थद्वयोपस्थितौ लक्षणया वाक्य
त्वोपस्थितिः वाक्यमेव तथा प्रतिकूलवर्णत्वादिकं वाक्यदोषो न तु पदादिष्वपीत्यर्थः। तत्र प्रतिकूलवर्णं विव
क्षितरसादेः प्रतिकूलाः अननुगुणा वर्णा यत्र तत् अनुगुणत्वं वर्णानां गुणा एव केवनावसरे वक्ष्यते शृंगारे यथा।
अकुंठोत्कंठया पूर्णमाकुंठकलकंठिमां। कंबुकंठ्याः क्षणं कंठे कुरु कंठार्तिभिद्धर॥ ॥अत्र टवर्गः शृंगारप्र
तिकूलः। अटवर्गा इत्यादिना प्रतिषेधात् रौद्रे यथा। देशः सोयमरातिशोणितजलैर्यस्मिन्ह्रदाः पूरि
ताः क्षत्रादेव तथा विधः परिभवस्तातस्य केशग्रहात्॥ तान्येवाहितहेति घस्मरगुरूण्यस्त्राणि भास्वं
ति मे। यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः॥ अत्र अस्ट देवो वर्णाः प्रतिकूलाः ओजस्विनिर
से विकट वर्णस्य दीर्घसमासत्वस्य चानुगुणत्वा यथा॥ प्रागप्राप्तनिशुंभशांभवधनुर्द्वेधाविधाविर्भव
त्। क्रोधप्रेरितभीमभार्गवभुजस्तंभापविद्धः क्षणात्। उज्वालः परशुर्भवत्वशिथिलस्त्वत्कंठपीठातिथि
र्येनानेन जगत्सु खंडपरशुर्देवो हरो ख्याप्यते। अत्र पत्र तु न क्रोधस्तुर्यपादे तत्राशिथिल एव
प्रयोगः अपरुषस्या विरोधादि विरोधितयास्य न श्रुतिकटुभेदत्वं। नं च श्रुतिकटोरेव तद्विशेषत्वे त
स्य स्वकृत्वयोगे ध्यातलतालाभात्। अस्य तु वाक्यव्यापित्वेन स्तत एवास्य न पददोषत्वे एकत्र तादृशवर्णप्र
योगस्य रसाविरोधित्वात्। दोषत्वबीजमप्यस्य रसविरोधित्वमेव अत एव नित्यदोषोयं। नीरसादावा
स्वलाभाभावात्। श्रुतिकटो भेदः। अयं तु नित्यं। रौद्रादिरसे ६३ राम॰

निरपेक्ष
दोषत्वं

श्लोकार्धपर्यन्तसमासेनैकपदे मृदुवर्णप्रायेऽप्यस्य न कथं पददोषत्वमिति अन्यथा साहित्येन दोषत्वं वाक्य
दोषत्वं तु पददोषत्वमिति चेन्न। एवं क्लिष्टत्वादावपि पददोषत्वं न स्यात्। किं बहुना याहृशा विवक्षया क्लिष्टत्वं पद
दोषत्वेनोक्तं तयाऽ इदमपि तथेति न्यूनः पददोषत्वविभागः। उपहतलुप्तविसर्ग उपहतविसर्गं चेति द्वयमित्य
र्थः। उपहत ओत्वं प्राप्तो लुप्तो वा विसर्गो यत्रेति बहुवचनान्तो विग्रहः। एकविसर्गस्य तथात्वे नैव स्यात्। उपघात
प्रजेत्वप्राप्तिः उपघातान्तरस्य दोषान्तरत्वप्रवेशात्। तेन नैरन्तर्येण ओत्वप्राप्तबहुविसर्गत्वं तथा लुप्तविसर्ग
त्वं च लक्षणे द्वयोरेकमुदाहरणं। धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः। यस्य भृत्या बलोत्सिक्ता भक्ता
बुद्धिप्रभाविताः। दूषतावीजं बन्धपारुष्येण सहृदयोद्वेगः अत एवायं नित्यः अत्रापीदं चिन्त्यं। भृयो मही
येति पशो विभूषित इत्यादौ कथं न पददोषत्वमस्येति। विसंधिर्विरूपः संधिः सन्निकर्षो यत्र वैरूप्यं च द्वि
धा विश्लेषोऽश्लीलत्वं कष्टत्वं च। श्लेषमप्राप्तस्य श्लेषसंहिताकार्यस्याभावः स चान्यत्र तु विभाषोपात
वचनान्नैधिकः अप्रकृतसान्निकम्बा। तत्रान्त्यः पुत्रहादित्वात्। हर्वं च। सिद्धमित्यादिना विसर्गादिलोपासिद्धे
वीति श्लाघः सकृदपि वर्त्तमानो दोषाय यच्छा निबन्धनत्वेनाशक्तिमूलकतया प्रथममत एव सहृदयोद्वेजकत्व
तो। श्रेयोऽत्वसकृदनुप्रासनिकत्वेनाशक्त्यनन्तुनायकतया बन्धपारुष्येण वहितस्य दोषत्वं तत्रासकृत्प्रयोग
वते त्रैरूप्यवतामनुगमश्चान्यतमत्वेन अश्लीलत्वं न्यानार्थत्वमेव वा। एवं त्रिप्रकारके विश्लेषे आद्यप्रकारद्वयं
यथा। राजन् विभांति भवतश्चरितानि तानि। इन्दोर्द्युतिं दधति यानि रसातलेंतः धीदोर्बलेऽप्रतितते उचितानुवृत्ती
आतन्वती विजयसंपदमेत्य भातः॥ अन्त्यो यथा॥ तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः नि
जवंश उदारकान्तकान्तिर्विततमुक्तामणिवच्चकास्त्यनर्घः। दूषकतावीजमस्यान्तं। अश्लीलत्वं यथा॥ वेगाडुड्डी

यगणेनखंडमरुच्चेष्टितः अयमत्तपतेपत्रीतन्नौनैवसर्वेकुरु॥ ॥अत्ररुचिंकुरुइत्यश्लीलं॥कष्टत्वंपुष्प॥
६४ 64 उर्वश्यासावत्रतर्वालीमवंतेचात्रवास्थितिः। नात्रजेहमतेगंतुंशिरोनमयतन्मनाक्। अत्रदूषकतावीजंपददो
वा.प्र. षप्रस्तावेउक्तमिति। अत्रापीदंचिंत्यं। समासेनैकपद्ये अश्लीलकष्टत्वानिबंधनाक्लिष्टेषाणांमश्लीलकष्ट
साधुमध्यप्रवेशोलोपा। सिद्धिनिबंधनविश्लेषस्यपदेविसङ्गवात् कथमस्यनपददोषत्वं यथा। मयउ
द्वैमेलउदान्नपशउदाहरति। वयंतुतर्कयामः सकलप्रभेदभिन्ना एतेदोषा दूषणांतरासंकीर्णावाक्यएवेतिवाक्य
मेवतेयातीतिनियमार्थः अतएवनपददोषविभागन्यूनतापि। तादृशस्यैवपदवृत्तेस्तत्रविभागादिति। हतवृत्तं
हतंवृत्तंयवतच्छन्दस्त्वंचास्यलघुगुरुकार्यसमपादांतलघुवर्णत्वं। प्रकृतरसाननुगुणत्वंवा। अन्यतमत्वेनैषा
मनुगमः अश्रव्यत्वंस्वलक्षणाननुगमात् यतिभंगात् स्थानविशेषगणविशेषयोगात्। शिखरिण्यादावं
त्यस्यलघोर्गुरुकार्याक्षमत्वात् प्रकृतरसाननुगुणत्वाच्च तत्राद्यं यथा। यस्मिन्पंचपंचजनाः आकाशश्चप्र
तिष्ठितः तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः। अत्रश्लोकेपंचमस्यगुरुत्वाच्छंदोभंगः यतिभंगोवर्णा
वृत्तेर्यथा। अमृतममृतंकः संदेहोमधूधून्यपिनान्यथामधुरमधिकंचूतस्यापिप्रसन्नरसंफलं। सकृ
दपिपुनर्मध्यस्थः सन्रसांतरविज्जनोवदतुयदिहान्यत्स्वादुस्यात्प्रियादशनच्छदात् अत्रहरिणीछंदसि
षष्ठेदशमेचयतिरुचितावतुर्थेतद्भंगः मात्रावृत्ते स्थानविशेषयोगो यथा॥ जंपरिहउरतीरमणअपिणसुद
रत्तणगुणाण। अहणवरजस्सदोसोपडिवक्खेहिविपडिवस्सा। अत्रार्याद्वितीयतृतीयसगणभगणौ
तौवतथाविधौछंदःशास्त्रेणदुःश्रवत्वेनप्रतिपादितौ। पदांतलघोर्गुरुकार्याक्षमत्वंयथा॥ किंसितसहका
रतारहारिपरिमलगुंजितपुंजितद्विरेफः। नवकिसलयचारुचामरश्रीर्हरतिमुनेरपिमानसंवसंतः अत्रवापा
दंतप्रतिपादांतस्यगुरुत्वाच्छंदोभंगः [illegible] पादांतवर्त्तिनोलघोरपि गुरुकार्यकरणाक्षमत्वं ६४

राम.

द्रवज्रादिषुतुतकार्ष्ण्यक्षामत्वाद्दोषः । तस्मात्प्रमदितसौरभेतिपठनीयं । नकेवलंप्रथमतृतीयपादयोरेवायंदोषः
किंत्वन्ययोरपि । तत्रचतुर्थेयथा । अन्यास्तागुणरत्नरोहणभुवोधन्यामृदन्यैवसा । संभाराःखलुतेन्यएवविधिना
यैरेषसृष्टोयुवा । श्रीमत्कांतिजुषांद्विषांकरतलात्स्त्रीणांनितंबस्थलाद्दृष्टेयत्रपतंतिमूढमनसामस्त्राणि
वस्त्राणिच । अत्रवस्त्राण्यपीतिपाठेगुरोरेवसंयोगपरतयास्वरबद्धौलघुरपिगुरुकार्यकारीसंपाद्यते । एवंद्विती
यपादेप्यूह्यः । एषुचाश्रयतासहृदयोद्वेजनादुष्टताबीजं अतोनित्यदोषोयं । प्रकृतरसाननुगुणत्वंयथा । हानृप
हाबुधहाकविबंधोविप्रसहस्रसमाश्रयदेव । मुग्धविदग्धसभांतररत्नक्वासिगतःक्ववयंचतवैते १ इदंदोधकवृत्तं ।
शोकाननुगुणं । तद्विरोधिहास्यव्यंजकत्वात् अस्यचप्रतिकूलवर्णत्वंदुष्टताबीजंनीरसेचनास्यात्मलाभइति
नित्यदोषात् । न्यूनाधिकेत्यादि न्यूनपदमधिकपदंचेत्यर्थः । कथितपदंचेत्यत्रन्यूनपदं । न्यूनंपदंवाचकमा
द्योयत्रतद्योतकन्यूनतायांतु अनभिहितवाच्यत्वमितिविशेषः । उदाहरणं । तथाभूतांदृष्ट्वानृपसदसिपां
चालतनयांवनेव्याधैःसार्धंसुचिरमुषितंवल्कलधरैः । विराटस्यावासेस्थितमनुचितारंभनिभृतंगुरुः
खेदंखिन्नेमयिभजतिनाद्यापिकुरुषु ॥१॥ अत्रपादमध्येऽस्माभिरितिखिन्नेइत्यस्यपूर्वमित्थमिति
चपदत्रास्ति आवश्यकेचते अन्यथाकर्तुरलाभादेकवाक्यत्वासंभवाच्च । तदर्थस्याविवक्षितत्वाद्धर्मस्यै
तादृशएवविवक्षितइतिशब्दस्यैवायमपराधः । यत्रत्वर्थएवतावद्दूरंविवक्ष्यतेतत्रार्थएवदुष्टइतिसा
कांतत्वंदोषांतरमितिद्रष्टव्यम् । विवक्षिताप्रतिपत्तिरस्यदूषकताबीजं । अतोऽत्रेत्याक्षेपतस्तल्लाभेदोषत्वं
मधिकपदंयथा । स्फटिकाकृतिनिर्मलःप्रकामंप्रतिसंक्रांतनिशातशास्त्रतत्वः । अविरुद्धसमर्थितोक्तियुक्तः

६५
का॰प्र॰ 65

प्रति मल्लास्तमयोदयः स कोपि॥ अत्र स्फुटिकमेव निर्मलतायामुपमानं विवक्षितं उपात्तेष्याकृतिपदे यथा
कथं चित्ते नैवोपमितिपर्यवसानादित्याकृतिपदमधिकं न तु व्यर्थ त्वादपुष्टार्थेन संक
र इति वक्ष्यते। न केवलं समास एव पदाधिक्यं किं तु समासेपि यथा॥ इदमनुचितमक्रमश्च पुंसां यदिह ज
रास्वपि मान्मथो विकारः। यदपि च न कृतं नितंबिनीनां स्तनपतनावधि जीवितं रतं वा॥ अत्र कृतमि
कं पूर्वार्द्धवत्तेनापि नैव प्रतीतिपर्यवसानात्। कृतं प्रत्युत क्रमभंगमावहति पूर्वार्द्धकरणात्। तथा च यद
पि च न कुरंगलोचनानामिति पठनीयं। निःप्रयोजनशब्दश्रवणेन श्रोतुर्वैमुख्यं दूषकताबीजं। अतो हर्षा
दावभिव्यंग्येन दोषत्वं। न्यूनपदं यथा॥ आधिक्करतलतल्पकल्पितस्वापलीला परिमिलननिमीलत्पां
डिमा गंडपाली। सुतनु कथय कस्य व्यंजयत्यंजसैव स्मरनरपतिलीला यौवराज्याभिषेकं॥ अत्र लीला
पदं वारद्वयमुपात्तं दूषकताबीजं च केवलशब्दपुनरुक्तत्वेन श्रोतुर्वैमुख्यमतो लाटानुप्रासादावदोषत्वं। अ
शक्तपुनरुक्तत्वयात् इदं तु चिंत्यं समासे सत्येकस्मिन्नपि पदे व्यवधानाल्लाटानुप्रासविशेषस्य संभवात् कथं
न पददोषत्वमिति। पतत्प्रकर्षं अलंकारस्य बंधकृतस्य वा प्रकर्षस्य यत्र क्रमेण पातो निकर्षः। यथा। कः कः कु
त्र न घुर्घुरायितघुरीघोरो घुरेत् सूकरः कः कः कं कमलाकरं विकमलं कर्त्तुं करी नोद्यतः॥ के के कानि वना
न्यरण्यमहिषा नोन्मूलयेयुर्यतः। सिंहीस्नेहविलासबद्धवसतिः पंचाननो वर्त्तते॥ १॥ अत्र करायभिधाने
विकटबंधकृतोऽनुप्रासकृतश्च प्रकर्षः सिंहाभिधाने पतितः दूषकताबीजं चाशक्तपुनरुक्तत्वेन श्रोतुर्वैरस्यं।
रसानुगुणतया पतितत्वातेपि न दोषः। समाप्तपुनरात्तं समाप्तं सत्पुनरुपात्तं। वाक्ये समाप्ते पुनस्तदन्वयिशब्दो ६५
पादानं यत्र तत्त्वर्थः। यत्तु समा [illegible] विशेषणांतरोपादानं वक्तव्यं तल्लक्षणमिति तन्न। प्रागप्रा राम॰

प्रेत्यादौ वाक्यांतरानुपादाने तल्लक्षणविरहेण तत्रानित्यदोषत्वमुक्तादनविरोधात्। उदाहरणं। ॐकारः स्मरकार्मु
कस्य सुरतक्रीडापिकीनां रवो झंकारो रतिमंजरीमधुलिहां लीलाचकोरीध्वनिः। तन्व्याः कंचुलिकापसारण
भुजाक्षेपस्खलत्कंकणः क्वाणः प्रेम तनोतु वो नववयोलास्याय वेणुस्वनः॥ अत्र तनोतु व इति समाप्तमेव वा
क्यं नवयवद्रत्यादिविशेषणेनोपात्तं निराकांक्षत्वं च दूषकताबीजं। अतश्चानित्यदोषोयम्। वाक्यांतरारंभे तद
८५ भावात्। अत्र कठोरकवाचकम्। द्वितीयार्धगतमप्रधानहेत्वाद्यर्थकमेकं वाक्यं चतुर्थ्या। मसृणचरणपातं गम्य
तां भूः सदर्भा विरचय सिचयांतं मूर्ध्नि धर्मः कठोरः। तदिति जनकपुत्री लोचनैरश्रुपूर्णैः पथि पथिकवधूभिः शिक्षि
ता वीक्षिता च॥१॥ अत्र भूः सदर्भेति मसृणचरणपातं गम्यतामिति वाक्यं। तत्र च तादर्थ्य इति गतं अत्र च निराकां
क्षताद्युक्तताबीजं। श्रुतमात्रस्यैव भूः सदर्भत्वस्याहेत्वादिना हेतुत्वप्रतीतेः। यस्य तु कर्त्तव्येन तथा प्रतिपत्तिस्तस्या
द्वितीयोपादानेपि अश्रान्तलाभ एव नास्ति। तल्लाभेपि वा न दोषत्वमिति। अभवन्मतयोगं अभिवन्नभिमतो यो
गो यत्र न चाविमृष्टविधेयमध्येऽस्यांतर्भावः उपजीव्यत्वेन भेदादिति केचित्। वस्तुतस्तु तत्र पदार्थयोरन्वयो
भवत्येव परं त्वनभिमतेनाप्राधान्यादिविनाकृतेन। अत्र तु संबंधमेव तयोर्निप्रतीपतमहान्भेदः। नन्वेवमभव
न्मतयोगमित्यत्र योगे मतत्वविशेषणानर्थक्यमिति चेन्न। एकवाक्यपदोपस्थापितत्वादिरूपस्य योग्यस्या
पि सत्वात् मतत्वं चान्वयबोधविषयत्वमित्यप्रसंगः एतच्च क्वचिद्विभक्तिभेदात् यथा। येषां तास्त्रिदशेभदान
सरितः पीताः प्रतापोष्मभिर्लीलापानभुवश्च चंदनतरुच्छायासु यैः कल्पिताः येषां हुंकृतयः कृतामरपति
क्षोभाः क्षपाचारिणां किं तैस्त्वत्परितोषकारि विहितं किं चेत्स्ववादोचितं। अत्र यैरित्यस्य विशेष्यतयोपात्तया वारि
प्रादयो विवक्षिताः। न च तेन तत्तस्य [illegible] यथा मधुपैर्लीलापानभुवः कल्पितास्तेषां प्र

६६
का॰ प्र॰ 66

तोयैश्चाभिरित्यादिप्रकारेणयस्त्वुद्देश्यविधेययोरेवतथान्वयोस्तुकिंविशेष्यांतरविवक्षयेतिचेन्न।अन्यवाच्या
नांहिविधेयेनैवसाक्षादन्वयोनतुतदंतर्भाव्यान्यवाच्यांतरेण।गुणत्वस्योभयत्रतुल्यतयाविशेष्यत्वाविनिग
मनायाःप्रवशयकत्वात्।तदेतदुक्तं।गुणानांचपरार्थत्वादसंबंधःसमत्वात्स्यादिति।अतएवारुणयैकहायन्या
पिंगाक्ष्यागवासोमंक्रीणातीत्यारुणयादीनांपिंगाक्ष्यादिभिर्नान्वयोनापिगवातस्याःक्रयसाधनत्वेनगु
णत्वात्।किंतुक्रयेणैव।कथंतर्हिधर्म्यंतरस्यैरूप्यारुण्यादिभिर्नक्रयइति।आरुण्यादीनांगोत्वगतानांसामर्थ्य
समाजात्।तर्हितद्वदेवात्राप्यार्थएवसमाजोऽस्त्वितिचेत् भवेदेवंयदितद्वत्समानविभक्तित्वंभवेत्।कथंतर्हिभ
वत्यभिमतोयोगइतिचेत्।तयावारिभिरितिपाठेकथंसमन्वयत्।पदनिर्दिष्टानांतसदेनपरामृष्टैतैर्वास
र्वेषांतपावारित्वावतेः।क्वचिन्न्यूनतादिनिबंधनोयथा।त्वमेवंसौंदर्यात्सचरुचिरतायाःपरिचितःकला
नांसीमानंपरमिवयुवामेवभजथ।अपिद्वंद्वदृष्टातदितिसुभगेसंवदतिवामतःशेषंयत्स्याज्जितमिहतदानीं
गुणैतया।अत्रशेषसंपत्तेर्गुणितायाजयप्रयोजकत्वान्वयोविवक्षितःसचद्विधा।संभवतियदित्यस्यचे
दित्यर्थकतयातद्यदिपदार्थयोर्विवक्षयावा।तयोर्यदिप्रथमेतासर्वतदावाचकता।द्वितीयेतुन्यूनपदत्व
मितिन्न्यूनपदस्यापिअत्रैवांतर्भावः।क्वचिन्न्यूनपदेपिअध्याहार्यादिनाऽमतयोगसंभवेवाविलंबादेवदुष्ट
त्वसंभवात्।क्वचिदाकांक्षाविरहात्।यथा।संग्रामांगणमागतेनभवताचापेसमारोपिते।देवाकर्णयये
नयेनसहसायद्यत्समासादितंकोदंडेनशराःशरैररिशिरस्तेनापिभूमंडलंतेनत्वंभवताचकीर्तिरतुला
कीर्त्याचलोकत्रयं।अत्रपूर्वार्द्धेयेनेत्युत्तरार्द्धस्ययोगोविवक्षितःनकथंचित्संपद्यते।तथाहिअर्थानांवस्था ६६
र्येयोगःक्रियात्वेनवाकारकत्वेनवासंबंधित्वेन[illegible]तयावानुत्वत्वेनवादिनाथवातदादिना राम॰

पूर्ववाक्यार्थमन्यच्चवाक्यांतरावष्टंभद्वारावाक्यैकवाक्यतयाभवेत्। तत्रकोदंडादेः प्रथमतृतीयपंचमषष्ठ्याः
पदार्थास्तद्विशेषणत्वात्संभाविताः एवकारकत्वमपिकर्मकर्तृभावाभ्यामन्यत्रघटते तत्रानर्जनाक्रियायांपदार्थ
मात्रस्यकर्मत्वेविवक्षितेकोदंडशरानित्यादिस्यात् अथपरस्परान्विताभिहिताः पदार्थाःकर्मत्वप्रत्येकवाचकात्
कोदंडादिशब्दात् द्वितीयेतिचेत् तर्हिप्रातिपदिकार्थमात्रत्वात्कोदंडः शरा इत्यादिप्रथमास्यात् माहिषं
कोदंडादिशब्दात् द्वितीयेतिचेत् तर्हिं प्रातिपदिकार्थमात्रत्वात्कोदंडः शराइत्यादिप्रथमास्यात् नहि
दधिसमार्द्रंपय इत्यादिवत्। अथसमासादनक्रियायांकोदंडादीनांकर्तृत्वेतयाशरादीनांतुकर्मभावेनान्वय इति
चेन्न। शराः समासादितं इत्यनन्वयात् किंचयेनयत्समासादितंकोदंडेनशराः समासादिताः तदार्जयेतिप्र
पर्यवसानेकर्त्रोः कर्मणोश्चभेदः प्रतीयेत नचाकांक्षानिवृत्तिः स्यात्। अथयच्छब्दस्यबुद्धिस्थवाचकतयाकोदं
डादिपदार्थएवयच्छब्दार्थः तथाचयच्छब्दार्थस्याक्रियान्वयेकोदंडादीनामन्वयोजातएवेतिचेन्न। एवंहि
कोदंडादीनांपुनरुपादानंव्यर्थमेवस्यात्। तस्मादस्तिकाचित्प्रकारकृतस्तदर्थयोर्भेद इतितदवाच्छि
न्नतयायोगः कथंचिदुपपादनीय एतेनाक्षिप्तच्छब्दार्थत्वमपिनिरस्तं अथकर्तृकर्मणोर्विशेष
णानिकोदंडानिचेन्न। कोदंडेनशरायत्समासादिततदार्जयेतिवाक्यार्थपर्यवसानेपुनर्विशेष्या
कांक्षायाः अनिवृत्तिप्रसंगात्। शरायदित्यादिघनन्वयवाहुल्यप्रसंगाच्च। अतएवकोदंडादिशब्दा
नांकर्तृकर्मणीतद्विशेषणंतुयच्छब्दार्थइत्यपिनिरस्तं॥ अथयेनयादितिसामान्य। — वगमात्॥
केनकिमितिविशेषप्रश्नेकोदंडेनशराइत्याद्युत्तररूपाणिवाक्यांतराणि इतिचेन्न ताद्दशप्रश्नाप्र
वणात् अथसाधुनीयते एवमुत्तरांतेनकोदंडेन [illegible] यत्तदोरेकेनयेनयदासादितंतदार्जयेति

६७ प्रतिज्ञायप्रश्नं विनापिकोदंडादिनिर्देशसंभवेनतदुन्नयनासिद्धेः नचचासादितमित्यस्याक्रियापद
स्यः वचनादिविपरिणामेनानुषंगेकोदंडेनमारः समासादिताइत्यादिवाक्यांतरारंभेकोदोषइतिचेत्
का.प्र. 67 वाक्यभेदः पूर्वपरार्द्धयोरनन्वयतादवस्थ्यात्। लोकेतादृशवाक्यभेदेपिदोषाभावात्तथाप्रयोगइति। व्य
यस्यापिविवक्षितयोगाभावस्यावतारोयथा॥ चापाचार्य्यस्त्रिपुरविजयीकार्त्तिकेयोविजेयः। शस्त्रव्य
स्तः सदनमुदधिर्भूरियंहंतकारः अस्त्येवैतत्किमुकृतवतारेणुकाकंठबाधांबद्धस्पर्द्धस्तवपरशुनाल
ज्जतेचंद्रहासः। अत्ररेणुकाकंठबाधाजन्यात्मनिंद्याभार्गवस्ययोगोविवक्षितः तन्निंदाप्रकरणात्परशोः
स्वक्रियापाटवेनानिंदनीयत्वाच्च। नचतथाप्रतीयतेकृतवतेतितृतीययापरशुनैवसंबंधावगमात् कृ
तवतइतिपाठेतुभार्गवेनिंदायोगः प्रतीयते। यदितुपरशुनिंदानंतरंविदग्ध्योक्त्याभार्गवेपिनिंदावगमस्त
दावगमस्तथापिकृतवतस्त्वयाऽनेनायोगाद्वाच्यायोगोदाहरणमेवैतत्। तथाहि। यथास्यस्पर्द्धायोग्यत्वोपपत्त
येपरशुस्वामिनोमहादेवस्याशिष्यत्वादीनि विशेषणान्युपात्तानि तथातदयोग्यत्वोपपादनायतस्यैवक
ष्ट्रियस्त्रीवनुमुच्चितइतिभार्गवेणकृतवत्स्यान्वयोविवक्षितोनप्रतीयतइतिदुष्टत्वं। एवंचचंडीदास
दिव्याख्यानमनादेयं। क्वचित्समासाच्छन्नतयामतयोगाभावः यथा चत्वारोवयमृत्विजः सभगवान्कर्
मोपदेष्टाहरिः संग्रामाध्वरदीक्षितोनरपतिः पत्नीगृहीतव्रता कौरव्याः पशवः प्रियापरिभवक्लेशोप
शांतिः फलं। राजन्योपनिमंत्रणायरसतिस्फीतंयशोदुंदुभिः। अत्रसंग्रामाध्वरस्यक्रतुत्वेनाध्वर्युसर्व ६७
वान्वयोविवक्षितोनतुप्रतीयतेसमासच्छन्नत्वात्क्वचित्संबंधितिरोधानं यथा॥ जंघाकांडोरुनालोनरव राम:

किरणलसत्केसरालीकरालः प्रत्यग्रालक्तकाभाप्रसरकिशलयो मंजुमंजीरभृंगः भर्तुर्नृत्यानुकारे जयतिनि
जतनुस्वच्छलावण्यवापीसंभृतांभोजशोभांविदधदभिनवोदंडपादो भवान्याः ॥१॥ अत्र तत्पदार्थस्य पार्वत्यायो
गोभिन्नतः दंडपादेनप्रतीयते वाक्ये यत्र प्रधानं तत्रैव निजादिपदस्य सत्त्वेः दूषकताबीजमिष्टप्रतीतिविरह इति नि
त्यदोषोयं। अनभिहितवाच्यमित्याकश्यकेण्यः तेनानभिहितं वाचकपदातिरिक्तमवश्यवाच्यं यत्र तदित्यर्थः
वाचकपदानभिधानेन्यूनपदत्वव्यवस्थापनात् यत्तुन्यूनपदे अप्रतीतिमात्रं अत्रतु विरुद्धप्रतीतिरित्यनयोर्भे
दः अप्रस्तुतस्येति वक्ष्यमाणोदाहरणे चमत्कारसंबंधित्वेन वीराशिषः प्राप्तिरेव विरुद्धप्रतीतिरितिकस्यचिद्व्याख्या
नेतदनुभवविरुद्धतयानुभवस्याप्रतीतेः इदंचान्यथावाच्यस्यान्यथाभिधानाद्वा। अवाचकस्य द्योतकादेरन
भिधानाद्वा। आद्यं यथा। अप्राकृतस्य चरितातिशयैरहृष्टैरत्याहृतस्य मम नामतथापि नास्याकोपेष्टवीराभि
प्रकाक्तिरप्रमेयसौंदर्यसारसमुदायमयः पदार्थः। अत्राहमपहृतोस्मीतिप्रकारेणापहृतत्वस्य विधिर्वाच्यः
तेनवाक्यद्वयसंयंत्रीतयापीत्युपपद्यते द्वितीवाक्यगतत्वेनैवतस्यप्रतीतेः नन्वयमविमृष्टविधेयांशएवाति
वेद्य। नहिविधेयाविमर्शमात्रमत्रदूषणं किंतुतथापीत्यस्यासंगतिरपितदनुरोधेनैवह्यपहृतत्वस्यविधे
यत्वाभ्युपगमो न तु तत्प्राधान्यात्। एतेनावांतरवाक्येन विधेयाविमर्शे समाधानमपोद्यं। बीजाभावात्तद्दाण
मप्पभूत्तेत्यवांतरवाक्यतदुदाहरणे अत्र। प्रस्तुवाक्योदाहरणे विधेयाविमर्शः तथापि द्वितीयभेदे तदसंक
रमात्रेणैव दोषभेदव्यवस्थितिः। यथा। एषोहमद्रितनयामुखपद्मजन्मा प्राप्तः सुरासुरमनोरथदूरवर्ती स्व
प्नेनिरुद्धघटनाधिगतानुरूपलक्ष्मीफलामसुरराजसुतांविधाय॥ अत्र सुरासुराणां मनोरथदूरवर्तीत्यण्व

र्थो वरपवाच्यः अन्यथा अन्यमनोरथविषयत्वं प्रतीयते असमासेप्येव दोषो यथा॥ प्रणयभंगपराङ्मुखचेत
६८ सस्त्वयि निबद्धरतेः प्रियवादिनः अपराधलवं मम पश्यसि त्यजसि मानिनि दासजनं यतः॥१॥ अत्र लवमर्थो
को॰ पृ॰ 68 वरपवाच्य अन्यथा लवानिषेधे स्थूलप्रतीतिप्रसंगात् दूषकतावीजं प्रथमेनियैंता प्रतीतिः अंत्ययोस्तु विरुद्ध
प्रतीतिरितिनि[illegible]दोषोयं। अपदस्थेति। अपदस्य पदमस्थानस्य समासस्य चेति द्वयं इत्यर्थः। अस्थानस्थत्वं वा
योग्यस्थानस्थत्वम्। तयोराद्यं यथा॥ प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने स्रजं न का
चिद्विजहौ जलाविलां वसंति हि प्रेम्णि गुणा न वस्तुनि अत्र न काचिदिति नयोग्यं नञः स्थानं प्रतियोगिसन्निधि
हितयैतिनयत द्वावधानेपि नरवस्तु नरवस्तुवाणः सन्निपातो यमस्मिन्नित्यादौ निरवद्यप्रयोगदर्शनात् परंतु
न काचिद्विजहौ अपितु सर्वा एव विजहुरिति विरुद्धप्रतीतिप्रसंगादयोग्यस्थानं एतद्विरुद्धप्रतीतिजननादि
वविवक्षितोपयोगस्य पदस्योपयोगासंभवादपि स्थानस्यायोग्यत्वं। यथा॥ लग्नः केलिकचग्रहश्लथजटा
लंवेन निद्रांतरे मुद्रांकः शितिकंधरेंदुशकलेनांतः कपोलस्थले। पार्वत्या नखलक्ष्मशंकितसखीनर्मस्मित
व्रीडया प्रोन्मृष्टः करपंकजेन कुटिलाताम्रच्छविः पातु वः॥ अत्र कुटिलाताम्रच्छवि विलनखलक्ष्मशंकावीज
मितितत्सर्वमेव प्रयुज्यमानमुपयुज्यते न तु पश्चादिति स्पष्टं दुष्टवीजं नित्यप्राप्यं। अस्थानस्थसमासं य
था। अद्यापि स्तनशैलदुर्गविषमे सीमंतिनीनां हृदि स्थातुं वांछति मान एष धिगिति क्रोधादिवालोहितः। उ
द्यत् दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात् फुल्लत्कैरवकोषनिःसरदलिश्रेणीकृपाणं शशी॥१॥ अत्र
वीर्धक्रुद्धस्य भाषिणि उक्तिरिति तत्समासस्य योग्यस्थानं न च न कवेरुक्तिरुक्तौ च मितस्य स्थानसमासता ६८

नन्वप्रतिकूलवर्णत्वांतर्भावः समासस्यावर्णरूपत्वान्नापि पतत्प्रकर्षता। अथ मध्ये तस्य प्रकर्षस्याग्रे
त्यागाहितत्संभवो न तु तद्वैपरीत्यं। किंच उभयथोचितस्यैव प्रकर्षाहरणं। ननु मंच हृदयनाथं कंठे मनसस्तमो
रूपं मम पादगतं हृदयनाथं किमिति न पश्यसि मम कंठे गृहाण लक्ष्मोपमं चेतीति यत्र येऽन्योन्यवाक्यस्य पदमादायान
भिमतं प्रतीयते तद्देव दुष्टबीजं प्रतीतीति विशेषो वा एकवाक्ये क्लिष्टत्वमिति ततो भेदः गर्भितं जातगर्भं अंतःस्थितवा
क्यांतरवाक्यमित्यर्थः तत्तु वाक्यं क्वचित्स्वभावत एव एकं क्वचित्तु वाक्यैकवाक्यतया एकीभूतं तत्राद्यं यथा। पाप्य
कारनिरतैर्दुर्जनैः सह संगतिः वदामि भवतस्तत्त्वं न विधेया कदाचन॥१॥ अत्र वदामि भवतस्तत्त्वं इति वाक्यांतरं प्रथम
वाक्ये स्थितं। द्वितीयं यथा। लग्नं रागावृतांग्या सुदृढमिह यथैवासियष्टिररिकंठे मातंगानाम पीहोपरिपर
पुरुषैर्या च दृष्टा पतंती तत्सक्तोऽयं न किंचिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता भृत्येभ्यः श्रीनियोगाद्गदितुमि
व गतेत्यंबुधिं यस्य कीर्तिः॥१॥ अत्र तत्सक्तोऽयं न किंचिद्गणयति विदितं तेऽस्तु न भृत्येभ्यो दत्तास्मीति वाक्यैकवा
क्यमध्ये विदितं तेऽस्त्विति वाक्यांतरं स्थितं प्रत्युत लक्ष्मीस्ततोपसरतीति विरुद्धमतिकारित्वात् प्रकाशितवि
रुद्धं प्रतीतिरुद्भेदो दुष्टबीजं अतो न यत्र प्रतीतिर्विच्छिद्यते तत्र नायं दोषः। प्रसिद्धिहतं मंजीरादिषु रणितप्रा
यं पक्षिषु च कूजितप्रभृति स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखं इति प्रसिद्धिमतिक्रांतं यथा। महाप्र
लयमारुतक्षुभितपुष्करावर्तकप्रचंडघनगर्जितप्रतिरुतानुकारी मुहुः रवः श्रवणभैरवः स्थगितरोदसीकंद
रः कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः रवो मंडूकादिष्वेव कविप्रसिद्धो न तूक्तविशेषे सिंहनादे न वा वा
चकसंकरः तुल्येनैव रूपेण भयस्यापि समवेदकत्वे न वियोग नियमात् अत एवायं वाक्यदोषः। विसे

षणाविशेषाणांसन्निधानेनविशेषपरत्वादिति। भग्नप्रक्रमं भग्नः प्रक्रमः प्रस्तावौचित्यंयत्रतत् तच्चानेकधाव्यवस्थि
तं। तत्रप्रकृतेःक्रमभंगोयथा। नाथेनिशाया नियतेर्नियोगादस्तंगतेहंतनिशापियाता। कुलांगनानांहिदशानुरूपं
नातःपरंभद्रतरंसमस्ति।१। अत्रास्तंगतेइतिगमेःप्रकृतेःप्रस्तावेयातेतियातेःप्रकृतिप्रक्रमभंगः भिन्नाभ्यामुप
स्थापितं भिन्नवद्भातीतिकुलांगनानांस्वापिनि पुसदृशावस्थाप्रतीतिर्नसंभवति। तस्माद्गतानिशापीतियुक्त
पाठः ननुनैकपदंद्विःप्रयोज्यंप्रायेणेतिवामनसूत्रं। अत्रापिकथितपदमनुपदमेवोक्तं तथाचपुनर्गमेःप्रयोगो
दुष्टःस्यादितिचेन्न। उद्देश्यप्रतिनिर्देश्यातिरिक्तंएकपदंद्विःप्रयोगनिषेधविषयः तादृशेतुविषयेप्रत्युततत
स्यैवपदस्यसर्वनाम्नोवाप्रयोगंविनादोषः। यथा। उदेतिसवितातामस्ताम्रएवास्तमेतिच। संपत्तौचविप
त्तौचमहतामेकरूपता।१। इत्यत्ररक्तएवास्तमेतिचेतियदिक्रियते तदापदांतरप्रतिपद्यमानःसएवार्थोभि
न्नइवप्रतीयमानः प्रतीतिंव्यवधत्ते। प्रत्ययस्ययथा। यशोधिगंतुंसुखलिप्सयावा मनुष्यसंख्यामतिवर्त्ति
तुंवा। निरुत्सुकानामभियोगभाजांसमुत्सुकेवांकमुपैतिलक्ष्मीः। अत्रतुमुन्क्रमेणसनोभिधानंएकरू
पताप्रतीतिंस्थगयतिसुखमीहितुंवेतियुक्तः पाठः सर्वनाम्नोयथा। तेहिमालयमामंत्र्यपुनःप्रेक्ष्यचशू
लिनं। सिद्धंचास्मैनिवेद्यार्थंतद्विसृष्टाःखमुद्ययुः। अत्रास्मैइतीदमःप्रक्रमात्तद्विसृष्टाइत्यत्रापितच्छब्देनेनवि
सृष्टाइत्येववाच्यं। नचतदिदमोरर्थभेदः इदमःप्रस्तुतपरत्वस्यतत्परामर्शकत्वात् अन्यथातयोःपर्यायताप
त्तेः पर्यायस्ययथा।। महीभृतःपुत्रवतोपिदृष्टिस्तस्मिन्नपत्येनजगामतृप्तिं। अनंतपुष्पस्यमधोर्हिचूते
द्विरेफमालासविशेषसंगा। अत्रापत्येपुत्रवत्सुसत्स्वपितस्मिन्नपत्येस्नेहातिशयविवक्षादपत्यशब्दप्रयो

गात्सर्वीयक्रमभंगः। केचित्तुतेषुपुत्रेसुतायांस्त्रीहोयुक्तस्तस्यतुसत्यपिपुत्रेऽस्यांसोऽभूदितिविवक्षाएवंनात्र
दोषप्रतीतिरितिसमादधिरेतदयुक्तं। अनंतपुष्यस्यसूतइतिदृष्टांतवैषम्यप्रसंगात्तत्रसामान्यविशेषभावेन
उपादानाद्दा[ष्टां]तिकेतथैवौचित्यात्। तस्मादपत्यवत्सोऽपीतियुक्तःपाठः। नचात्रापिवितुष्टालाभात्दृष्टांतवै
षम्यं संगात्तत्रसामान्यविशेषभावेन। अपत्यान्यस्यसंतीतिबहूर्थएवमतुपोविधानात् एतेनसाध्वेरवपुत्र
वतइतिपठः इत्यतः केचिदित्यनेनसांप्रदायिका इत्यर्थकेनदर्शितस्तोत्रानुमतिरेवेतिचंडीदासमतमनादेयं।
अथापत्यपुत्रशब्दयोः कथंपर्यायता। तत्रकेचिदपत्यपर्यायोयथापुत्रशब्दः अन्यथापुत्रीत्यत्रस्त्रीप्रत्ययस्यकुत्रा
न्वयःस्यात्॥ तत्रयुक्तः तथासतिदोषस्यैवाप्रसंगात् अपसार्थकत्वाविशेषात् तस्मात्पर्यायत्वमेकार्थप्र
तिपादकत्वमात्रेननत्वेकप्रकारकप्रतीतिजनकत्वमपीति अतएवलघुतामुपक्रम्यागरीयानिति उक्तावपिपर्याय
क्रमःभंगउच्यते यथा। विपदोऽभिभवंत्यविक्रमंरहयत्यापदुपेतमायतिः नियतालघुतानिरायतेरगरीयान्नपदं
नृपःश्रियामिति। अत्रैवविपदापदोरुपसर्गक्रमभंगोद्रष्टव्यः तदभिभवःकुरुतेनिरायतिं लघुतांभजतेनिरा
यतिर्लघुताभागयदंनृपःश्रियामितिपाठोयुक्तो यदिन[?]दोभंगः। काचित्कीर्णारजोभिर्दिवमनुविदधौमं
दवक्रेंदुलक्ष्मीरश्रीकाः काश्चिदंतर्दिशइवदधिरेदाहमुद्भ्रांतसत्त्वाः भ्रेमुर्वात्याइवान्याः प्रतिपदमपराभूमि
वत्कंपमानाः प्रस्थानेपार्थिवानामशिवमितिपुरोभाविनार्यःशशंसुः॥ अत्रकाचि[?]दित्युपक्रम्यका
श्चिदितिवचनक्रमभंगः तस्मात्काश्चित्कीर्णारजोभिर्दिवमनुविदधुर्मंदवक्रेंदु॥ लक्ष्मीरश्रीकाः काश्चि
दंतर्दिशइवदधिरेदाहमुद्भ्रांतसत्त्वाः॥ शोभानि श्रीकाइतिपठनीयं कंपमानाइति कंपमाना[?]इतिपठनी
यं भ्रमणस्थानेवाराणसीभ्रमक्रियांतराभिधायकत्वनियमात् नचावाक्रियांतरा[भि]धानमस्तिगाहतांमहिषा

नियानसालिलंश्टंगैर्मुतुस्ताडितं धायावङ्ककंदवकंम्लगकुलंरोमांचमभ्यस्यतो विघ्नस्ते: क्रियतांबवाहप
७० 70 तिभिर्मुस्ताह्नातिःपल्वलेविश्रामंलभतांमिदंचाशिथिलज्यावंधमस्मद्धनुः॥१॥अत्रगाहंतामितिकर्तृकारक
का० प्र० तिभिर्मुस्ताह्नातिःपल्वलेविश्रामंलभतांमिदंचाशिथिलज्यावंधमस्मद्धनुः॥१॥अत्रगाहंतामितिकर्तृकारक
वाचकातिङ्प्रक्रमेक्रियतामितिकर्मकारकवाचकस्य विघ्न[illegible]स्सारवयंतुमुख्यकरवराइत्युक्तं।अत्रकाति
ततपस्तेजोवीर्य्यप्रथितिमिति पोनिधावविततयमदाधमातेरोषानमुनावभिगच्छति अभिनवधनुर्विद्यादर्प
क्षमायचकर्मणेस्फुरतिरभसासाणि:पदोपसंग्रहणायच तेजोवीर्य्यरोषौक्रमेणोपक्रम्यतदुभयोरवि
तयो:पदोसंग्रहधनुर्ग्रहणयो:पौर्वापर्य्ययोग्यंयथासंख्यमनुद्देशः समानामितिन्यायादितितदन्यथा
करणेक्रमप्रक्रमभंग:।एवमन्यदप्यूह्यं अत्रसर्वत्रैकरूपप्रस्फुटतायाःप्रतीतेःस्थगनमुपघातोवादूषक
तावीजं यदुक्तप्रक्रमस्यान्यथात्वेनप्रतीतौप्रस्खलत्तो ह्लादःस्फुरन्ननास्वादीयजग्लानत्वमभ्येते दोषः
प्रक्रमभेदाख्य:शब्दानौचित्यभूस्थस इति अतएवनित्यदोषोयं अक्रमंअविद्यमानःक्रमोयत्रतत् यसद
नंतरयसदोपादानमुचितं ततोन्यत्रतदुपादानंयत्रेसर्थ:।यथा।द्वयंगतंसंप्रतिशोचनीयतांसमागमप्रार्थ
नयाकपालिक:कलावसाकांतिमतीकलावतीत्वमस्यलोकस्यचनेत्रकौमुदी॥१॥अत्रत्वाशब्दस्यचेतिच
कारस्यत्वशब्दानंतरंयुक्तः त्वशब्दार्थस्यैवशोच्यतायांसमुच्चयस्यद्योतनीयत्वाल्लोकपदार्थसमुच्चयाभा
वात अथयापदस्यपदादस्यकोभेदः तत्रप्रतीत्यंतरमत्रसैवप्रतीतिः किंतुविलंविताति केचित्तन्न।कुप्लाता
मुग्धविरित्युदाहृते अपदस्यपदेप्रतीत्यंतराभावात।वयंतुतत्रब्रूमः।अव्यवधानेनैवयच्चाभिमतप्रतीतिज
ननसामर्थ्यंतदेतस्यविषयः अन्यःपुनरीतिरस्यवादीनामव्ययताहितपदार्थैवसमुच्चयादिद्योतकता ७०
यदुक्तम् महेशभट्टेन॥ अतएवव्ययानितिद्वा...नेदं...तिचाह्नि:संबंधीतस्मात्सकिमुपदद्युरनंतरे इति।न राम०

[illegible]

वेनजोपिअव्यवहितस्यैवतयात्वमतः सुजंन्मकपाचिद्विजहावित्यादिकमप्यक्रमत्वेदः स्यादिति वाच्यम्।
नखलुनरवलुवाणः सान्निपात्योयमस्मिन्नित्यादोव्यवधानेपिप्रतीतिविशेषाभावात् नचायंवादिपदेष्वे
वदोषः किंतुद्वयमादिष्वपियथा। शाक्तिनिस्त्रिंशजेयंतवभुजपुगलेनाघदोषाकस्त्रीर्वक्रेपार्श्वेतथैषा
प्रतिवसतिमहाकुहिनीषड्गयष्टिः अत्रेयंसर्वगात्रेप्रसरतिपुरतः किंमयावद्धयातेशोच्यैवेत्यंत्रकोपात् सि
तकरसितयायस्यकीर्त्याप्रयातं।१।अत्रयदस्यंशोच्यैवेतिवाच्यं इदंशब्दस्याव्यवहितपरामर्शकत्वात्।पाद
त्रयस्यैवपरामर्शणीयत्वात् एवंलग्नंरागाव्रतांगेत्यादावपिद्वितिस्त्रीनियोगादितिवाच्यं।इतरेपितन्तुसत्वात्
दूषकतावीजंचोद्देश्यप्रतीतिविरहइतिनित्यायं अमतपदार्थः अमतःपदार्थोद्वितीयोर्थोयस्यतत् अमतत्वंच
प्रकृतरसेविरोधित्वं यथा शृंगारवीभत्सौ तथावीरभयानकौ रौद्राद्भुतौतथाहास्यकरुणौवैरिणौमिथ इत्याद्युक्तदिशाप्रकृ
२ तरसविरुद्धरसव्यंजकत्वं। यथा।राममन्मथशरेणताडितादुःसहेनहृदयेनिशाचरी गंधवद्रुधिरचंदनो
क्षिताजीवितेशवसतिंजगामसा।।अत्रप्रकृतस्यवीभत्सस्य विरोधीशृंगारः तस्यव्यंजकोद्वितीयो
र्थः तादृशोपास्थितेस्तारसापकर्ष = स्यदोषत्ववीजमतोनित्योयंदोषः नीरसेत्वात्मलाभस्यैवाभावात्
मर्थदोषलक्षणान्याह।।अर्थोऽपुष्टः कष्टोव्याहतपुनरुक्तदुःक्रमग्राम्याः।संदिग्धोनिर्हेतुःप्रसिद्धि
विद्याविरुद्धश्च अनवीकृतःसानियमानियमविशेषाविशेषपरिवृत्तः साकांक्षोपदमुक्तःसहचरभिन्नःप्र
काशितविरुद्धः विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः।१।पददोषलक्षणस्त्रवस्यंदुष्टमितिप
दंलिंगपरिणामेन संबध्यते।।तत्रापुष्टः पुष्टभिन्नः पुष्टत्वंचविवक्षितार्थवाधप्रयोजकानुपादानत्वं।
तद्भिन्नश्चद्विधा। अप्रयोजकत्वात् प्रयोजकत्वेपिमूलकत्वाच्च यथाेनंव्यर्थमातुर्गतार्थं यद्यप्यस्यान्निः

७१ ॥ प्रयोजनमित्यनेन भोजराजो व्यर्थमाह । अत एव प्रकाशकारोऽपि अविवक्षितवाच्यो नत्पादने पि प्रतीयमानमर्थं न बाधं

का॰ प्र॰ त इत्येवाहुनत्वप्रयोजकत्वमेवेति उदाहरणं । अतिविततगगनसरणिप्रसरणप्रसरणपरिमुक्तविश्रमानंदः मरु

ल्लासिजसौरभकमलाकरहासः सखे द्रु विजयति ॥ अत्रातिविततेनिरवलंबे व्योम्नि विश्रामं गमनादितरा प्र

कारप्रयुक्तकमलप्रकाशनाद्युरवेरुत्कर्षो विवक्षितः तत्रातिविततत्वं गगनस्यार्थादेवावगम्यते । अग्रे निरवलंबस्य प्रसर

णत्वं मरुदुल्लासितसौरभत्वं चाप्रयोजकमेवेत्यदुष्टा एवेत्यर्थाः । नन्वेते पौनःपुन्ये दुष्टाः । इति सिद्धं परंतु अतिविततेति

पुनरुक्तः गगनपदादेव तदुपस्थितेर्मरुदुल्लासितसौरभे [redacted] ति विरुद्धं

विकासात्पूर्वं सौरभाभावेन तद्विशिष्टस्य सूर्येण प्रकाश्यत्वादितिनायं दृष्यमितिचेन्न । गगनपदं न विततत्व

शक्तं अर्थत्वस्य वचनपुनरुक्तता ॥ यदुक्तं भोजराजेन । काव्येतिहासादिवर्णनाद्यानलब्धस्य साहाय्यात् म

णनमपौनरुक्त्यायेति नापि विरुद्धं सौरभस्योपलक्षणत्वात् यद्वा विवेहेतुपुरस्कारेण पूर्वभावाभिधाना

त् अत्याधिकपदस्य कोभेदः अप्रयोजके प्रयोजनाभावकृतोऽपि भेदोपेन संभवति । अवचकाश्चिन्नवपदा

र्थान्वयसमकालं दुष्टत्वप्रतिभासः इह तु तदनंतरमिति विशेष इति तत्रातिसमीचीनं तथा नियमे प्रमा

णाभावात् ॥ एतावता च विशेषेण शब्ददोषत्वमेकस्यापरस्यार्थदोषत्वमिति विभागानुपपत्तेश्च विरुद्ध

मतिकृद्दमतपरार्थ्यादौ शब्ददोषेऽन्वयप्रत्ययोत्तरमेव दुष्टत्वप्रतिभासात् वयं तु पश्यामः यत्र वि

वक्षित एवार्थोऽन्यथाभिधानेऽपि दुष्यति सोऽर्थदोषः अन्यस्तु रसदोषभिन्नः शाब्ददोष इति विव

कः । तथा च यत्राविवक्षितोऽप्यर्थः रूपांतरेणान्विततयाभिधीयते तत्राधिकपदत्वं तत्सदनविनापि ७१

तन्निर्वाहात् । यत्र तु सोऽर्थो विवक्षित ... प्रयोजन ... भ्यस्ता भ्यांस दोनोपात्तुमर्हः राम॰

अतिशयो क्तिः ९

तत्रापुष्टत्वं स्फटिकाकृतीत्यत्र नाकृतिपदार्थ उपमानत्वेन विवक्षितः नतु तत्कृतिव्यतिरेकः सर्वार्थे तयैव क्रमा
त् किंतु धर्मदोनुरोधादिनाद्वयमपि कथंचिदान्वितत्वेनोपात्तमित्यधिकपदत्वं स्यात् किंततेत्यादेरप्रतीतिवितत्वादिकं
वक्तुर्विवक्षितमेवं परं त्वर्थलभ्यत्वादिनानोपादा नार्हमित्यपुष्टं व्यक्तं च पूर्वस्य शब्ददोषत्वमुत्तरस्य त्वार्थ
दोषत्वं इति दूषकताबीजं चाशक्त्युभयत्रयपनेयत्वेतु वैरस्य। अतएव यमकादावदोषता तत्रालंकारांतर
रेणाशक्त्युन्नयनात्। कर्णावतंसादिपदे चाविशेषद्योतकतया तदुपादानं नाशक्त्युन्नायकमित्यपुष्ट
त्वं अतएव विशेष्यप्रयोगेपि दोषाभावः कष्टः प्रतीतिक्लेशवान् दुरूह इत्यर्थः यथा। सदामध्ये यासामि
यममृतनिस्यंदसरसा सरस्वत्युद्दामा वहति बहुमार्गा परिमलं प्रसादं ता एव घनपरिचयाः केन महतां म
हाकाव्यव्योम्नि स्फुरितरुचिरा यांतु रुचयः अत्र यासां कविरुचीनां मध्ये सुकुमारविचित्रमध्यात्ममार्ग
त्रयवती भारती चमत्कारं वहति ता गंभीरवाक्ये घनपरिचिताः कथमितरकाव्यवत् प्रसन्ना भवंतु। यथा याः
सामादित्यप्रभाणां मध्ये वियद्गगानदी संबंधवहति ता मेघपरिचिताः कथं प्रसन्ना भवंतीत्यर्थे विवक्षितः
स च शब्दांतरैरविक्लेशेनैव प्रतीयत इत्यर्थ एवायं दुष्टः। क्लिष्टत्वादिकं तु शब्द दोषो घटनांतरेणार्थस्य
सुखेनैव प्रतीतेः सम्यक्प्रतीतिविरहश्च दूषकताबीजं अतो नित्यदोषो व्याहतः उत्कर्षो वापकर्षो वा यस्य
स्यैव निगद्यते तस्यैवाथ तदन्यस्य च व्याहतोर्थस्तदा भवेदित्युपलक्षितविरुद्धत्ववान्। यथा। जगति जयि
नस्ते ते भावा नवेंदुकलादयः। प्रकृतिमधुराः संत्येवान्ये मनो मदयंति ये। मम तु यदियं याता लोके विलो
चनचंद्रिका नयनविषयं जन्मन्येकः स एव महोत्सवः अत्र हर्षोद्रेकेणावधारणा चंद्रिका चंद्रकलादयः।

परिचिताः इति वा पाठः

स्वंप्रत्यक्षात्तयाप्रतिपादितः। तेनैवोत्तरार्धे चाङ्कत्वमुत्कर्षापादोप्यत एवातिव्याघातः दूषकतावीजं च वाच्यार्थाप्र
७२ 72 तीतिरयं नित्यदोषः पुनरुक्तः। शब्देन प्रतिपन्नत्वे सति पुनस्तेनैव प्रतिपादितः अर्थेन प्रतिपन्नस्य प्रतिपाद
का॰ प्र॰ नेऽपुष्टत्वमुक्तं यत्तु प्रयोजनं किंचिदिति विशेषणमिति तदयुक्तं। एवं सत्यस्यानित्यदोषत्वं न स्यात् प्रयोजनस्य
लेशेऽपुनरुक्तस्यैवाभावप्रसंगात् स चायं द्विधा पदार्थवाक्यार्थभेदात् तयोराद्यो यथा। अरेरे अर्जुनार्जुन सात्य
के सात्यके न युक्तं इह शोभनं तातस्य कृतशोकप्रात्यान्यत्र शस्त्रस्यादि वमुपगाच्छतः केशाकर्षणरूपः परिभवः त्वं पिच
रुतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मार्यादैर्भवद्भिरुदायुधैः नरकरिपुणा सार्धं तेषां सभीमकिरी
टिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिः॥ १॥ अत्रार्जुनार्जुनेति संबोध्य यैर्भवद्भिरित्यनेन एवमिष्यते
वामित्यनेन परामर्शात् अर्जुनस्यापि प्राप्तेः सभीमकिरीटिनामिति किरीटिपदार्थः पुनरुक्तः न च प्राधान्यप्रतिपत्त
ये पुनरुपादानमित्यदोषः। संबोधनेनैव तल्लाभात् वाक्यार्थस्य पुनरुक्तत्वं यथा। अस्त्रज्वालावलीढप्रतिबलजलधे
रंतरौर्वायमाणे सेनानाथे स्थितेऽस्मिन् मम पितरि गुरौ सर्वधन्वीश्वराणां कर्णालं संभ्रमेण व्रज कृप समरं मुंच हा
र्दिक्य शंकां ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः॥ १॥ अत्रालं संभ्रमेण को भयस्यावकाश इत्यभिन्नार्थो
न च वक्तुः रौद्ररसाविष्टत्वं समाधानमाशंकनीयं। वीरस्याप्युक्तकारित्वावर्णानात् दूषकतावीजं च निःप्रयोजनाभिधा
नेन श्रोतुर्वैमुख्यं अत एव प्रयोजनसत्त्वेनादोषत्वादनित्योयं दोषः। केचित्तु अर्थप्राप्तस्यापि वचनेऽपुनरुक्तता त
दुदाहरणमस्त्रज्वालेति अप्रयोजिकाभिधानमात्रस्यत्वेऽपुष्टार्थत्वमित्याहुः। दुःक्रमो दुष्टः क्रमो दुष्टत्वं च क्रम
स्य लोकशास्त्रविरुद्धत्वं॥ तद्यथा। भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सवः विश्राणय तुरंगं मे मातंगं वा मदाल ७२
सं अत्र तुरंगं भूपिष्ठं प्रतिमातंगं देहि तुरं वेति लौकिकक्रमगरुदानाप्रक्रांतत्वघुरनौचित्यात् वकुत्सयन्या स्थि राम॰
त एव क्रमो विवक्षित इत्ययं दोषः त्वावाय॥ ... जितश्री जे ... जेतः अरणकुस्व

तंतिह वारे जोऽसि अंप्राघ्रि दुंचालिदो नहत्राा दिज्ञानपूर्वकं द्वयोरस्य शास्त्रेण विधानात् ताद्दिशकंमदंदूषता
वीजं विरोधेनाप्रतीतिः सहृदयोद्वेगो वेति नित्य एवायं॥ ग्राम्यो ग्रामसंभवः अर्थादग्धोक्तिप्रतिपादितो रिरंसादिश्च
यदुक्तं सग्राम्योर्थो रिरंसादि पामरैर्यत्कथ्यते वैदग्ध्यवक्रिमवलाहित्वेव वनितादिषिति यथा। स्वपिति या
वदयं निकटे जनः स्वपिमि तावदहं किमपयाति ते। तदपि संहरकूर्परमायतं त्वरितमूरुमदंचयकुंचितं। अत्रनिकटे ता
वदहं स्वपिमि इत्यविदग्धस्य रिरंसोक्तिमन्यत् हृष्टताश्लीलवत् किंचैतादृशोक्ति वालितो विभावादिरूपो येन
वदहं स्वपिमि इत्याविदग्धस्य रिरंसोक्तिमन्यत। संदिग्धः संदेहविषयस्तत्प्रयोज
रसाय पर्यायते स्पष्टमिव वीजसंकुरायेति। संदिग्धः संदेहविषयस्तत्प्रयोज
रसाय पर्याप्यते स्पष्टमिव वीजसंकुरायेति। मात्सर्यमुत्सार्य्य विचार्य्य मार्य्याः समर्यादमुदाहरंतु। सेव्या नितंवाः किमु भू
धरूपवानितिपावात् यथा। मात्सर्य्यमुत्सार्य्य विचार्य्य मार्य्याः
धराणां किमुस्मरस्मेरविलासिनीनां। अत्रभूधरनितंवानां कामिनी नितंवानां वा सेव्यत्वं व्यंजनया प्रतिपाद
पितुं द्वितीयेन संदिह्यते प्रकरणाद्यभावात्। यत्तु वक्तृविशेषसंदेह इति व्याख्यानं सर्वमान्यानां तदज्ञानता
विलसितं वक्तुः पदवाक्यार्थत्वाभावेन तत्संदेहस्यार्थदोषत्वाभावात् अतएव वक्तिरूतावक्तृविशेष्यानिश्चयः
संदेहाभावप्रयोजकत्वेनोक्तः। तन्निश्चये एकतरनितंवस्य सेव्यत्वनिर्णयेनासंदेहात् वंघामित्यादौ द्वितीया
सप्तम्यंतत्वाभ्यां पदस्यैव संदेहोऽत्र तु पदानामसंदिग्धत्वे सत्येव स इति पदसांदिग्ध्यत्वाद्भेदः दूषकताबीजं च उ
द्देश्यनिश्चयविरहः यत्र तु संदेह एवोद्देश्यं तत्रादोषत्वमेवेति निर्हेतुः निःक्रांतो हेतुर्यस्मात् यथा। गृहीतं
तं येनासीः परिभवभयान्नोचितमपि प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः। परित्यक्तं तेन त्वमसि सुतशो
कान्न तु भयाद्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते अत्र शस्त्रत्यागे हेतुर्नोपात्तः ननु तं विना
प्रतीतेः पर्यवसानेन वा। न्याघेतोचाभावः अंतेसामान्तसंकर इति अत्र काश्चित् उपात्तस्य परेणान्वयेऽसा

॰ मत्तैलैङ्गोत्स्नानस्यकाशानं च लोकविरुद्धेऽपि कविसमयप्रसिद्धे दूत्यदोषः एवमकीर्त्यादि मालिन्यादौ द्रष्टव्यं यत्तु उपरि सरंगोदावर्ण्यः ॥
कौशलत्वं अनुपादानेनिर्हेतुत्वमितिविशेषग्रंतेतन्न। साकांक्षोदाहरणेउपेक्षितुमित्याकांक्षातीत्यनेनानुपा उ॰ टि॰ १०
७३ 73 नस्यकांक्षतायाएवव्यञ्जितोप्रदर्शनात् तस्माद्धेतुतद्भिन्नसापेक्षतया द्वयोर्भेदस्वस्पवज्यायः। यद्वा। स्वत्राप्रती
का॰ प्र॰ तिमात्रंतत्रतुविरुद्धाप्रतीतिः स्त्रीरत्नएवायमर्थप्रतीतिरितिविशेषः दुष्टबीजंचउद्देश्यप्रतीतिविरहः
अतएवप्रसिद्धावनुपादानेपिनदोषः प्रसिद्धिविरुद्धोलोकस्यकवेर्वायवार्थेनप्रसिद्धिः। यथा। इदंते
केनोक्तंकथयकमलातंकवदनेपदेतस्मिन्हेम्नः कटकमितिधत्सेखलुधियं इदंतुदुःसाध्यक्रमणपर
मास्त्रंस्मृतिभवातवप्रीत्याचक्रंकरकमलमूलेविनिहितं अत्रकामस्यचक्रंलोकेकविमार्गेवानप्रसिद्ध
मितिप्रसिद्धविरुद्धः यत्रतुलोकस्यकवेश्चप्रसिद्ध्योर्विरोधस्तत्रकविप्रसिद्धेर्बलवत्त्वं। तथाचलोकविरु
द्धेपिकवीनांयथायत्रसमयस्तत्रनदोषः यथा। असितवसनालंकारायांकदाचनकौमुदीमहसिसु
दृशिस्वैरंयांत्यांगतोस्तमभूद्विधुः तदनुभवतः कीर्त्तिःकेनाप्यगीयतयेनसापतिगृहमगान्मुक्ताशं
काव्यनासिद्धुष्प्रभपदः। अत्रकीर्त्तेःपरिस[redacted]जताधवगाः सरणिमपरोमार्गस्तावद्भवद्भिरवेक्ष्यतां
इहाहिविहितोरक्ताशोकःकयापिहताशयाचरणनलिन्याः सोदंचन्नवांकुरकंचुकः इतिकविसमयप्रसि
द्धोदाहरणं। तदप्युक्तम्। चरणन्यासेनाशोकांकुरस्यकवीनामप्यसंगतेः पुष्पोद्गमएवतेषांसमयात् द्र
ष्टकताबीजंचविरोधादर्थाप्रतीतिरितिउसाता दिनातत्प्रतीतावदोषः विद्याविरुद्धः शास्त्रेणविरुद्धवान्
सचार्थशास्त्रभेदाद्भिद्यते तत्रधर्मशास्त्रविरुद्धोयथा। सदास्नात्वानिशीथिन्यांसकलंवासरंबुधः। नानावि
धानिशास्त्राणिव्याचष्टेतिशृणोतिच। गृहोपरागादिकंविनारात्रौस्नानंधर्मशास्त्रेणप्रतिषिद्धमितित
७३
राम॰

ले२

विरुद्धोयमर्थः। अर्थशास्त्रविरुद्धो यथा। अनन्यसदृशं बाहोर्बलं यस्य किलो ऽपि तेषां कुसानुरुक्तिस्त्वस्यसत्यस्या लिः प्रयोजना। अत्र महावैस्यापि संध्यादिषड्गुणानुसरणमर्थशास्त्रेण विहितं मतिता विरोधः। कामशास्त्रवि रुद्धो यथा। अष्टांगयोगपरिशीलनशीलनेन दुःसाधासिद्धिसविधां विदध दूरे। आसादयन्नभिमतामधुना विवेकख्यातिं समाधिनमौलिमणिर्विमुक्तः॥१॥ अत्र मुक्तिसमीपस्थमसंप्रज्ञातयोगमनपेक्ष्यैव मोक्षो योगशा स्त्रे विरुद्धः। विवेकख्यातिः प्रकृतिपुरुषयोर्भिन्नलक्षणानरूपान्ततो वितर्कविचारादिघनसारि रूपः संप्रज्ञातयो गः पश्चात् स्वरूपमात्रावलंबनरूपोऽसंप्रज्ञातयोगः। ततो मुक्तिर्नतु विवेकख्यातिमात्र एवेति हि योगशास्त्रे एवं तु रंगादिशास्त्रविरोध्यूहनीयः। अभिमतप्रतीतिविरहो दूषतावीजं। अनवीकृतः भंग्यंतरेणयत्नेवलं तन्नशापि तः भंगीनिर्दिष्टानेकार्थ इत्यर्थः। यथा। प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं संमानिताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किं॥१॥ अत्र समर्थेष्वर्थेषु ततः किमित्येकैव भंगीः अर्थे यदि पर्यायांतरप्रयोगे भंगेरेकरूपतायामसांकर्यात् अर्थानवीकृतं तदोहदू। यदि वकाथितपदे एवांत भविष्यतीति चेन्न। पर्यायांतरप्रयोगे भंगेरेकरूपतायामसांकार्यात् अर्थानवीकृतं तदोहदू। यदि दहत्यनलो ऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः। लवणमंबु सदैव महोदधेः प्रकृतिरेव सतामविषादिता इतीह कृ। अत्र सतामविषादितास्वाभाविकीति नाश्चर्याय। यथा। अनलादेर्दाहकत्वादीति विवक्षितं तत्र च ततः किमि त्यादिना किमद्भुतमित्यादि नवीकृतं पारुष्येनाशक्तिप्रकाशनेनवासहृदयोद्वेजकत्वं दूषताबीजमिति नि यदे षोयं। सनियमादिभिश्चतुर्भिः परिवृत्तपदान्वया ऽसनियमपरिवृत्तादिचतुष्टयं लभ्यते। परिवृत्ति च सनियमा नियमयोर्विशेषाविशेषयोश्च अविशेषः सामान्यं तत्र सनियमपरिवृत्तः सनियमत्वेन वक्तुमुचितो ऽनियम त्वेनोक्तः नच न्यूनपदत्वे [redacted] अनभिहितवाच्यत्वे वानुप्रवेशः तास्वर्थे विवक्षिततयोर वकाशात् अविवक्षितत्वे

नतत्प्रसरात् अत एवायमर्थदोषः विवक्षितमात्रस्य पदांतरेणाप्युपस्थितौ तस्य तादवस्थ्यादेवमितरेष्वप्यूह्यम्
यत्तु अर्थत्वेन विशेषणं समाधानमिति तन्न। न्यूनपदादित्रिचतुर्णां संकरप्रसंगात्। वंडीदासस्तु शब्दो
च्चारणानंतरमेव पदत्वातिभासः सशब्ददोषो यस्य त्वर्थप्रत्ययानंतरं सोर्थदोषः अत एवानभिहितवाच्यादिप्रवृ
त्तेरित्याह। तच्चायुक्तं। बहुषु स्थानेषु व्यभिचारात् शब्दार्थविभागस्यासंगतत्वात्। उदाहरणं। यत्रानुल्लि
खितार्थमेव निखिलं निर्माणमेतद्विधे रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा। याताः प्राणभृ
तां मनोरथगतीरुल्लंघ्य यत्संपदस्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितं॥१॥ अत्रान्याप
देशे आभासमात्रेणमणीकृतेष्विति वाच्ये गुणांतरव्यावर्त्तनेन निंदाशयप्रतीतेः अनियमे तु न निंदनी
यानां गुणांतरव्यवच्छेदप्रत्ययः तस्माच्छायामात्रमणीकृताश्मसु मणेस्तस्याश्मत्वमेवोचितेति प
ठनीयं अयं तु न्यूनपदेनैव गतार्थः बाधकत्वमेव दुष्टवीजं नित्यदोषोयम्। अनियमपरिवृत्तो य
था॥ वक्त्रांभोजं सरस्वत्यधिवसति सदा शोण एवाधरस्ते बाहुः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षि
णस्ते समुद्रः वाहिन्यः पार्श्वमेताः क्षणमपि भवतो नैव मुंचंति देवस्वच्छे तन्मानसेस्मिन्नवतरति कथं
ते नु पानाभिलाषः॥१॥ अत्र शोण एवेति नियमो न वाच्यः वैयर्थ्यात् प्रत्युतान्यजलाशयानालप्रतीतौ
पिपासानौचित्यातिशयाप्रतीतेः अधिकपदभेदोदूषकतावीजं च पूर्ववत्। विशेषपरिवृत्तो यथा। श्या
मां श्यामलिमानमानयत भोः सांद्रैर्मसीकूर्चकैः मंत्रं तंत्रमपि प्रयुज्य हरताश्वेतोत्पलानां श्रियं चं
द्रं चूर्णयतत्क्षणाच्च कणशः ... दिशास्तत्क्षणं मुद्रांकिताः

१ अन्यज्योत्स्नाभितिमात्रो विशेषो वा वाच्यः अपरविशेषस्य स्वत एवश्यामत्वात्। तत्राकांक्षाविरहात् इद
मेव दूषकताबीजं अन्यत्र विरोधिकमपि दुष्टबीजं द्रष्टव्यं। विशेषनियामकप्रकरणादिसत्वे त्वदोषत्वं। सामान्य
परित्यक्तोपयो॥ कल्लोलवेल्लितदृषत्परुषप्रहारै रत्नान्यमूनि मकराकरमावमंस्थाः। किं कौस्तुभेन भवतो विहि
तो न नाम यांचाप्रसारितकरः पुरुषोत्तमोपि॥२॥ अत्र कौस्तुभेनेति विशेष्यतो रत्नवचनमनोचितं कौस्तुभ
तो न नाम यांचाप्रसारितकरः पुरुषोत्तमोपि
मत्रिस्योपकारकत्वेनान्यावमाननिषेधायोगात् एकेन किं न भवतो विहितः स नाम इति पाठे तु भेदानवगमात्
विवक्षितनिर्वाहः तदनिर्वाहादिकं च दूषकताबीजं। इति नित्य एवायं। साकांक्षस्य आकांक्षया वर्त्तते इत्य
दार्थान्वयाय विशेषणसाकांक्ष इत्यर्थः निर्हेतुभेदस्तु तदवसर एवोक्तः। उदाहरणान्तरं। अर्थित्वे प्रकटी
पिन फलप्राप्तिः प्रभोः प्रत्युत उघ्नन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया। उत्कर्षं च परस्य मानयशसो
र्विस्रंसनं चात्मनः। स्त्रीरत्नं च जगत्यतिर्दशमुखो देवः कथं मृष्यते॥ अत्र स्त्रीरत्नमित्यस्यार्थ उपेक्षितु
मित्यस्यार्थं साकांक्षति। अन्यथा कथं मृष्यत इत्यनेनामर्षार्थकेनान्वयाप्रसंगः न हि स्त्रीरत्न एवामर्षः किं
तु तदुपेक्षायां न च परस्येत्येतदन्तर्भाव्य तदन्वयोपस्थितिरितिवाच्यम्। तस्य जनितान्वयबोधत्वेन निराकांक्षत्वा
त्। न च भवन्मतयोगसंकरः। वक्त्राविवक्षितयोगस्यात्रासत्वात् परं तु विवक्षित एवार्थः साकांक्षतयोक्तः अ
त एव नन्यूनपदत्वांतर्भावः दूषकताबीजं चाभिधानापर्य्यवसानं। अतो नित्य एवायं क्वचित्तु स्त्रीरत्नं क
थं मृष्यत इत्यनेनाकांक्षा तदन्वयश्च परस्येत्यन्तर्भाव्य संभवति। तत्र जनितान्वयबोधत्वेन निराकांक्षत्वमि
ति दूषणार्थः अन्वयप्रयोजकरूपवत्वेनोपस्थितित्वे सति अपर्य्यवसितार्थान्वयत्वं वक्त्रलक्षणं अतो भवन्म

७५ का० प्र० 75

तद्योगाद्भेदः अत्रान्वयप्रयोजकरूपेणानुपस्थितेः समाप्तपुनरात्तविशेषणस्यापर्यवसानमिति तु विशेष्य
स्येति न ततो भेद इत्याह। तद्वृत्तिविरोधादिति ग्रस्तं अपदयुक्तः अपदे अस्थाने युक्तः यत्र तद्योगे प्रकृतविरुद्ध
प्रतीतिः। उदाहरणं। आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं भक्तिर्भूतपतौ पिनाकिनि पदं लं
केति दिव्या पुरी उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते। स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे
गुणाः। अत्र जयदाक्रंदनदायित्वादिना रावणस्य त्याज्यत्वं विवक्षितं तत्र च स्याच्चेदेष न रावण इत्यत्र क्व नु पुनरि
त्यादियोजितं समाधाने पर्यवस्यतीति दुष्टत्वे उत्पत्तिर्द्रुहिणान्वये चेत्यत्र यदि योज्यते तदा विवक्षितसिद्धिरे
वेत्यपदस्य पदवदस्य दोषत्वं। न च प्रकाशितविरुद्धातभावः। स्थानविशेषयोगमनपेक्ष्य तस्य प्रकृतेपुष्टत्व
बीजं विरुद्धप्रतीतिः अतो नित्य एवायं। केचित्तु अपदयुक्त इति पठित्वा व्याचक्षते। अपदयुक्तः पदस्थाने योगा
युक्तः आज्ञा शक्रेत्यादेस्तस्य स्याच्चेदेष न रावण इत्येतावता विच्छेदे कापि कांतिरनुभवसिद्धा जीवत्यहो रावण इति
व। सोऽयमर्थो विवेचनत्यज्यते क्व नु पुनरित्यादिना विस्तीर्यते। तदा मध्यप्रवेशेनायमर्थो न्याहितप्रायश्चमत्का
रं नावहतीत्यनुभवसिद्धमिति सहचरभिन्नः। समभिव्याहृतविजातीयः वैजात्यं चोत्कृष्टत्वापकृष्टत्वाभ्यां।
उदाहरणं। श्रुतेन बुद्धिर्व्यसनेन मूर्खता मदेन नारी सलिलेन निम्नगा। निशा शशांकेन धृतिः समाधिना न
येन चालं क्रियते नरेंद्रता अत्र श्रुतबुद्ध्यादिभ्य उत्कृष्टेभ्यः समभिव्याहृतेभ्यो व्यसनमूर्खतयोर्विजातीयत्वं
१५२ उभयोरुपादेयत्वमनुपादेयत्वं वा प्रतीयत इति दूषकताबीजं नित्यश्चायं॥ प्रकाशितविरुद्धः। प्रकाशितो विव
क्षितार्थस्य विरुद्धो येन वाक्यार्थेन सः स च सहभिन्नपदार्थस्य वैतत्स्थायात्मिति भावः। उदाहरणं। लग्नं रागा ७५ ग्रामः

स्तोऽग्या: सुहृद्भिरियं देवासियषष्टाधिकं तेमातंगानामपीहोपरिपरपुरुषैर्यावद्दृष्टापतंती। तत्सक्तोऽयं न
किंचित्प्रणापूर्ति विदितं ते स्तु तेनास्मि दत्ता भृत्येभ्यः श्री नियोगाद्गदितुमिव गतेत्यंबुधिं यस्य कीर्त्तिः॥१॥
अत्र विदितं तेस्त्विति वाक्यस्यार्थो लक्ष्मीस्ततोऽपसरतीति विरुद्धप्रकाशपतीदमेव च दूषतावीजं इति नि
त्यदोषोऽयं विध्ययुक्तविधिरित्यर्थः। अयुक्तत्वं च विधेरविधेयस्यैव विधेयत्वेन वा अयुक्तक्रमतया वा तत्रा
द्यो यथा। प्रयत्नपरिबोधितः स्तुतिभिरद्यशेषे निशामकेशवमपाण्डवं भुवनमद्य निःसोमकं इयं परिसमाप्यते र
णकथाद्यदोः शालिनामुपैतु रिपुकाननातिगुरुरद्य भारो भुवः अपाण्डवभयेनाऽबोधितवनिद्रानाभूदेव
अद्यतुमपाशमितेषु तेषु निःशंकतया निद्राणस्त्वं प्रयत्नेन बोध्यस इति तात्पर्यात् तथा च शायितस्त्वं प्रय
त्नेन बोध्यस इति विधिर्युक्तो न तु शेषइति शायनस्य। अविमृष्टविधेयांशे तु युक्तस्यैव विधिः परं त्वप्रकर्ष
मात्रं अत्र त्वयुक्तस्यैव विधिरिति भेदः। विवक्षितानिर्वाहोत्र दुष्टवीजं। द्वितीयो यथा। वाताहारतया जगद्वि
षधरैराश्वास्य निःशेषितं। ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः। तेपि क्रूरचमूरुचर्मवसनै
नीतां क्षयं लुब्धकैर्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते।२। अजाचर्मवसनं मेघतोयकणि। का
पानं वायुभक्षणं चेत्युत्तरोत्तरं तीव्रमिति तत्क्रमेण विधिर्युक्तः। लोकप्रसिद्धक्रमलंघनेन नष्टातुरद्धगो
त्रदुष्टवीजमिति नित्योऽयं। अनुवाद्ययुक्ते अयुक्तोऽनुवादः अयुक्तत्वं चात्र विधेयेनानुगुणत्वं॥ यथा। अरे रामा
हस्ताभरणभसलश्रेणिसरलस्मरक्रीडाव्रीडाशमनविरहिप्राणदमनः सरोहंसोत्तंसप्रचलदलनी

लोलल्लसत्खेसरखेदोहं मोहं भ्रमयय न्मययेंद्वेंदुवदनी ॥१॥ अत्र विरहिप्राणदमनेत्यनुवादः मययेंद्वेंदुवदने
७६ निर्धिविरुद्धः तदेकत्व दूषतावीजमितिनित्यदोषोयं । यत्तु पुनः स्वीकृतः । दूर्वत्यक्तोनंतरंभनः स्वीकृत्य
का॰ प्र॰ 76 उपात्तः तस्मिन्नेववाक्यार्थेविशेषः ॥ एतांतरोपादानेसमाप्तपुनरात्तं अत्रवक्यएववाक्यार्थइतिततोभेदः । उदा
हरणं । लग्नं रागावृत्तांग्येति । अत्रविदितंततोस्त्वितिउपसंहृतोराजदोषः तेनास्मिदत्तोमत्येभ्य इत्येतावतापुन
रुपात्तः स्वाप्रयोजकः उत्प्रेक्षायाः उपसंहृतेनैवनिर्वाहात् श्रीनियोगादित्यादिकंत्वदुष्टमेव । अन्यथा
वाक्यैकवाक्यतेच्छायत्तेः दूषकतावीजं अप्रयोजकत्वसहृदयवैरस्याधानंवा । लोकेपिहित्यक्तस्यभ
त्नोदःपुनरुपादानं । वैरस्यमावहतिनित्योयं । अश्लीलाव्रीडादिसमर्थकोर्थः यथा । उद्यतस्यपरंहंतु
स्तब्धस्यविवरैषिणः ॥ यथास्यजायतेपातोनतथापुनरुन्नतिः ॥१॥ शक्यंतरेणाप्युपादीयमानोयमर्थः पुंव्यं
जनादिसाधारणेनप्रतीतिर्व्रीडादायी । ननूदाहरणोपूक्तेषुकिमुदाहृताएवदोषाः तथासत्यन्यलक्ष
णानांतेषुदर्शनाद तिव्याप्तिः अथतत्रदोषांतराणापत्तिं तर्हिकिमितिनप्रकाशितानीतिचेत् अप्रकृ
तत्वादिति अथैषांपर्यायक्रमदोषत्वेप्रतिपादयितव्ये अर्थदोषाणांसान्निधानात्स्वयनमर्थदोषत्वेमेव
तत्प्रतिपादयितव्ये कर्णावतंसादिपदेकर्णादिध्वनिनिर्मितिः सन्निधानादिबोधार्थं अवतंसादिपदे
जात्यादिपुरस्कारेण कर्णाभरणादीन्येवोक्तंत इत्यर्थप्राप्ते कर्णापरादीनांपद्यप्रयुष्टार्थत्वपुनरुक्तत्वंवा
पुज्यतेतथापिक्वचित्कर्णावतंसइत्यादिष्विवस्याक्वचित्लक्षणादिनाचकर्णस्थित्यादिरूपस्याधिकस्यवि
वक्षितार्थकस्यप्रतिपत्तेरदोषत्वं । यथा । तस्याः कर्णावतंसेनजितंसर्वविभूषणं । तथैवशोभतेत्यर्थमस्याः ७६ राम॰

श्रवणकुंडलं। अत्रावतंसस्य कर्णावस्थितस्य कर्णपदोपादानेनावगम्यते तदवगमात् किं प्रयोजनमिति विवेचनीयो

ऽर्थः। कथमिति चेन्न स्वरूपतोऽस्य विभूषणं जेत्वं किंतु तत्कर्णावस्थित्यैवेति पर्यवसानात् एवं श्रवणकुंडलप

देऽप्यूह्यं। न केवलं कर्णश्रवणपदयोरेव महिमा किंत्वन्येषामपि यथा। अपूर्वमधुरालापप्रमोदितदिशस्त

तः आयपुर्भृंगमुखराः शिरःशेखरशालिनः। अत्र शिरःपदादाने शेखरस्य चाप्यमात्रं लभ्यते न तु तद

लंकृतत्वं तथा च तत्प्रतीतेः अदोषत्वं। विदीर्णाभिमुखारातिकराले संयुगांतरे धनुर्ज्याकिणचिह्नेन दोष्णा

विस्फूर्जितं तव। अत्र धनुःशब्दो ज्याया आरूढत्वप्रतिपादनाय तच्च किणस्य प्रहारकृतत्वप्रतीतिपत्तये।

यत्र तु आरूढत्वं तत्प्रतीतिप्रयोजनं वा नास्ति तत्र न धनुःशब्दोपादानमिति। यथा। ज्याबंधनिस्पंदभुजे

न यस्य विनिःश्वसद्वक्त्रपरंपरेण। कारागृहे निर्जितवासवेन लंकेश्वरेणोषितमाप्रसादात्। इत्यत्र प्राणेश्वर

परिष्वंगविभ्रमप्रतिपत्तिभिः। मुक्ताहारेण लसता हसतीव स्तनद्वयं॥ अत्र हारशब्दस्य मुक्तासंदर्भमात्रत्वेपि

न मुक्ताशब्दवैयर्थ्यं। अन्यरत्नाभिश्रत्वप्रतिपादनेन उत्प्रेक्षायामुपयोगात्। सौंदर्यसंपन्नारूपयस्यास्ते

ते च विभ्रमाः षट्पदान्पुष्पमालेव कं नाकर्षति सा सखे। मालाशब्दो यद्यपि पुष्पस्यैव स्रजि रूढः तथापि

न पुष्पपदमपुष्टार्थं तत्तद्गुणयोत्कृष्टत्वप्रतिपादकत्वात् अयमेव कविरूढिहितन्यायः ननु मालाशब्दस्य

पुष्पस्रङ्मात्रशक्तत्वमिति सम्यङ् रत्नमालेत्यादिप्रयोगदर्शनादिति चेन्न। निरूपपदस्य तथात्वात्। स्थिते चै

तत्समर्थनं महाकविप्रयुक्तेष्वेवं समाधानं न तु स्वेच्छया कर्णावतंसादिपदवत् जघनकांच्यादिकरिकल

भवत् अष्टकलभादि वाप्रयोक्तव्यं। वामनस्तु अपुष्टस्यापि तत्रोपादानमुचितं यत्र तद्विशिष्यते अन्यथा

कुतस्तद्विशेषणान्वयः स्यात् यथा जगा■दविरलदां वाचं मधुरामृतरसालिनीमित्यादौ अत्रापि वाचमित्यत्र
पादानेमधुरत्वादितद्विशेषणयोगः कथमेतव्यः इत्याह तत्र युक्तमुदाहृतं विशदं जगादेत्यादिक्रियाविशेषण
७८ का॰प्र॰ 77 त्वेनैव समीहितसिद्धेः तस्माद्यत्रेन क्रियाविशेषणत्वं योग्यं तदुदाहरणीयं चरणत्रपरित्राणरहिताभ्यामपि स्फु
टपादाभ्यां दूरमध्वानं व्रजन्नपि न खिद्यते इति। अत्रापि चरणत्रेत्यादिपादविशेषणेन क्रियाविशेषणं हि नि
तिष्ठकामत्कृत तदपि न युक्तम्। उदाहृतमिति ध्येयं। कर्तृविशेषणत्वेनैवोपपत्तेः तस्मान्मदीयं पद्यमुदा
हरणीयं। यथा निर्वातदामोदरसोदराक्षीत्येवं कर्तृविशेषणत्वेनोपपत्तेरिति चेत् सत्यम्। परं त्वन्यत्परोपा
दानमपेक्ष्यैव किंच। सोदरमात्रं नान्यविशेषणीभवितुमर्हति■ यथा मधुरत्वचरणत्र■परित्राणरहितत्वे
ख्यातेर्यैर्निर्हेतुरदुष्टता। यथा। ■चंद्रंगता पद्मगुणान्न भुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां उमामु
खं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः। रात्रौ चंद्रगतायाः पद्मगुणानुपभोगे पद्मसंकोचो हेतुः दि
वा च पद्माश्रितायाः चंद्रगुणानुपभोगे चंद्रस्य निःप्रभत्वं कारणं ते चातिप्रसिद्धेरेवावगम्येते इति तदुपा
दानापेक्षत्वदोषः। अपुष्टपदादिदोषाणामप्यदोषत्वं क्वचिदित्याह। अनुकरणे तु सर्वेषाम् इति प्रतिपादितदूषकताबी
जाभावात् तत्र वैरस्याभावस्यानुभाविकत्वेन तद्व्यतिरिक्तस्यैव एव दोषत्वव्यवस्थितेर्वा। यथा। मृगचक्षुषमद्राक्ष
मित्यादि कथयत्ययम्। पश्यैष च गवित्याह सुत्रामाणं यजेति च। अत्र द्राक्षगोसुत्रामपदानि श्रुतिकटुच्युतसंस्कृताप्र
युक्तानि अनुकरणे चैषामदोषत्वबीजं प्रतिपादितं तद्वद्वाप्यूह्यं। वक्तृप्रतिपाद्यव्यंग्यवाच्यप्रकरणादिमहिम्ना
दोषस्यापि क्वचिद्दोषाभावमात्रं क्वचित्तु भाक्तो गुणव्यवहारोऽपीति आह॥ वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचि
त् क्वचिन्नोभौ■ नोभौ न गुणो न दोषश्च। तत्र वैयाकरणे वक्तरि [illegible] कष्टत्वं गुणः प्रतिपाद्य ७८ राम॰

स्यतत्तोतिशयेनप्रतीतेः दोषत्वाभावश्चोपपादितएव। यथा। दीधीङ्वेवीङ्समः काश्चिद्गुणवृद्ध्योर
भाजनं क्विप्प्रत्ययनिभः काश्चिद्यत्रसन्निहितेनते। वैयाकरणादौप्रतिपाद्येचतस्यगुणत्वं तद्भावनाभावि
तस्यैततच्छ्रवणेनप्रीत्युपचायात्। यथा। यदात्वामहमद्राक्षंपदविद्याविशारदं। उपाध्यायंतदास्मार्षंस
मस्मार्षंचसंमदं। ओजस्विनिरौद्रादिरसेव्यंग्येचतस्यगुणत्वं कठिनशब्दस्यतद्व्यंजकत्वात्। तत्रवीभत्सेयथा॥
अंत्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कंकणप्रायप्रेंखितभूरिभूषणरवैराघोषयंत्यंबरं। पीतच्छर्दितरक्तकर्द
मघनप्राग्भारघोरोल्लसद्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतंधावति॥ ओजस्विनिलिंगादौवाच्येपितस्य
गुणत्वं। यतोमसृणशब्दप्रयोगेनोर्जितोप्यर्थोमृदुवद्भासते ऊर्जितशब्दप्रयोगेत्वोर्जित्येन। उदा०। मातं
गाः किमवलितैः किमफलैराडंबरैर्जंबुकाः सारंगामहिषामदंव्रजत किंशून्येषुशूरानके कोपाटोप
समुद्भटोत्कटसटाकोटेरिभारेःपुरः सिंधुध्वाननिनिहुंकृतेस्फुरतियत्तद्गर्जितंगर्जितं॥ अत्रसिंहोवाच्यः
प्रकरणविशेषेचगुणत्वंवक्तुर्वैयाकरणत्वाद्यभावेपिकोपादिश्चस्तावतद्गुणत्वात्। यथा। रक्ताशोक
कृशोदरीक्वनुगतात्यक्त्वानुरक्तंजनं नोदृष्टेतिमुधैवचालयसिकिंवाताबधूतंशिरः। उत्कंठाघटमानषट्पदघ
टासंघट्टदष्टच्छदस्तत्पादाहतिमंतरेणभवतःपुष्पोद्गमोयंकुतः॥ अत्रमिथ्याशिरोवधूननेनकोपप्रकर
णे। नचास्यव्यंग्यएवप्रवेशः कोपस्यव्यंग्यत्वादितिवाच्यं। वक्त्राद्यतिरिक्तस्थानीयस्यव्यंग्यस्यव्यंग्यपदो
पादानात् गोबलीवर्दन्यायात् दोषत्वाभावश्चैतेषुगुणत्वप्राप्तेः स्फुटएवक्वचित्पुनर्नदोषत्वंनवागुणत्वं य
त्रनरसोनवाप्रतिपाद्यश्चौचित्यं। यथनीरसेपदि विघाताभावादस्यादोषत्वं तदान्येषामपिस्यान्नयाचेद्दोषो
नीरस।

७८ दाहरणं विरुद्धेतेतिचेन्न। तस्योपलक्षणत्वात् दोषपरिनयमाचार्यत्वाद्। यथा। शीर्णघ्राणांघ्रिपाणीन् व्रणिभिर
कौ॰प्र॰ पघनैर्घर्घराव्यक्तघोषान् दीर्घाघ्रातानघौघैः पुनरपिघटयत्येक उल्लाघयन्यः। घर्मांशोस्तस्य वोन्तर्द्वि
78 गुणघनघृणानिघ्ननिर्विघ्नवृत्तेर्दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातं। नीरसत्वं चात्रा
नुप्रासमात्रसमतया रसे तात्पर्याभावात् नचानुप्रासस्यैकतये वर्णात्वंसौंचेष्टबेदानित्यादावपित
दापत्तेरिति। नचपरुषवर्णत्वमनुप्रासे प्रयोजकम् येनतद्घटकतया दोषत्वं स्यात् अत्र प्रयुक्तानि हितार्थो
श्लेषयमकादावदुष्टत्वमितिप्रतिपादितं प्राक् यदि च प्रयोजनानुसंधानव्यग्रतादुष्टता बीजं तथाप्यत्र न दोष
तातदलंकारत्वस्य प्रयोजनस्य प्रतीतेर्व्यग्रता [redacted] भावात् यथा। येनध्वस्तमनोभवेन ब ६७८
लिजित्कायः पुरास्त्रीकृतो यो गंगां च दधेऽन्धकक्षयकरो यो बर्हिपत्रप्रियः यस्याहुः शशिमच्छिरोहर इति स्तु
त्यं च नामामराः सोऽव्याद्दृष्टभुजंगहारवलयस्त्वां सर्वदोमाधवः॥१॥ अत्र माधवपदे राहोःशशिमस्तदःप्रप्र
तं हृदयपदं स्वहेतिनिहतार्थे। न च श्लेषरूपालंकारप्रयोजकतया गुणत्वमपि शंकनीयम्। तत्वस्य तत्रा
प्रयोजकत्वादेवमन्येष्वपि प्रतीतिविलंबत्वासु द्रष्टव्यम्। अश्लीलत्वं क्वचिद्गुणो यथा। सुरतारंभगोष्ठ्यांमाढ्य
र्यैः पदैः पिशुनयेच्च रहस्यवस्त्विति कामशास्त्रस्थितौ दोषत्वाभावेप्युसत्तिप्रकटनात्। यथा। उन्न
तोच्छूनमंडूकपाटितोदरसन्निभे क्लेदिनेस्त्रीव्रणेसक्तिरकृमेः कस्यजायते। सूचनीयविशेषेयथा॥
निर्वाणवैरदहनाः प्रशमादरीणां नंदंतु पांडुतनयाः सहमाधवेन। रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवंतु कुरुराजसुताः सभृत्याः॥१॥ अत्रप्रशमानादितिस्वस्थ्यादिति मरणार्थकत्वादश्लीलेपिभाव्य ७८
राम॰

मंगलसूचनात्गुणः संदिग्धमपिवाच्यमहिम्नानियतार्थप्रतीतिकारित्वाद्व्याजस्तुतिपर्य्यवसायित
यागुणः। यथा। पृथुकार्त्तस्वरपात्रंभूषितनिःशेषपरिजनंदेव। विलसत्करेणुगहनंसंप्रतिसमंवयोः सदनं
॥१॥ अत्रपृथुकार्त्तस्वरादिशब्दाः पृथुकानांमार्त्तस्वरः पृथुवर्त्तुलंकार्त्तस्वरेतिसंदिग्धः अप्रतीतमपिप्रत्य
प्रतिपाद्यप्रतिपादकयोर्द्वयोरपितज्ज्ञतात्तत्रगुणः अर्थाप्रतीतिरूपबीजाभावेनादोषतायांगुणत्वेप्रकटक
त्वात्। यथा। आत्मारामाविहितरतयोनिर्विकल्पेसमाधौ। ज्ञानोद्रेकाद्विघटिततमोग्रंथयः सत्वनिष्ठाः। यंवीक्ष
न्तेकमपितमसांज्योतिषांवापरस्तात्तंमोहांधः कथमयममुंवेत्तिदेवंपुराणं॥ इयंभीमसेनस्यसहदेवंप्रत्यु
क्तिः अत्रनिर्विकल्पकादिशब्दाः आत्ममात्रावलंबनत्वादार्येयोगशास्त्रमात्रप्रसिद्धाः स्वयंपरामर्शेष्वेव
मेवगुणत्वं। यथा। षडधिकदशनाडीचक्रमध्यस्थितात्मा हृदिविनिहतरूपःसिद्धिदस्तद्विदांयः अविच
लितमनोभिः साधकैर्मृग्यमाणः सजयतिपरिणद्धः शक्तिभिः शक्तिनाथः॥१॥ अधमप्रकृतीनांवि
टविदूषकानांहास्यरसप्रधानानांतथैवोचित्याद्दोषत्वाभावेहास्यपर्यवसायित्वात् ग्राम्योगुणः। यथा।
फुल्लुक्कंभद्दमल्लकूरणिहंवहंति। जेसिंधुवारविडवामहवल्लहाहे योगालिदस्समहिसोदहिणोसमीरोपदे
किंचमुद्धाविअअद्दल्लुपसूणपुंजा॥ अत्र लमलमाहिर्याद्धिशब्दाः स्मनपदमपिवक्ताविद्रुणोवक्तन्यस्तंतथै
यथा वाभिमतविशेषसिद्धेः। गाढालिंगनवामनीकृतकुचप्रोद्भूतरोमोद्गमा। सांद्रानंदरसातिरेकविगलत्
श्रीमन्नितंबांबरा। मामामानदमातिमामलमिति क्षामाक्षरोल्लापिनी सुप्ताकिंनुमृतानुकिंमनसिमेली
नाविलीनानुकिं॥१॥ अत्रमामेत्यत्राभ्यासयः मातीत्यत्रपीडयेतिन्यूनंनचदोषः प्रतीतेः स्फुटत्वात् प्रत्युतगुणः

रसातिरेकव्यंजकत्वात् क्वचित्तु न दोषो नापि गुणः यथा। रोषकोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति स्व
७९ रामः 79 र्गायोत्पतिता भवेन्मयि पुनः स्नेहार्द्रमस्याः मनः तां हर्तुं विबुधद्विषोपि न च मे शक्ताः पुरोवर्त्तिनां सा चा
त्यंतमगोचरं नयनयोर्जातेति कोयं विधिः॥१॥ अत्राहिते इत्यनंतरं नेत्युच्यते इत्येतेन सूनं। एवं द्वितीयपादेपि न
वाच्यगुणत्वं विशेषभेदेन स्वतः सादनात्। नापि दोषत्वं तद्व्यतिरेकेणापि दीर्घं न सा कुप्यति इत्यादि प्रतीत्या तिष्ठे
कोपवशादित्यादि प्रतीतीनां बाध्यत्वावगमात् अधिकपदं च्यावितगुणोपत्र विशेषप्रतिपत्तेः यथा यद्वंचना
हितमतिर्बहुचाटुगर्भं कार्योन्मुखः खलजनः कृतकं ब्रवीति। तत्साधवो न न विदंति विदंति किंतु कर्तुं वृ
था प्रणयमस्य न पारयंति॥१॥ अत्र द्वितीयं विदंतीति पदमन्ययोगव्यवच्छेदं प्रतिपादयन्नाधिकपदत्वेपि गुणं
यदुक्तम्। विस्मये च विषादे च दैन्ये क्रोधेऽवधारणे। प्रसादने तथा हर्षे वाक्यमेकं विरच्यते इति। एवं हर्ष
शोकादिषु पदे वक्तुरिगुणत्वं। तत्रादिव्यक्तत्वाद्धर्षाद्यभिव्यंजकत्वात् यथा। वद वद जितः स शत्रुर्न हतो ज
ल्पंश्च तव तवास्मीति चित्रं चित्रमरोदीद्धा हेति परं मृते पुत्रे अत्र पादचतुष्टये क्रमेण हर्षभीतिविस्मयवि
षादयुक्तो वक्ता रः एवं च न रक्तोपि दुष्टव्यम्। रथितस्यापि लापनत्वासिता निर्वाहकतया अर्थांतरसंक्र
मितवाच्यवाच्ये विशेषव्यंजनात् विहितस्य यथानुवाद्यत्वं तत्र त्वत्तादृशाभिमतनिर्वाहकयतणस्त्वे क्रमेने
यो दाहरणम्॥ सितकरकररुचिरविभाविभाकराकरधरणिधरकीर्त्ति। पौरुषकमलाकमलासापि तवैव
त्तिनान्यस्य अत्र लाटानुप्रासः। तालाजानां प्रतिगणजातोतसहितमणिहितोप्यंति। रथिकिरणस्तुग्मा
रुपार्द्दहां तिकमलाईकमलाद्दू॥१॥ अत्र द्वितीयं कमलापदं सौरभादिमत्त्वार्थकतया अर्थांतरसंक्रमितवा ७९ रामः

च्यं। तथात्वेवकथितपदमेवप्रयोजकं। जितेंद्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते। गुणा
धिकं पुंसि जनोऽनुरज्यते जनानुरागप्रभवाहिसंपदः। १। अत्रकारणमालायांपूर्वपूर्वपदेनैव विनयादि
कमुपादेयं। पदांतरेणान्वयमानंतु छिन्नतयेव प्रतिभाति तथाचताद्दशालंकारसंपादकतया गुणत्वं दोषाभा
वश्च ततोवीजाभावात्प्रतस्त्प्रकर्षमपिकविजुष्टं। यथा। प्रागप्राप्तेत्यादौ अत्रहि चतुर्थपादे क्रोधाभा
वान्मस्तृणमेवपदंयुक्तमिति दोषाभावः गुणत्वंतु विनयप्रकाशकतया समाप्तपुनरात्तं क्वचिन्नगुणोन
दोषः। यथा। प्रागप्राप्तेत्यादौ अत्रहि चतुर्थपादे क्रोधाभावात् येनानेनेत्यादौ न विशेषणादानमात्रार्थं किंतु
वाक्यांतरमेवावधेयं अतोवीजाभावान्नदोषः नचगुणो विशेषबुद्धेरकरणात् अपदस्थसमासमपिक्वचि
द्गुणः। यथारक्ताशोकेत्यादि अत्रापदस्थसमासत्वमेवकथमितिचिंत्यं द्वितीयार्धस्यापि तस्यानहा
त् तस्यापि दुष्टवक्तृकत्वात् अन्यथा गुणत्वासंभवात् भास्करस्तु शृंगारे समासस्यानौचित्यादस्थानस्य
त्वमित्याह। गर्भितमपिक्वचिद्गुणोदृष्टप्रत्ययादिहेतुत्वान्नदोषः प्रतीतेरव्यवधानात् दुंत्तिः अस्थिरुह हु
रहोलिपंकुशोप्रहावविवे अरहिउ ओवि सिविणे वितुमंम्मि पुणोपत्तिहिभत्तिणप्पहासिमि अत्रप्रतीहेतिदृष्ट
प्रत्ययोत्पादकं एवमन्यदपि लक्ष्यं दृष्ट्वोहनीयम्। अथ साक्षाद्रसविरोधिनो दोषानाह व्यभिचारिरस
स्थायिभावानांशब्दवाच्यता कष्टकल्पनया व्यक्तिरनुभावविभावयोः प्रतिकूलविभावादिग्रहो दीप्ति
पुनःपुनः अकांडे प्रथनछेदावंगस्याप्यतिविस्तृतिः अंगिनोननुसंधानं प्रकृतीनां विपर्ययः अनंग
स्याभिधानं च [illegible] रसदोषाः स्मृताहृशाः शब्दवाच्यता सामान्यतो विशेषतोवास्वशब्देनोपादानमा
व्यभिचारिणो यथा सव्रीडादयितानने सकरुणामातंगचर्मांबरे सत्रासा भुजगे सविस्मयरसाचंद्रे

८० 80 मृतस्यंदिनि सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे पार्वत्या नवसंगमप्रणयिनी दृष्टिः शिवा
का० प्र० यास्तु वः॥ अत्र व्रीडादयो व्यभिचारिभावाः स्वशब्देनोपात्ताः न स्वस्वशब्देनोपात्तेषु व्यभिचार्यादिष्वास्वा
80 दः संभवो न श्रूयते किंत्वनुभावादिभिरेवैनेव व्यक्तेषु तस्मादास्वा॰ नुत्पत्तिदोषत्वबीजमिति संप्रदायः।
तत्रेदमालोचनीयं। एतावता शब्दवाच्यताया दोषत्वमेव तावद्दुर्लभं दूरे पार्थक्येन दूरतरे साक्षात् तथाहि
अनुभावादीनामुपस्थितौ विषयं रसप्रतिबंधकामिमतात तदनुपस्थितौ वा। प्रथमे कारणाभावादेवास्वादाभा
वो न तु वाच्यत्वकृतः सत्येव कारणे च क्वचित्कार्यानुत्पादस्य प्रतिबंधकता व्यवस्थापकत्वात् तथा च न्यूनप
दत्वं अनभिहितवाच्यतावा दोषः न त्वयं। द्वितीये अनुभावादित एव रसव्यक्तिरिति किंत शब्देनेति वैयर्थ्य
मात्रं दोषः वयं त्वालोचयामः अनुभावादीनामुपस्थितावेव व्यभिचारिभावादीनां शब्दवाच्यतयास्वादो
पघातः प्रतीयत इति तस्याः पृथग्दोषत्वं अत एवौत्सुक्यादीनां शब्दवाच्यता न दोषः तत्रास्वादविघा
तप्रतीतेः न च वाच्यमेवमनुभावोपादानेपि किमिति नोदाहृतमिति तदुपादानस्थलेऽनुभावादिशब्दानां
वैयर्थ्यमपीत्यसंकराभिप्रायेण तयोरुदाहरणात् उदाहृते त्वनुभावा क्षेपकतया वैयर्थ्याभावात् न चैवमु
क्तोदाहरणविरोधस्तत्रानुभावाद्यनुपादानादिति वाच्यं। दैवादहमद्य तयेत्यादिविवक्षितेपण तेषां प्रतीतेः
नहि व्रीडादिशब्दैः प्रतिपादिता व्रीडादयः आस्वाद्यतामेव स्यानुभावाद्याक्षेपकतामपि प्रास्वादयि
तुमहत्मा बीजाभावात् एवमग्रिमोदाहरणेष्वप्यूह्यं इति एवं च स्थिते व्यानम्रा दयितानने मुकुलि
ता मातंगचर्मांबरे सोत्कंपा भुजगे निमेषरहिता चंद्रेमृतस्यंदिनि। मीलद्भ्रूः सुरसिंधुदर्शनविधौ म्लाना
कपालोदरे इत्यादिश्च पाठो [illegible] स्य सामान्यतो रसशब्देन मानं॰

पश्यैष।

यथा। आलोलकोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्त्तिं यद्रूपैष बाल्यमतिवृत्य वि
वर्त्तमानः शृंगारसीमनितरंगितिमातनोति।१। अस्या येनो विशेष उत्साहपदेन। यथा। संप्रहारे प्रहरणैः प्र
हाराणांपरस्परं। ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोप्यभूत् १ अत्रैव स्थायिभावोस्य कोप्यभूदिति चतु
र्थपादपाठे सामान्यतः शब्दवाच्यतोदाहरणं द्रष्टव्यं। कष्टकल्पनया पृथक्स्थोक्ता प्रसंधेयप्रकरणा
दिपर्यालोचनया विलंबेन व्यक्तिर्न तु देवादहमत्र तथेत्यादाविव झटित्यात्तेष्व महिम्नामासौ। अनुभावस्य यथा
कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मंडले शिशिररोचिषि तस्य यूनः। लीलाशिरोंशुकनिवेशविशेषकॢ
प्तिव्यक्तस्तनोन्नतिरभून्नयनावनौसा।१। अत्र चंद्रादय उद्दीपनालंबनविभावाः शृंगारयोग्या अनुभावाप्र
तीत्या आस्वादापर्यवसायिनः स्थिताः यद्यप्यंशुकनिवेशो अनुभावत्वयोग्यः तथापि तस्य स्तनव्यक्ति
प्रयोजकत्वेनोपात्तेनानुभवत्वपर्यवसानमिति प्रांचः। वस्तुतस्तु पुंनिष्ठशृंगारोत्र प्रतिपिपादयिषितः अभू
तस्याः एव इति वा॰ न्नयनावनौसेत्यनेन तस्यैवालंबनत्वप्रतिपादनात् न च पुंसि काश्चिदनुभाव उपात्तः न च विभावैरप्याक्षे
पा इति कष्टेन कल्पनीयः विभावस्य यथा। हे प्रतिहरतिरतिं मतिं लुनीते स्खलतितरां परिवर्त्तते च भू
यः। इति वत विषमादशास्पदेहं परिभवति प्रसभं किमत्र कुर्मः।१। अत्र कामिनीरूपः शृंगारविभावोभिमतो
न पुनरुपात्तः न च द्युतिपरिहारादिभिरनुभावैराक्षेप्तुमपि शक्यते तेषां करुणादावपि संभावादिति कष्टेन क
ल्पनीयः प्रतिकूलविभावादिग्रहः प्रकृतरसादेः प्रतिकूलो यो रसादिस्तदीयविभावानुभावव्यभिचारिणां ग्रहः
तत्र तादृशविभावव्यभिचारिणोर्ग्रहो यथा। प्रसादे वर्त्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यंत्यंगान्य

८१ 81 म्लतमिवतेसिंचतु वचः निधानं सौख्यानां हरणमभिमत्वं स्यापयमरवं न मध्ये प्रत्येतं प्रभवति गतः कालहरिणः
का० प्र० । अत्र प्रकृते शृंगारे प्रतिकूलस्य शांतस्य प्रकाश्यमानानित्यतारूपो विभावः एतत्प्रकाशितो रूपो व्यभिचार
निर्वेदश्च स्फुटमेव गम्यते तादृशानुभावग्रहो यथा। णिहअरमण मिलोअणपहम्मि पुडिए गुरुमणमज्झ
म्मि। सअलपरिहारहिअआ वणगमणस्संचेअ महइ वहू। अत्र व्यादिकं विना वनगमनं सकलपरिहारस्य शां
तानुभावः न व्याजः प्रतिपादनं इति शृंगारस्य प्रकृतस्य विच्छित्तिः इंधनाद्यानयनव्याजेन संभोगार्थं वनग
मनं यद्युच्यते। तदा न शांतानुभावग्रहः पुनः पुनर्दीप्तिः शृंगारसादिविषयो दोषः अंगिनस्त्वसा महाभारते शांत
देरिव न वैरस्यमावहति। उदा० कुमारसंभवे प्रथमोहपरायणेत्यादिना दीप्तिमानीतोपि करुणो यथासु
पुनरेवेत्यादिना पुनः पुनर्दीप्तिं नीतः। उपभुक्तो हि पुनरुपभुज्यमानः परिम्लानः कुसुमस्येव न कल्पते। अकाण्डे
प्रथनं। यथा वेणीसंहारे द्वितीयेंके कवीरसंक्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृंगारव
र्णनं। छेदो यथा वीरचरिते द्वितीयेंके राघवभार्गवयोरधिरूढप्रसारतया प्रवृत्ते वीररसे कंकणमो
चनाय यामीति राघवस्योक्तौ अकांडे हि तथा वचनं व्याजेन निर्गमं प्रतिपाद्य धीरत्वाभावे पर्य्यवस्यति
अंगस्यातिविस्तृतेः प्रधानस्यातिविस्मृतेः अप्रधानस्यातिविस्तरेण वर्णनं॥ यथा॥ हयग्रीववधे हयग्री
वस्य यद्यपि प्रतिनायकवर्णनं नायकस्यैवोत्कर्षे पर्य्यवस्यति। तथाप्यतिशयितं प्रधानतिरोधायक
तया दोषपदवीमवतरति। अंगिनः प्रधानस्याननुसंधानं यथा रत्नावल्यां चतुर्थेंके बाभ्रव्यागमने ८१
सागरिकाया विस्मृतिः प्रकृतीनां विपर्य्ययः प्रकृतयो यत्प्रकृतौ यद्वर्णितमनुचितं तत्र तद्वर्णनं प्रकृतप्रस्तावः राम०

दिव्या,अदिव्या दिव्यादिव्याश्च।अत्र दिव्यत्वममर्त्यैकरूपत्वमतोनपातालाद्यसंग्रहः उदाहरणान्य
श्रीमन्महेश्वरादि· अदिव्यत्वम मर्त्यैकरूपतायथामाधवादेः दिव्यादिव्यत्वरूपता श्रीकृष्णादेः वि
विधा अप्येते चतुर्धा भवंति धीरोदात्त धीरोद्धत धीरललित धीरप्रशांत भेदाक्रमेण वीररौद्रशृंगार
शांतप्रधानत्वेमषां लक्षणानि श्रीरामभार्गवकृष्णजीमूतवाहना उदाहरणानि एतेषप्रत्येकमुत्त
माधममध्यमभेदा,अनुकूलादिभेदास्तत्वस्थिरा अनुकूलादि र्हि कदाचिद्दृष्टान्यादिसंपद्यन्त इतिप्र
कृतेन गणनीया: एवं भिन्नास्वप्रकृतिषु तत्र इतिहासप्रोक्ताद्भुतान्य दिव्योत्तमप्रकृतिवद्दिव्येष्वपि
वर्णनीयानि किंतु संभोगशृंगाररूपा उत्तमदेवविषया न वर्णनीया तद्वर्णने पित्रोः संभोगवर्णनमिवा
संहर८ त्यंतमनुचितं क्रोधं विनो संहर रतिया वदिरि:खे मरुतां चरंति तावत्स वह्निर्भवनेत्रजन्मा भस्मा वशे
षं मदनं चकार।१।इत्याद्युक्तवत् भ्रुकुट्यादिवर्जितः सद्यः फलदः क्रोधो नाकपातालगमनस
मुद्रोल्लंघनाद्युत्साहश्च दिव्येष्वेव वर्णनीयः अदिव्येषु तु यावदेव महत्कर्म लोकप्रसिद्धमुचि
तं वा तावदेवोपनिबंधनीय, अधिकं हि निबध्यमानमसत्यप्रतिभासतया रामादिवद्वर्तितव्यमित्या
द्युपदेशेन पर्यवस्येत्। दिव्यादिव्येषु पुनरुभयोरप्युचितं वर्णनीयं एवमुक्तस्योचितस्य दिव्या
दीनामिवोत्तमादीनामप्यन्यथा वर्णने प्रकृतिविपर्यस्येत। यः ग्रामं ब्राह्मणोचितस्य लंघनेप्येवं तद्यथा तत्र
भवन् भगवन्नित्युत्तमेनैव शक्यो वक्तुं नाधमेनापि मुनिप्रभृतावेन तु राजादौ। महाराजेति न राजादावुत्त

मेन किंतु देवादावेव। अन्यथा निबंधने तु प्रकृतिविपर्ययः। यथा स्वर्गिगिनासुमानुषीवेशादिः रसा
८२ 82 तलादौ मेघादिरिति। अनंगस्याभिधानं रसानुपकारकस्य वर्णनं। यथा कर्पूरमंजर्यां नायिकया स्वा
का० प्र० त्मानाचपद्दसंतवर्णनं। तदनादृत्य वंदिवर्णनस्य राज्ञा प्रसंशनं। ईदृशा इत्यनेनैतदुक्तं यदेवंविधान्य
नै न्येपि विसहेतवो भवंति। यथा नायिकापादप्रहारादिना नायककोपादिवर्णनमित्यादि। अनौचित्यं तु रस
विच्छेदहेतुः। यदुक्तं ध्वनिकृता। अनौचित्यादृते नान्यद्रसभंगस्य कारणं। औ● चित्योपनिबंधस्तु
रसस्योपनिषत्परेति। इदानीमेषां केषांचित् क्वचिदिति यत्रेतरविरहत्वेनानुभावः। यथा औत्सु
क्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया तैस्तैर्बंधुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः। दृष्ट्वाग्रे
वरमात्तसाध्वसरसा गौरी नवे संगमे संरोहत्पुलका हरेण हस● ता श्लिष्टा शिवायास्तु वः। औ
त्सुक्यशब्दवत् सहसा प्रसरणादिरूपोऽनुभावो नौत्सुक्यमदिग्धं प्रतिपादयितुमीष्टे भयादि-
साधारणत्वात्। अत एव दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं संश्लिष्यत्यरुणं गृ
हीतवसने कोपांचितं भ्रूलते॥ ●मानिन्याश्चरणानति व्यतिकरे बाष्पांबुपूर्णेक्षणं। चक्षुर्जात
महोत्प्रपंचचतुरं जातागसि प्रेयसि॥ १॥ इत्यत्र व्रीडादीनिं विवलितत्वादिभिरनुभावैरूपनिबंधने ८२
वरासिन्नाविरोमणि● रमस्ककविरौत्सुक्यं स्वशब्देनैवोपात्तं वाच्यदोषत्वाभावबीजमुक्तं प्राक्
कारणेन विशिष्यमाणास्तो राम०
इदं त्ववधेयं। त्वरादीनां भयादिसाधारण्येपि उत्सुक्यादिनायक

॰धिरोपमासाद्य उत्तम्भ्य मयौ रव्यजेयतीत्यादौ दोषः नवु शान्तादेवतत्त्वज्ञानस्य व्याख्यानवार्थ्यादी
नीवाचमलासहलसादनात् । व्यञ्जनावाच्ये नैवैयर्थ्यमपि विशेषणत्वेनोपयोगात् । दूराद्धुत्कमित्यादौ तु
शब्दमहिम्ना विशिष्टस्यैवानुभावस्य फलस्य न मितत्तोभिव्यक्तिरिति । एवं च व्यवस्थिते शब्देन तदुपस्थिति
विना न तदनुभावस्यासाधारण्यं । न च तेनाविनाभिव्यक्तेन चाभिव्यक्तिं विना स्यादसंभवो न च तेन विनाभाव
भावमध्यप्रवेशो न च तमन्तरेण तत्परिकीर्त्तनं युक्तमिति भावस्योत्कीर्त्तनमप्येतादृशस्य व्यभिचारिणः शब्द
वाच्यताया दोषत्वाभावं साधयतीत्युक्तमस्माभिः ॥ संचार्य्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा प्रकृत
विरुद्धं व्यभिचार्यादि बाध्यत्वेनोच्यते तदा दूरे दोषत्वं प्रत्युत प्रकृतरसपरिपोषकतया गुणत्वं । तत्र व्य
भिचारिणो यथा । क्वाकार्यं शशलक्ष्मणः क्व च कुलमित्यादौ अत्र चतुर्षु पादेषु पूर्वभागप्रतिपाद्यानां शमा
गानां वितर्कमतिशंकाधृतीनामुत्तरभागप्रतिपाद्याभिरभिलाषांगभूताभिरौत्सुक्यस्मृतिदैन्यचिंता
भिस्तिरस्कारपूर्वकं चिंताया एव पर्य्यवसानमिति भावशबलतापरिपोषकत्वात् गुणत्वं । पांडुक्षामं वद
नं हृदयं सरसं तवालसं च वपुः आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥ इत्यत्र पांडुत्वादीनां रोगानुभा
वतया विरुद्धत्वेपि विप्रलंभशृंगारे समासेयावदंगभावशास्या दोषत्वाभाव इति ध्वनिकारः । तदुक्तं । तेषां
समयसाधारण्याद्धि विरोधस्यैवासिद्धेः ॥ विभावस्य यथा । सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः किंतु मत्तां
गनापांगभंगलोलं हि जीवितं । पूर्वार्द्धे शृंगारस्य परार्द्धे शांतस्य विभावः अनयोर्विरोधोपि ॰र्द्धेऽस्य

८२ 83
का॰ प्र॰

बाध्यत्वेनैवोक्तत्वात् दोषत्वं प्रत्युत शांतपरिपोषात् गुणत्वं। एवं च प्रतीयते सर्वारामादयः सत्येव जीविते तत्
सैव कार्यार्थमुपादेयाः जीवितं चातिभंगुरमिति किं कृतं तेषामुपादेयत्वमेतावन्मात्रेपि निष्फलता एतदुक्ति। नन्वेवं
सर्वाईप्रतिपाद्यस्य बाध्यत्वेपि सत्तांगनायां गभंगेस्येनेन विरोधो न परिहृतः न च तत्र न शृंगारप्रतीतिरिति वक्तुं श
क्यं तदुपादानवैयर्थ्यप्रसंगादिति चेन्न तत्र रसांतरप्रतीतेः तद्व्यंजकानुभावाद्यप्रत्ययात्। कथं तर्हि तदुपादानमि
ति चेत् शांतपरिपोषार्थमेवेति ब्रूमः सएव कथमिति चेत् जीवितस्यातिभंगुरत्वप्रतीतेः सापि कुत इति चेत् जीवि
तादप्यधिकमपांगस्य स्थैर्यं सकलजनप्रसिद्धं अतस्तथाविधभंगुरस्यापांगस्योपमानत्वेनोपादानात्। त
देतदुक्तम् जीवितादप्यधिकमपांगभंगस्यास्थिरत्वमिति प्रसिद्धमपरोपमानत्वेनोपात्तं शांतमेव पुष्णाती
ति। केचित्तु प्रसिद्धभंगुरस्वभावधर्म्येण जीवितोपमानं तयोपात्तमिति तद्व्याचक्षते। ध्वनिकारस्तु लवत्येवाह
शृंगारप्रतीतिः परं तु तया गुडजिह्विकान्यायेनोन्मुखीकृत्य विनेयाः शांतरसे निवेश्यं यं जड इत्यदोषता। यद्वा
काव्यशोभानिमित्तमेव तदुपादानाद्दोषाभावः। नहि विना शृंगारेण काव्यशोभेति समाधाने। तत्रातिम
नोरमं शृंगारप्रतीत्युपक्रमेपि शृंगारशांतयोर्निर्द्वंद्वतत्त्वाभावेन प्रथमसमाधेरसंभवात्। द्वितीयसमा
धिरपि तदास्याप्रतीतिरसांतरयोगेन वा रूत्वं। ननु भवेयत्। न त्वेवं किं वरसमावेशस्य चारुत्वमित्यपि न शक्यते व
क्तुं प्रागेव तु शृंगारसमावेशमते। यतो द्वित्रकाव्येऽसंकरादेव चारुत्वप्रत्ययः। तस्मादत्र शांतरसादनुपात्त
कोनाचावत्वसंभवान्नोजरोपि समाधिरिति। अविरोधोपायांतरमाह। आश्रयैक्ये विरुद्धो यः स का
...र्यस्तरसानो विरोधो। ८२ रामः

द्विधा समानाधिकरणतया नैरंतर्येण चेति। तत्र वीरभयानकयोरैकाधिकरण्येन विरोध इति प्रतिपक्ष
गतत्वेन भयानको वर्णनीयस्तथा सति हि रसस्य दोषत्वं च्युतवीरपरिपोषः। यथा मम। अज्ञादत्ता विपदं
स्फातिनृपरोनप्रार्थिताम्रीहते साकूतंपरिभाषितापि वकुम्राः किंचित्त्रचाभाषते। आश्लिष्टापि न संमुखानि
रचयत्यंगानि मृद्वाशया शोपोड्कवशंवदेवतरुणीयदीयाद्विषां। न चात्र शृंगारभयानकयोरपि विरोधः।
वक्ष्यमाणक्रमेण द्वयोरप्यन्यांगत्वात्। व्यधिकरणत्वाच्च यद्यप्यायमेव समाश्रयत्वापि वीरभयानको
क्वाचिदनुरूपैतौ तथापि नतयावर्ण्यतेत्यतिभिन्नाश्रयतयैव निवेशनीयौ। एवमन्येषामप्यूह्यं। यस्य तु येन र
सेन नैरंतर्येण विरोधः सोऽपि रसांतरेणांतरितो निबद्धव्यः। यथा। नागानंदे शांतजीमूतवा
हनस्याहो गीतमहो गीतमहो वादित्रमित्यनेनाद्भुतमंतर्निवेश्य मलयवतीं प्रति शृंगारो निबद्धः। न के
वलं प्रबंध एव रसांतरस्यांतर्व्यंधेनाविरोधानिवृत्तिः। किंत्वेकस्मिन्नपि वाक्ये। यथा। भूरेणुदिग्धान्
नवपारिजातमालारजोराजितबाहुमध्याः। गाढं शिवाभिः परिरभ्यमाणान्सुरांगनाश्लिष्टभुजांतरालाः।
सशोणितैः क्रव्यभुजांस्फुरद्भिः पक्षैः खगानामुपवीज्यमानान्। संवीजिताश्चंदनवारिसेकैः सुगंधि
भिः कल्पलतादुकूलैः। विमानपर्यंकतले निषण्णाः कुतूहलाविष्टतया तदानीं। निर्दिश्यमानान्ललना
गुलीभिर्वीराः स्वदेहान्पतितानपश्यन्। अत्र च विशेषः स्थायी रसस्य कर्तुः सर्ववाक्यात्त्वपिलेन विमा
नाधिरोहणादिना मध्ये उत्साहप्रतीतेर्बीभत्सशृंगारयोरविरोधः। यद्यप्यत्र वीर एव प्रधानमन्योन्यक्तद्य
भिचारिणो वितेनाविरोधस्तथाप्येवमप्यविरोधः संभवतीत्युदाहृतं। अविरोधेहलंतरमाह। स्मर्यमाणो

८४ का॰ प्र॰ 84 विरोधोपिसाम्येनाथविवक्षितः। अंगिन्यंगत्वमाप्तौयौतौनदुष्टौपरस्परं तत्र स्मर्यमाणत्वेनाविरोधोयथा। अयं
सरसनोत्कर्षीपीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शीनीवीविस्रंसनः करः॥ समरभुविनिपतितंभूरिश्रवसो
हस्तमालोक्यतद्वधूनामिदंवचनं। तथाचशृंगारो ऽपिपूर्वावस्थास्मर्यमाणतयोद्दीपनविभावत्वेनकरु
णपरिपोषकत्वाददोषः। साम्याविवक्षया यथा। दंतक्षतानिकरजैश्चविपाटितानिप्रोद्भिन्नसांद्रपुलकेभवतःश
रीरे दत्तानिरक्तमनसामृगराजवध्वाजातस्पृहैर्मुनिभिरप्यवलोकितानि॥ पाटनंखंडनं। प्रसवजनितातिबुभु
क्षावशेननिजापत्यमेवभोक्तुमारभमाणायैसिंहवध्वैपरमदयालुं जिनंतद्रक्षार्थंस्वशरीरदायकंप्रतीयमुनिः।
अत्रदयावीरस्यानुभावविशेषेशृंगारउपमानभावेनांगं। नचात्रदयापिविस्मयोपकारकत्वेनांगं। बौद्धानां
स्वाभाविकदयाशीलत्वेनविस्मयजनकत्वात् एकत्रांगिनिविरुद्धयोरंगत्वंद्विधा। तुल्यकक्षतयोगांगिभावे
नसाक्षात्परस्यांगभावमापद्यवा। तत्राद्येनाविरोधोयथा। कामंत्यः क्षतकोमलांगुलिगलद्रक्तैःसदर्भाःस्थलीः
पातितः पादैः पातितयावकैरिवगलद्बाष्पांबुधौताननाः। भीताभर्तृकरावलंबितकरास्त्वद्वैरिनार्य्योऽधुनादावाग्निंपरितोभ्र
मंतिपुनरप्युद्यद्विवाहाइव॥ अत्रचाटुकेयाराजविषयारतिस्तत्र करुणशृंगारावनुभावविसाक्षादंगं। नेतेत्त
न्निर्वाहैकव्याकुलयोस्तयोरेकराजकार्य्यमिषतयोरिवभटयोः सहजतोविरोधोपिनदोषाय। यथा। ए
हिगच्छपतोत्तिष्ठवदमौनंसमाचर। एवमाशाग्रहग्रस्तैःक्रीडंतिधनिनोर्थिभिः॥ अत्रप्रधानेक्रीडायामंग
भावेनभावाभावयोरपिनविरोधः। एहीतिक्रीडंतिगच्छेतिक्रीडंतीतिप्रकारेणाभयोरपिप्रकारत्वेनतः। ग
तोनस्याद्विरुद्धयोरेवविरोधादोषायनत्वनूद्यमानयोरपीतिपरमार्थः। प्रकृतोदाहरणेचपुनरप्युद्यदि ८४ राम

वालाइवेत्युत्प्रेक्षातेनगर्भे इतिवत् प्रजापद्वयोरपिसाक्षाद्देवांगत्वंतादृशोयंप्रभावोयेनासांगुनर्द्विवाह अत्रेदयमइति
प्रतीतेपर्यवसानात्। अंगांगिभावेनपरांगतया अविरोधोयथा॥ क्षिप्तोहस्तावलग्नःप्रसभमभिहतोप्याददानोंशुकांतं
गृह्णन्केशेष्वपास्तश्चरणनिपतितोनेक्षितःसंभ्रमेण। आलिंगन्योवधूतास्त्रिपुरयुवतिभिःसाश्रुनेत्रोत्पल
लाभिःकामीवार्द्रापराधःसदहतुदुरितंशांभवोवःशराग्निः॥ अत्रत्रिपुररिपुप्रभावातिशयस्यकरुणोंगंतस्यतु
शृंगारः। नन्वेवंकरुणस्यप्राधान्येतत्रैवविश्रांतेरुभयोरंगत्वासंभवेकथमुदाहरणत्वमितिनवाच्यं। शृंगा
रापेक्षयाहितस्यप्राधान्येपिनतत्रैवविश्रांतिरितितस्यापिप्रभावंप्रत्यंगतैवयतःयथाशर्वकामुकऋषयस्त्वं
दिक्रमकार्यौत्तियासंप्रतिशराग्निरित्युपमानतयाशृंगारपरिपोषितेनकरुणेनप्रभावातिशयएवप्रकर्षमा
नीयते। नचांगांगस्यकथमंगत्वमितिवाच्यं। तदुपकृतस्यांगस्योपकारविशेषाधायकतयातस्याप्युपकारक
त्वात्। यदुक्तं। गुणःकृतात्मसंस्कारःप्रधानंप्रतिपद्यते। प्रधानस्योपकारेहितथाभूयःप्रवर्त्तते इति। ननुप्रा
कप्रतिपादितरूपवैशांतरसंपर्केणान्यरसस्यनरसातनेगविरोधेनाप्यंगांगिभावकृत्यसंबंधमेवतत्सर्वमिति
चेत् नरसशब्देनात्रप्रकरणेभावस्याभिधानात्रसस्यैतदित्युत्सन्नेः॥ ॥इतिश्रीमहोपाध्यायश्रीगोविंदकृते
काव्यप्रदीपेसप्तमोल्लासः॥ ७॥ ॥एवंदोषान्निरूप्यतेगुणालंकारौप्रस्तावसंगतत्वेनतयोर्लक्षणस्यांतरंगतया
श्राधम्यांविप्रतिपत्तेतुकेचिद्गुणालंकारयोर्भेदःकिंत्सामान्यतोनास्तीतिविशेषलक्षणमुक्तमिति
तानेकाह्वयेनतयोःस्वरूपदर्शनगुरवेनलक्षणंदर्शयन्भेदमाह। येरसस्यांगिनोधर्माःशौर्यादय इ
वात्मनःउत्कर्षहेतवस्तेस्युरचलस्थितयोगुणाःशौर्यैःशरीरैःसामान्यकाव्यप्राधान्येनास्थितस्यरस

८५ स्य धर्मा साक्षान्न दाक्षितादृसर्यः। अचलस्थितय इत्यस्य अचलस्थितय अव्यभिचारिस्थितय इति यावत् अव्य
का॰ प्र॰ भिचारश्च रसेन तदुपकारेण वा तेन रसं विना वा तिष्ठन्ते अवतिष्ठमाना अवश्यं समुपकुर्वतीत्यर्थः अत एवा
85 नयोर्व्यतिरेकमलंकारे वक्ष्यति। एवं च रसस्योत्कर्षहेतुत्वे सति रसधर्मत्वं। तथात्वे सति रसाव्यभिचारिस्थि
तित्वं। अयोगव्यवच्छेदेन रसोपकारकत्वं चेति। तल्लक्षणं गुणानां द्रष्टव्यं। अलंकारमात्रभेदकं तु सत्य
न भाति। विमृतमिदमेव ग्राह्यं [illegible] अन्यथा विशेषणवैयर्थ्यात्। चंडीदासस्तु रसधर्मभ्रांत्वं लक्षणं उत्कर्षहे
तुत्वं तु गुणशब्दव्युत्पत्तिबीजमित्याह। तदप्ययुक्तम्। अंगत्वादौ धर्मातिव्याप्तेः ननु रसधर्मत्वमेषामसि
द्धं कथमन्यथा नीरसेऽपि सुकुमारादिवर्णशालिनि मधुरादिव्यवहारो रसवत्यपि [illegible]वर्णाभाववत्य
मधुरादिव्यवहाराभाव इति। उच्यते। शौर्यादयस्तावदात्मन एव धर्मा इत्यविवादं। दृश्यते तु क्वचिदशूरस्या
कारमहत्त्वादियोगिनि शूरव्यवहारः शूरस्याकारलाघवादियोगिन्यशूरव्यवहारश्च तत्कस्य हेतोः
अयं क्वचित् शूरव्यवहारविषये विततास्ताते दर्शनादाकार एवास्य शूर इत्यौपचारिकव्यवहारा अ
भियुक्तानामाकार एवैतादृशः शूरपदवाच्य इति विपर्यासाद्दूरदर्शिनस्तथा व्यवहरंति। तत्तज्ज्ञास्तु
क्वचिदुपचारात इति वक्तव्यं। तेवं मधुरादिरसयोगिनि सुकुमारादिवर्णयुक्ते मधुरादिव्यवहाराद्वर्णा एवा
यं मधुरादिरित्यौपचारिकं व्यवहाराद्वर्णा एवायं। मधुरादिरित्यौपचारिकं व्यपदेशाज्ज्ञाभियुक्तानां वर्णा ए
वैतादृशो माधुर्यभागिति विपर्ययाद्रसपर्यंतावगाहिबुद्धिविधुरा व्यवहरंति। न तात्त्विकस्तु क्वचिदुप
चारादित्युक्तमेतत्। ननु शौर्यादेरात्मवृत्तित्ववत् मधुरत्वादीनां रसवृत्तित्वव्यवस्थितावेवं स्यात् सैवत्व ८५ राम॰

सिद्धा विनिगमकाभावादिति चेत् मैवं । भवसेव विनिगमकाभावो यदि तथा वर्णमात्राश्रया गुणाः स्युः न तु शब्दगतेन ले
वं । अविशेषगुणरचनायामपि तदनुपगमात् । तथा च रसमात्रवृत्तित्वे लाघवं वर्णरचनोभयवृत्तित्वे तु गौरवं यत
श्चैवं माधुर्यादयो रसधर्माः समुचितैर्वर्णादिभिर्व्यज्यन्त इत्येव सम्यक् । व्यंजकत्वं चैषां यथा तथोदाहरिष्यत इति
नातिप्रसंगशंका । उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलंकारास्तेऽनुप्रासोपमादयः ॥ अंगिनो रसस्यां
गभूतौ शब्दार्थौ तद्द्वारेण तदतिशयाधानमुखेन ये धर्मिणं रसमुपकुर्वन्ति तेऽलंकाराः । तत्र शब्दद्वारेणानुप्रासाद
यः अर्थद्वारेणोपमादयः । यथा कण्ठाद्यंगोत्कर्षद्वारेण शारीरिणोऽप्युपकारका हारादयः । सन्तमिति यत्र रसस्य
संभवस्तत्रैव तमुपकुर्वन्ति यत्र तस्यासंभवस्तत्रोक्तिवैचित्र्यमात्रपर्यवसिता इति भावः । जातुचिदिति न तु नियमेन । त
था च सन्तमपि विरसं क्वचिन्नोपकुर्वन्तीत्यर्थः । एतावता रसाव्यभिचारित्वं चलस्थितित्वं च गुणतः प्रदर्शितं । तथा च रसोपका
रकत्वे सति तदवृत्तित्वं तथात्वे सति रसाव्यभिचारित्वं वा नियमेन रसोपकारकत्वं चेति सामान्यलक्षणत्रयम
लंकाराणां । गुणभावभेदकं तु सत्यन्तभागरहितं तत्तद्दलं तत्र व्यर्थविशेषणत्वात् । तत्र शब्दद्वारेण रसो
पकारकत्वं यथा । अपसारय घनसारं कुरु हारं दूर एव किं कमलैः । अलमलमालि मृणालैरिति वदति दिवानि
शं बाला ॥ १ ॥ अत्र रेफानुप्रासः शब्दमलंकुर्वन् शृङ्गारमुपकरोति । रेफस्य शृङ्गारव्यंजकत्वात् । अर्थद्वारेण यथा ॥
मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव । हिनस्ति प्रत्यंगं ज्वर इव गरी
यानितस्ततो न मां त्रातुं तातः प्रभवति न चाम्बा न भवतीति ॥ १ ॥ अत्र विषमिवेत्यादिरुपमा सा चार्थमलंकुर्वाणा
रसमुत्कर्षयति । विषमिवेत्युपमावशेन विसर्पणादेरतिशयप्रतीतेः विप्रलंभोत्कर्षात् । रसं विनाप्यलंकार

कृष्णा १

८६ संभवोयथा। स्वच्छंदोच्छलदच्छकच्छेत्यादौ चित्रभेदे सत्यपि रसे तदनुप कारकत्वं शब्दालंकारस्य यथा॥ चित्ते विहु

ट्टदिव दवत रुणी तरद्दी। अत्रानुप्रासेन शब्दमात्रमलंक्रियते न तु सन्नपि शृंगारः टवर्गस्य तत्प्रातिकूल्यत्वात्। अत्र

पृ: 86 च प्रतिकूलवर्णत्वेन दोषः। प्राकृतस्योजोगुणप्रधानत्वात् अस्य च तदभिव्यंजकत्वा दिति केचित्। वस्तुतस्तु

सत्यपि प्रतिकूलवर्णत्वे रसस्य नानुसंधानेन कथमनुभवति रोधात् किंत्वपकर्षमात्रं न चापकर्षे। पि विद्यमाने

तस्मिन्वर्णानुप्रासस्योपकारकत्वेति सारं। सत्यपि रसे तदनुपकारकत्वमर्थालंकारस्य यथा॥ मित्रे क्वापि गते सर

रोरुहवने बद्धानने ताम्यति। क्रंदत्सु भ्रमरेषु वीक्ष्य दयितासन्नं पुरः सारसीं। चक्राह्वेन वियोगिना विसलता

क्रि नास्वादिता नोज्झिता कंठे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः॥१॥ अत्रोपमार्थालंकारः न चासौ प्रकृतस्य शृं

गारस्योपकारिका। विप्रलंभे हि जीवनिर्गमोपि वर्ण्यते तदुत्कर्षाधायकत्वादिति तन्निरोधहेतूपादानमनुचितं प्रत्युत

स्नेहाभावे पर्यवस्येत्। तदेतदुक्तं अत्र विसलता जीवं निरोद्धुमप्रभवतीति प्रकृताननुगुणेति। अप्राकृतत्वं वानुचितत्व

मिति प्राचः। वस्तुतस्तु तदन्यथा व्याख्येयं। विसलता जीवं रोद्धुमशक्तेत्युपमा प्रकृताननुगुणेत्यप्रेति। अप्राकृतत्वं

वानुचितत्वमिति प्राचः। वस्तुतस्तु तदन्यथा व्याख्येयं। विसलता जीवं रोद्धुमशक्तेत्युपमा प्रकृताननुगुणा प्रकृ

ते विषये अननुगुणा न हिता उपमा या अनुगुणं यत्सादृश्यं तत् स्यात् तस्मादुत्प्रेक्ष्यमानालंकारः किं तत्प्रेक्षान

वतस्याम्पि तद्बोधताद्वस्थ्यं। संभावितेनापि सादृश्येन न तत्प्रवृत्तेः। न तूपमावदुस्तु सत्वेव जीवरोधकत्वरूप

सादृश्यमत्यविषये उत्प्रेक्षणीयं रोधे एवं वा तद्भूतं यस्येत्येते रोधकत्वलिवनिहितमिति। तर्हि कथमिदं प्रवृत्तो

दाहरणमिति चेत् अस्वेद्यातो रसतया संप्रतीतेः प्रत्युत्ताहस्तोस्ति वाच्योपमेत्यायेनापकर्षपर्यवसानादि ८६

राम॰

ति। एषां एवं गुणालंकारविभागो विचारसहो नान्यः। तदेवं गुणालंकारयोर्भेदे व्यवस्थिते यत्कैश्चिदुक्तं लौकि
कयोर्गुणालंकारयोः शौर्यादिहारादेः समवेतत्वसंयोगित्वाभ्यां भेदः संभवति अलौकिकयोर्माधुर्याद्यनुप्रा
सोपमादेः उभयोरपि समवेतत्वादनुपपन्नो भेदस्तस्मात्तयोर्भेदाभिधानं गड्डलिकाप्रवाहन्यायेन। तथा हि।
गड्डलिका मेषी काचिदेका केनापि हेतुना अग्रे गच्छति इतरास्तु विनैव निमित्तं भित्तिं विचारं तामनुगच्छन्ति। तथा
केनाप्यलंकारिकेण गुणालंकारौ केनचिदभिप्रायेण भिन्नतयोक्तौ इतरे तु हेतुविचारं विनैव तदनुसारेण तद्भे
दं वदन्तीति तदसम्यगवेदितव्यं। यदप्युक्तं वामनेन काव्यशोभाभाव्यव्यवहारनिमित्तं कश्चिदतिशयः तद्धे
तवो गुणास्तदतिशयहेतवस्त्वलंकारा इति तयोर्भेद इति। तदप्ययुक्तं। यतः शोभाहेतवो गुणा इत्युक्तं तत्र
किं समग्रैर्गुणैः काव्ये शोभोत्पत्तिः उत येन केनापि। आद्ये पांचालीगौडीययोरीतिः कथं काव्यं स्यात्तासां माधुर्या
द्यभावेन समस्तगुणाभावाच्छोभानुत्पत्तेः। अंत्ये अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूम
इत्यादावोजःप्रसादगुणसत्त्वात्काव्यव्यवहारप्रसंगः। नहि मन्मते द्वयमेतदपि तद्व्यवहारेऽलंकारापेक्षा। तेन
गुणभावेनैव काव्यव्यवहारस्वीकारात्। यदपि शोभातिशयहेतवोऽलंकारा इति तदप्ययुक्तं। स्वर्गप्राप्तिरनेनै
व देहेन वरवर्णिनी अस्या रदच्छदरसो न्यक्करोतितरां सुधां। इत्यत्र पूर्वार्द्धे विशेषोक्तिः एकगुणहानिक
ल्पनया शेषगुणदार्ढ्यवर्णनं विशेषोक्तिरिति वामनलक्षणात्। उत्तरार्द्धे व्यतिरेकः। उपमेयस्य गुणाति
हेतु=२ रेकत्वं व्यतिरेक इति तल्लक्षणात्। एतौ च गुणानपेक्ष्यैव काव्यव्यवहारशोभाजनकौ। एवमन्यत्राप्यूह्यं। नत्वत्रा
पि प्रसादादेर्वर्तमानत्वात्काव्यं गुणानपेक्षत्वमलंकारयोः किं च निर्गुणत्वे कथं त्वत्पक्षे काव्यव्यवहारः स्या

तो

एवंविधोगुणाभावादितिचेत् अस्त्येवात्मगुणेष्विवयथाज्ञानंचपरंतुकिंचिद्गुणएवत्वस्यशोभाहेतुत्वेतिप्रसंगात्तमस्म

८७ का॰प्र॰ 87 गुणत्वंतथाक्तव्यंनचात्रतत्सामान्यंतथाचगुणजन्यशोभामनपेक्ष्यैवालंकाराभ्यांशोभासम्पत्तिरितितातस्य

इदानींगुणानामलंकारभेदेसिद्धेदशविधत्वमुदासायतद्भेदमाह।माधुर्यौजःप्रसादाख्यास्त्रयस्तेनपुनर्दश

विभागक्रमेणैषांलक्षणमाह।आह्लादकत्वंमाधुर्यंशृंगारेद्रुतिकारणं।आह्लादकत्वंयद्यानंदहेतुत्वंतर्हिनशृं

गारस्यापितस्यैवसुखात्मत्वे नातज्जनकत्वात्।आनंदस्वरूपत्वेचेत्ताहिसर्वेषामेवरसानामित्यतआह।द्रुति

कारणमितिद्रुतिश्चेतसोगलत्वमिवदर्पाद्यजन्यकाठिन्याभावःतथाचयद्दर्शनश्रवणात्तुनिर्मनस्केतेवसंपद्यते

तदाह्लादकत्वस्वरूपंमाधुर्यमित्यर्थः।यदुक्तं।गलितत्वमिवाह्लादपदव्याहृदयेददत।माधुर्यंनामशृंगारे

प्रयोहंगमाहतेगुणइति।क्वासावित्यतआह।शृंगारइति।शृंगारपदंसंभोगपरंविप्रलंभेतिशयस्यवक्ष्यमाणत्वात्।भा

रुकरत्सास्त्रयत्वंमाधुर्यस्यलक्षणमाहस्मतदप्युक्तं।ओजःप्रसादयोरपितत्स्वेनातिव्याप्तेःशब्दानिष्टत्वाच्च

तत्किंसंभोगएवमाधुर्यमित्याह।करुणेविप्रलंभेतच्छांतेचातिशयान्वितं।संभोगात्करुणेतस्माद्विप्रलंभेतोपि

शांतेतुजुगुप्साद्यन्वयाद्यतोतिमात्रविद्रुतिमिति।दीप्त्यात्मविस्तृतेर्हेतुरोजोवीररसस्थिति दीप्तिस्वरूपा

यामनसोविस्तृतिर्ज्वलितत्वमिव। तथाचयद्वशात्ज्वलितमिवमनोजायतेतदोजइत्यर्थः।छेदनित्य घे

आह।वीररसस्थितिरिति।अस्याधिकरणांतरमाह।बीभत्सरौद्ररसयोस्तस्याधिक्यंक्रमेणतु।वीराद्बीभत्सेततो

पिरौद्रेचित्तदीप्तिरूपाप्यस्यातिशयतयाकारणमोजःक्रमेणोत्कर्षवत्तदेतत्वीररौद्रयोर्वीरःप्रतिपद्य त्रि

बीभत्समाधुर्यलावण्यविद्रुतिमितिविशेषः।प्राधान्येनमाधुर्यौजसोरेकैकविधानमत्रप्रक्रांतमतोहास्या ८७ राम॰

द्रुतमयानेकेषु न किं विहितं तेषु मयगुणप्राधान्यात्। शुष्केंधनाग्निवत् स्वच्छजलवत् सहसैव यः व्याप्नोत्यन्यत् प्रसा
दोऽसौ सर्वत्र विहितास्थितिः। ओजसि शुष्केंधनाग्निवत् माधुर्ये स्वच्छशर्करावस्त्रादिजलवद्योगगुणोस्य — व्याप्नोति तं
दि सेवरसेन व्याप्नोति स प्रसादः करणस्यापि स्वातंत्र्यविवक्षयायदतीति निर्देशः। अयं च सर्वेषु रसेषु योज्यतया सर्वा
सु रचनासु व्यंग्यतया स्थित इति तं तेनाह सर्वत्र विहितस्थितिरिति कथं तर्हि तत्स्वेदिनाम पि शब्दार्थयोर्मधुरा
दिव्यवहारस्य सत आह। गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता। गुणवृत्तिरुपचारः आकारे शौर्यस्येव व्यं
जके सुकुमारवर्णादौ तदुपचार इत्यर्थः। तेषां गुणानां नानात्व लक्षणः श्लेषादयोपि दश कुतः पुनर्वा स्ततः
न्त्रय एव न च न मधुरात्मा अपि दश इत्यत आह केचिदंतर्भवंत्येषु दोषत्यागात् परे श्रिताः। अन्ये भजंति दोषत्वं कुत्र
चित्तत्ततो दश। एषु मधुरतालक्षणेषु माधुर्यादिषु। इदं चोपलक्षणं। अलंकारध्वन्योरप्यंतर्भावस्य दर्शयिष्य
माणत्वात्। उक्तांतर्भावादिहेतुत्रयोपादानमप्युपलक्षणं वैचित्र्यमात्रपर्यवसानस्यापि दर्शयिष्यमाणत्वा
त् दोषत्यागादिति दोषाभावस्वरूपत्वात्तु न व्यापकतया वा दोषत्वे कुत्रचिदिति दोषस्वभाव
स्य गुणस्वभावत्वानौचित्यात् स्वभावभंगप्रसंगात् तथाहि श्लेषस्तन्मते बहूनामपि पदानाम
मेकवद्भासनं समाधिस्त्वारोहावरोहयोः क्रमः स चोत्कर्षापकर्षयोर्वैरस्यानाधायको वि
न्यासः उदारत्वं विकटात्वरत्वं तच्च नृत्यादिति पदैर्घ्यघटनात् तत्त्वं प्रसाद ओजोमिश्रितशै
थिल्यं सर्वे पोष्यं शैथिल्यं सदोषत्वात् न तदेतत् न चतुष्टयमोजस्यंतर्भूतं पद्यपिदीर्घजनकत्वरूपे

रसनिष्ठश्चौजस्तिनेषामंतमैवसंभवः तथापि तत्स्वीकारेणास्वीक्रियते न ह्योजकेगात्वं घल
त्तरोणेनदंतभीवरस्यार्थः एवमन्येपि पृथक्पदत्वं पेनमाधुर्यभिव्यासात्तादेवोयात्वं· यथाक्त
प्रसादस्यनद्युगपत्वात् समनात्वात्ववेदर्थादिमार्गीपरित्यागः साचक्वचिद्दोषएवयथा
मातंगाः किमुवल्गितैरित्यादौ प्रारब्धस्यमसृणावर्णात्वस्यातिहेभिधानेप्यत्यागो दोषायनतूप
रित्यागस्तुप्रस्तुतरसगुणाद्यनुमेन न च दोषस्वभावस्यगुणत्वम् स्वभावभंगप्रसंगात् सकृमा
रत्वंचनिष्ठुरत्वादरस्रायतेवच्चकष्टत्वं पदोषाभावएवमतं कोंतिमात्वलतनाउज्वलत्वगुग्रा
म्यपदाचारितत्वमिति तस्यापि ग्राम्यत्वं पदोषाभावएवमन्तैव. एवंदप्रापाद्गुणानए
घवक्तव्याः अर्थगुणास्तथैव तथाहि अर्थस्यौजः प्रौढिः साचपदार्थेवाक्यरचनेवाक्या
र्थेचपदाभिधा प्रौढिर्व्यासमासौ च साभिप्रायत्वमस्यचेति प्रतिपादितपंचप्रभेदा. ऋष्मा स्यपा
द्यभेदेचतुष्टयम्भङ्गिवैचित्र्यमात्रेनगुणाः नैविनापिकाव्यव्यवहारामाधुर्यादिनिरपेक्षेणा
चतेनतत्काव्यव्यवहाराप्रवर्तनान्नअन्यत्तद्देशोऽपुष्टार्थत्वं पदोषाभावएवमन्तः एवंप्रसा
दोर्थनैर्मल्यं प्रयोजकमात्रार्थपरिग्रहत्वेतिपावनं सोप्यधिकपदत्वपदोषपरित्यागादे
वान्यथासिद्धसन्निधिः माधुर्यंउक्तिवैचित्र्यमनवीकृतत्वंचरूपनद्यानवीकृतत्वंरूपतद्यो ८८

नवीकृतत्वरूपदोषाभावरूपो सौकुमार्य्यं पुनरपारुष्यं परुषेत्यर्थे ऽपरुषशब्दाभिधा
नमिति निपातवत् तच्चाग्राम्यत्वरूपाश्लीलत्वपरित्यागेनैव सिध्यति उदारता त्वर्थस्याग्रा
म्यत्वं तच्चाग्राम्यत्वरूपदोषाभाव एवेति अर्थव्यक्तिस्तु वस्तुस्वभावस्फुटता सा च
स्वभावस्फुटता सा च स्वभावोक्त्यलंकारेणाक्रान्ता कान्तिस्तु दीप्तरसत्वं सा च रसध्वनेरसवद
लंकारेण गुणीभूतव्यङ्ग्यप्रपञ्चेनाक्रान्ता श्लेषस्तु क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूप ख४
घटना अस्यार्थः क्रमकौटिल्यमतिक्रमः तस्यानुल्बणत्वमस्फुटता तत्रोपपत्तिर्युक्तिः
तस्या योग इति यथा दृष्टैकासनेत्यादि अत्र विहितं नयनामतिक्रमस्यास्याश्चुंबनादिति
क्रमः तस्यास्फुटत्वमनयोस्तदज्ञानात् तत्रोपपत्तिरेवमन्यथा तु न ज्ञातव्यमिति केचि
त्तु क्रमकौटिल्यं क्रमस्यातिक्रमः स चात्र व्यक्त एव एकदेवोभयानुरंजनान्नत्यपरश्लेष
उक्तिवैचित्र्यमात्रं न गुणः अनन्यसाधारणरसोपकारित्वातिशयविरहात् समता तु
वैषम्याभावो ऽर्थस्य स च प्रक्रमाभेदरूप प्रक्रमभेदरूपदोषाभाव एव दोषत्वं तु तद्व्य
तिरेकस्य कथमिति चेत् येनानवलम्बितुं नम्रो ऽन्यो ऽन्यप्रसक्तावेत्यदभिधानादिति
समाधिः पुनरर्थदर्शनं चासौ गुणः कव्यशरीरत्वात् स्वयं दृष्टस्यान्यच्छायायोनि

स्यार्थस्य पदिनदर्शनकथं नहि काव्यशरीरनिष्पत्तिः असाधारणशोभाधायकं हि
गुणाश्च वर्तन्ते न च काव्यशरीरनिर्वर्तकमिति उक्तयुक्त्या बुद्धिस्थीकृत्याह तेन नार्थगु
णा वाच्याः परैरङ्गीकृतार्थगुणास्ते चोक्तयुक्त्या न पृथक्कर्तुमर्हाः प्रोक्ताः शब्दगु
णाश्च ये वर्णाः समासो रचना तेषां व्यंजकतामिताः एतत्त्रयमुपचारेणान्यैः
शब्दगुणाः प्रोक्ताः वस्तुतो रसगुणा एव वर्णादयस्तेषां व्यंजकत्वं गताः के क
स्य व्यंजका इत्यपेक्षायामाह मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू अवृत्तिर्म
ध्यवृत्तिर्वा माधुर्य्ये घटना तथा माधुर्य्ये व्यंग्ये टवर्गवर्जिताः कादिमान्ता रेफणाका
रौ चेति वर्णाः तत्र कादयो मूर्ध्नि स्वस्ववर्गान्त्यवर्णगताः यथाङ्कजङ्घादि रेफ
णकारौ न ह्रस्वस्वरान्तरितौ वृत्तिः समासस्तस्य चाभावश्च मध्यमता वा इति समा
सः घटना तथेति सा माधुर्य्यवती पदान्तरयोगेन रचना चेति वर्णसमासौ माधुर्य्यवती
रचना वर्णसमासौ माधुर्य्याद्वल[illegible]त्वेति पदान्तरयोगे सा माधुर्य्यलाभाय घटना तथे
त्युक्तमिति उदा॰ अनंगरंगप्रतिमं तदंगं भंगीभिरंगीकृतमानताङ्ग्याः कुर्वन्ति यूनां सहसा यथै ८९
ताः स्वान्तानि शान्तापरचिन्तनानि योगश्चात्र तृतीयाभ्यामन्त्ययोरेणानुस्वारयोः

टादिः शषौ वृत्तिदैर्घ्यं गुंफ उद्धत ओजसि वर्गप्रथमतृतीयाभ्यामन्त्ययोर्द्वितीय
चतुर्थयोर्योगः यथा क्वाकपुच्छेत्यादि तथा रेफेण अधउपरि उभयत्र वा यस्य कस्यापि
योगः यथा वक्रार्कनिर्ह्रादादयः तथा तुल्ययोः कयोश्चिद्योगो यथा वित्तचित्तादौ त
था टादिचतुष्टयं शषौ चेति वर्णाः समासस्य दीर्घः गुंफो रचना सा चोद्धता विकटेति उदा
हृतौ मूर्ध्नि हृत्कृत्तेत्यादिः श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् साधारणः समग्राणां
स प्रसादो गुणो मतः येन श्रुतेन समासेन वा यत्परचनया वा श्रुतिमात्रेण शब्दाद्धृदयेऽर्थप्रत्य
यः स प्रसादः सर्वेषु रसेषु रचनासु च उदा० परिम्लानं पीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्या
न्तः परिमिलनमप्राप्य हरितं इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः २ कृशांग्याः
संतापं वदति बिसिनीपत्रशयनं अन्येषां तु वर्णानामुदासीनत्वाभिमततरपादानेन पुराण
कापि स्यात् नचैवं माधुर्यादावुद्धतारचनासु सर्वत्र विरुद्धाः स्वरितोद्वौ च यत्तु न गु
णपक्षे रचना दृश्यते तथापि वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् रचनावृत्ति
वर्णानामन्यथात्वमपीष्यते अन्यथा तेषु गुणपारतन्त्र्याभावः वक्तृवाच्यप्रबन्धौचित्य
विरहप्रयुक्तगुणपारतन्त्र्यस्वीकारेण तत्रापि चक्रकोद्योगव्यक्तानुपयोगात् तन्त्रक

का·त्र·
९·
९०

विहाव्यवंधानपेत्तपावक्रौविन्यादेवरचनात्यः यथा ·मेथापलाशीवाभः स्कोलिकु
हरचलन्मदरुद्यानधीरः कोणाद्यातेषु गर्जत्सु बलयद्युन चुयन्यान्यसेहद्दचेडः हंसको
धाद्दिहीमरसव्यजकेप्रप्रसूयन्वातः प्रवधस्तुनाटकात्माभिनेयइतिदेहसमासेवेप्रति
ऊलेयदुपिनपापिवक्ताभीमसेनउतिहदौचिन्मादुहनारचनात् अतत्तउदकत्ता
दिव्यक्तावेवोययुज्जते कोचिद्रवक्ताप्रवधोचिन्यानपेत्तयावच्यो चिन्मादेवरचनादयः यथा
प्रोटेछेदान्तरूपाकलनरयमतसेहिकेयोपद्यातत्रासाक्षप्रास्तुतिप्रगवलिनरविरथेना
हरोनेत्यमार्गाकुर्वंत्काक्रान्त्यवीर्यस्तातिमिवमहताकंधमाजाभाकारैभीममेनविधत
तिवियतः कौभकर्णोत्तमांगे अत्रवक्तावैतालिकः प्रवंधस्थानेयात्मेतिदीर्घसमासानोवि
त्येपिवाच्यस्यकुंभकर्णसेवाहन्याउद्दतारचनादयः क्वाचेदवक्तृवाच्यानपेताः प्रवधोचिता
पवरचनादयः तथाहि आख्यायिकायांहि शृंगारेपिव्यमपेतत्युद्धतेपिवक्ताभिनातिमसृ(
णावर्णादयः प्रस्तुतविकृतदेवंधहेतुनैववक्तायावनातुविप्रलंभकरणयोस्तत्तस्यामपिदी
र्घसमासपरीहारः तयोरितिसाकुमार्यातत्कायायातु रौद्रेपिनात्यन्तमुद्धतावर्णादयः वर्णा
नीयमहापुरुषस्वमतिपत्निसमयेयात्स्याहेतुप्रयत्वात् नाटकादावभिनेयेनरौद्रेपिनस

५·

मासादयः वेकेदेनाभिनयसौकर्यात् एवमुक्तकार्थौचित्यमनुसरणीयं यथाह्येकैकच्छे
दसिवाच्यसमाप्तिर्मुक्तके द्वयोः संदानितकम् त्रिषु विशेषकं चतुर्षु कालापकं पंचा
दिचतुर्दशान्तेषु कुलकं तत्र मुक्तकेषु कवेस्सवताभिनिवेशिनो रसाश्रयमौचित्यं यथा
शून्यं वासगृहमित्यादौ रसनिवेशाभावे तु कामचारः संदानितकादिषु काव्यपरिसमा
प्तेर्वैकवेदीर्घमध्यसमासतना च प्रबंधगतेषु पुनस्तेषु प्रबंधौचित्यं पदरचनादय उन्नेयाः दिज्ञेय
इति श्रीम॰ काव्यप्रदीपे ८ मोल्लासः ॥ ८ ॥ एवं गुणे विवेचिते अलंकारा विवेचनीयाः
तत्र सामान्यलक्षणं गुणविवेचनावसर एवोक्तं शब्दालंकारोऽर्थालंकार उभयालंकारश्चेति वि
शेषलक्षणत्रयं चापलभ्यमिति तेषां विशेषलक्षणे पूर्वं वक्तव्ये शब्दस्य प्राधान्यात्तद
लंकारविशेषलक्षणे वक्तव्ये प्रथमं वक्रोक्तिलक्षणमाह यदुक्तमन्यथा वाक्यमन्यथ
ान्येन योज्यते श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा वक्त्रान्याभिप्रायेणोक्तं अन्ये
नान्यार्थकतया योज्यते स गम्यते सा वक्रोक्तिरित्यर्थः श्लेषेण काक्वा वेति योजनाहेतुस्त
स्तेन विशेषलक्षणद्वयं तथा द्विधेति विभागः श्लेषवक्रोक्तिः काकुवक्रोक्तिः काकु
वक्रोक्तिर्द्विधा तत्र न्यर्थः श्लेषस्तु द्विधा सभंगपदोऽभंगपदश्च तत्र सभंगश्लेषेण यथा

का॰प्र॰ ९२ 91 नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो वामानां हितमातनोति हितकृन्नैवा
बलानांभवान् युक्तं किं हितकर्त्तनं ननु बलालाभावप्रसिद्धात्मतः सामर्थ्यं भव
तः सुपुरंदरमतच्छेदं विधातुं कुतः अत्र नारीणामिति पदं स्त्रीणामित्यर्थावक्तुरभि
प्रेतः स्त्रीणामित्यर्थेनयायोजयित्वा अन्यआह हितकृदित्यादि अयथान्योऽबला
नामिति इबलार्थेनयाहितकृदिति हितकृतनार्थेनयायोजयित्वा अन्यआह हि
तकृदित्यादि अयथान्ये ऽबालानामिति इबलार्थेनयाहितकृदिति हितकृतनार्थेनया
योजयित्वाह युक्तं किमित्यादि अयथान्यो बलाभावप्रसिद्धात्मपदं इड्डार्थेनयायोज
यित्वाह सामर्थ्यमित्यादि अत्र नारीणामबलानामिति पदेसंभंगे अभंगमात्रपदे
नश्लेषेणायथा अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी
क्वचित् अत्र दारुणेति स्फुटेन्यर्थकत्वेन वक्तुरभिप्रेतं काष्ठेनेत्यर्थेनान्यायोजितवान् का
कुवक्रोक्तिर्यथा गुरुपरतंत्रतया वत दूरतरं देशमुद्यतो गंतुं अलिकुलकोकिलललि
ते सखि नैष्यति सुरभिसमयेऽसौ अत्र नैष्यतीति नायिकया निषेधाभिप्रायेणोक्तं सख्या
तु नैष्यति अपितु एष्यत्येवेत्यर्थकतया काक्वा योज्यते इयच्छलवक्रोक्तिर्वाक्यमात्रे किंतु ९२

स्वतोप्यन्येनोक्तस्यान्यथायोजनमात्रेणायसाम्यान्नयथा मम   क्रमोवैरिविमर्द्दनेह १
रिपदश्रीत्यर्जनेत्वर्जुनः प्रीतः पंकजलोचनाभिरभितोनेत्रोच्चलैश्चचलैः २ रक्तः सज्ज
नसंगमेषुकररागोश्चरागीसतोश्रीधरस्यावर्णाचतुष्टयस्य भुवनेभर्त्ता भवनीयुतो प्रवर्त्ति ३२
चतुष्टयस्य भर्त्ता श्रीधरद्युतिसार्वलौकिकवास्यक्रममन्यथा श्लेषादिनास्माभिः समर्थि
ते एवमन्यदप्यूह्यं अथाहृत्तिनिबंधनेष्वलंकारेषु लक्षणीयेषु रसानुगुणतया ऽ
नुप्रासः प्रथमं लक्षणीयः स द्विधा वर्णानुप्रासः पदानुप्रासश्च तत्राद्यो भ्याचक्रवर्त्ती
मात्रायत्तो द्वितियस्तु वाचकयदावृत्तौ विनिवर्तते गतिः तत्राद्यं लक्षयति वर्णसाम्य
मनुप्रासः अत्र च घानेन वर्णमात्रविन्यासो वर्णानुप्रास इत्यर्थः प्रावृत्स्यास्यान्वनुप्रा
ससामान्यलक्षणमित्यथाहत्वभ्यानेवर्णायदव्यंजनपर अनेन व्यंजनवैसादृश्येपि विरिवि
पदादौ नातिप्रिः नचैवंचसानत्रानुप्रासप्रावदार्थस्याभावात् रसादिभिरनुगतः प्रकृ
ष्टन्यासोन्यासो ह्यनुप्रासप्रावदार्थः नचस्वरमात्रसादृश्येरसानुगमोनवासदृत्याद्यलोक
तेलक्षणः प्रकर्षः नविमेतेनैकैकवृत्तिगतो द्विधा एकैकगतो विदृग्धास्त्रितः
तेस्वप्रचुरमेतनत्प्रयोगात् वृत्तिगतोवृत्त्यास्त्रितः तद्दुयोद्भूतलकत्वात् वृत्तिस्तुमधुरा

का॰ प्र॰
२९२ 92

दिरसानुगुणोनियतमसृणादिवर्णगतोरसविषयोव्यापारोव्यंजनाख्यः तयोर्लक्षण
माह सोऽनेकस्य सकृत्पूर्वः अनेकस्य व्यंजनस्य सकृदेकवारं साम्यं पूर्वः छेकानुप्रा
सः उदाहरणं ततोरुणपरिस्पन्दमन्दीकृतवपुः शशी। दध्रे कामपरिक्षामका
मिनीगण्डपाण्डुतां अत्र न्दण्डयोः द्वितीयलक्षयति एकस्याप्यसकृत्परः अपिश
ब्दादनेकस्य वर्णस्य सकृदसकृद्वा अनेकस्य चासकृत्साह एवं वृत्त्यनुप्रासप्रवृत्तिर्व
सन्ने तत्रामाधुर्यव्यंजकैर्वर्णैरुपनागरिकोच्यते यथा अनंगरंगप्रतिममित्या
दि ओजःप्रकाशकैस्तैस्तु परुषा यथा मूर्ध्नामुद्वृत्तेति कोमलापरैः उ॰ जोमा
धुर्यव्यंजकातिरिक्तैः प्रसादवद्भिस्तैः एतामेव केचिद्वदंति प्रापितकांतिरहि
तेन ग्राम्यत्वसाम्यात् ग्राम्येति वदंति उदा॰ अपसारयेत्यादि केषांचिदेता वै
दर्भीप्रमुखा रीतयो मताः वामनादीनां मते एता एव यथाक्रमं वैदर्भीगौडीयापांचा
ल्योरीतय उच्यन्ते शाब्दानुप्रासमाह शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः
शब्दनानुरूपव्यापारवानुप्रासः प्रातिपदिकादिः तद्गतः शाब्दः भेद इति तात्प
र्यमात्रकृतभेदस्तात्पर्यमात्रात् भेदेन नरादयोऽद्दा तथा चाभिन्नतात्पर्येतस्यापि यमाच्च २९२

साहर्यंपशब्दानुप्रासः स तु लाटानुप्रास उच्यत इत्यर्थः। तुल्यार्थो वर्णानुप्रासस्य ला
टीयत्वं च व्यवच्छेदकः। यत्र पुनरुक्तानां व्यवच्छेदाय भेदेतात्पर्यमात्रेणेत्यंशमितिव्या
ख्याने नदसत् मात्रपादस्यापुनःप्रयोजकतापत्तेः पदपदैकैस्मिन्पदानुप्रास उच्यते
सोयं यदस्य नाम्नो वेति द्विविधः। तत्र सविभक्तिकस्य पदावृत्तिः स त्राद्यः। अन्त्यस्य हृप्रा
त्काद्वितीयः। तथा राद्योऽनेकस्य यदस्यैकस्यैव वा पदस्येति द्विविधः। अन्त्यस्त्रिविधः। आ
नेरभिन्नसमासस्थतयाभिन्नसमासस्थतथापृकस्थो। समासस्थत्वेनुभयत्रस्थात्र समास
स्थतया च समासं विनास्थासंभवादिति पंचप्रभेदा उन्नि कारिकायामियाहित्ति नत्राद्यंना
न्हयदानोमः पदानामिति वहुवचनमनेकोपलक्षणं अन्यथा द्वयोः पदयोरावृत्ता
पपभेदापत्तेः। उदाहरणं यस्य न समाविधेः पितादवहनस्त्वाहिनहीधितिस्तस्य य
स्य च समाविधेः पितादवहनस्त्वाहिनदीधितिस्तस्य ॥ अत्र यद्यपि पूर्वार्द्धे दहनपा
दस्य परार्द्धे तु हिनदीधितिपादस्यार्थान्तरसंक्रमितवाच्यत्वात्तात्पर्यभेदस्तथापि प्रा
क्यार्थमात्रेणोदाहरणं यद्वा अविनिष्ठयदाहृतेरेवोदाहरणं दृष्टव्यं द्वितीयभेद
माह यदस्यापि अपि प्राकेन सद्विनि समस्तीयते यथा वदनं वरवर्णिन्यास्तस्याः स

का०प्र०
९३ 93

त्यित्सुधाकरः सुधाकरः कान्तु पुनः कलंकरहितत्येमेवेव नाम्नः प्रकारत्रयमाह एत्रा
वन्यत्रानन्त्रव नाम्नः सरत्यत्रयोरस्य इति निरूपितप्रकारत्रयेणानाम्नपदलादानुप्रा
सइत्यर्थः उदाहरणं सितकरकररुचिरविभाविभाकराकारधरणिधरकीर्तिः
पौरुषकमलाकमलासापि नैवेवास्तिनान्यस्य पौरुषकमलपौरुषललक्ष्मीः
तल्लक्ष्मीश्च नवेवेत्यर्थः यद्वा पौरुषकमलमाप्रयोयस्याः सा पौरुषकमलेति व्या
ख्यानेन तद्युक्ते अर्थभेदेनानुदाहरणायत्तेः अत्र कटकटकरेत्येक समासः विभा
विभेति भिन्नो समासो कमलाकमलेति पूर्ववस्यसमासस्तत्र स्यासमासइति त्रयाणामुदाह
रणानदेवं पंचधा मतः व्याख्यान अर्थसत्यर्थे भिन्नानां वर्णानां सा पुनः श्रुतिः यम
कं अर्थे भिन्नानां भिन्नार्थानामित्यर्थः एतद्दलादानुप्रासमतिव्याप्तिवारणाय तन्मा
त्रेच कृते समरसमरसोयमित्यादौ द्वितीयादौ तत्रैर्थाभावादव्याप्तिः स्यादतउक्तंअ
र्थेसतीति प्रत्यर्थः अतः समरसमरस इत्यादौ नातिप्रसंगः एवं च समानार्थत्वाभावेवत
समानानुपूर्वकानेकवर्णाहत्त्रि यमकमिति लक्षणं इदश्च व्यं नदेन द्विभजेत पादत
स्यागरत्तित त्यान्येनेकतो प्रथमपादो यदि द्वितीयपादेयस्यनेतदामुखनामयमकं

तृतीयेनेदासंदष्टः चतुर्थे चेत्तदा ग्राहवृत्तिः एवं द्वितीयपादश्चेत्तृतीयेन तदा गार्भः चतुर्थे चेत्तदा
सहष्टको तृतीयश्चेच्चतुर्थेन तदा युक्तं प्रथमस्त्रिषु चेत्तदायन्त्रितः महायमकमिति केचि
त्पादत्रययमकं तन्न चमत्कारकारित्वेनाप्रयुक्तमित्येकैकपादावृत्तौ सप्त भेदाः प्रथ
मो द्वितीयेन तृतीयश्चतुर्थेन चेत्तदा युग्मकं प्रथमः चतुर्थे द्वितीयस्तृतीये चेत्तदा परिवृत्ति
रित्यर्द्धाभ्यासरूते पादद्वयावृत्तौ द्वमिति नव भेदाः अर्द्धावृत्तिरुक्ता सम्पुटः श्लोकावृत्ति
र्महायमकं तदुभयमपि पादावृत्तिविशेषएवेत्येकादश पादयमकभेदाः पादभा
ने॰ गेष्वप्यादियमपि तदा पूर्ववत्सुख्यादयो दश भेदाः श्लोकान्तरे भागावृत्तिनेस्वदतु नि
श्लोकावृत्तिस्थानीयप्रकारद्वयं भेदो भागावृत्तौ नास्त्येव प्रथमादिपादानामन्त्यभा
गस्य द्वितीयादिपादान्त्यभागेष्वावृत्तिमते पूर्ववद्दश भेदाः एवं द्विखण्डीकृतेषु पादे
षु विंशतिः त्रिखण्डीकृतेषु त्रिंशत् चतुःखण्डीकृतेषु चत्वारिंशत् भेदाः स्थानापरिव
र्त्तिनामेवंति अथ स्थानपरिवर्तनेन भेदाः प्रथमादिपादानामन्तादिभागा द्वितीयादि
पादानामाद्यादिभागेषु यमनं तदन्त्याद्यक्रमेणानुसारेण नानाद्यादियमकादयः प्रभेदा
भवंति तथा हि द्विखण्डे यथा प्रथमपदस्यान्त्यपदे द्वितीयपादस्याद्यार्धे चेद्यम्य

का॰ प्र॰ ५४ ९४

तेनदांतादियमकं प्रथमभागएवश्चेदन्त्यभागे तदाद्यंतयमकं एवं प्रथमपादस्या
द्यंतभागो द्वितीयस्यांतादिभागयोर्यदियस्ते तदाद्यंतांतादियमकयोः समुच्च
यः अत्र त्रिविधश्च न तु संकरयोः पूर्वपादमध्ययमकं पूर्वस्य मध्यादिभागो चेदुत्त
रस्याद्यमध्ययोस्तदा मध्यादिमध्ययोः समुच्चयः एवं प्रथमस्यान्त्यभागो
द्वितीयस्य मध्यान्तभागयोस्तदान्त्यमध्यमध्यान्तयोः समुच्चयः यद्यपि पूर्वस्या
दिभागउत्तरस्यान्त्यभागे चेत्तदाद्यंतकं अन्तभागस्त्वाद्यभागे चेत्तदान्तादिक
मित्यादि प्रकारद्वयमपि भवति तथापि द्विखंडतयोगं न भवतीति पृथक् न गणितो
नाम सर्वेषां चैषामुपरः समुच्चय इति भिन्नपादयमकप्रभेदाः एवं तस्मिन्नेव पादे
आद्यादिभागानां मध्यादिभागेष्वावृत्तौ भेदा ऊह्याः सर्वे चैते नियतस्थानविव
क्षयास्थानयमकभेदाः नियतेषु स्थानेष्वावृत्तेरिति अस्थानयमकभेदा अपि ब
हवो भवंतीति प्रभृ ततम भेदयमकं तदन्तकं आह नतनामिति नास्थलतया कांत
दिग्रांतत्वदाङ्क्यते न त्र एकपादाभ्यासेषु संदष्टं यथा सन्नारीभरणोमायमारा ५४
ध्यविधुशेखरं सन्नारीभरणोमायस्ततस्त्वं पृथिवीं जय द्विपादाभ्यासे यथा

विनायमेनोनयतासुखादिनाविनायमेनोनयतासुखादिना महाजनोदीयतमानमा
दरे श्रीकाभ्यासेमहायमकेयथा सत्वारंभरतोवप्पमवलेविनतारवं सर्वदारगामीने
घादवानलसमस्थितः सत्वारंभरतोवप्पमवलेविनतारवं सर्वदारगामीनेदवानल
समस्थितः द्विखंडेषुभिन्नपादेपादभागाभ्यामेषुद्वितीयपादांतेभागस्य चतुर्थपादांत
भागेयमनेसंदष्टंयथा अनेनरमहिमव्याप्तविश्वावेधानचेदयां पाचमानेचभज
नेश्रणानेमानमेदयांपकश्रसिन्नेवाघाकेपाहेयथायदाननेनयानंयनयाज्यय श्रि
वहितानिवहितास्मरमिता प्रथमपादाद्यभागस्यद्वितीयादिपादानामनाद्यभा
गेषुयमनेएवाहुः आयंतानावयोः समयव्यपायथासरस्वतिप्रसादेभस्थितिचिन्नसर
स्वति सरस्वतीकुरुतेत्रकुरुतेत्रसरस्वति हयोरण्द्वयोरारत्नेनानादिकयोः समस्त्र
पायथासस्मारसौकेदर्पणाकेदर्पणासमारसा श्वारत्नेवानाविभ्राणानाविभ्राणाणाप्र
रत्रवा . चवनवेड्यादेर्द्वितीयभागस्यतृतीयभागोयथनेयथा मधुपराजिपराजितमा
निनीजनमनसुमनसुरभिश्रियाश्रभ्रनवारितवारिजविसंवसंकटिततात्वततात्व
वसंजगत. एवंवैचित्र्यसहस्रैः स्थितमन्यदपह्रम वाच्यभेदप्रभिन्नायतत्पुग

का॰प्र॰
९५ 95

प्रयत्नभाषामात्रः श्लिष्यन्ति शब्दाः श्लेषोसावक्षरादिभिरष्टधा अर्थभेदेन शब्दभेद इति
नयेन भिन्नाः काव्यमार्गे स्वरो न गण्यते इति नयेन युगपदुच्चारणविषयतया यत्र श्लिष्यन्ति
भिन्नं स्वरूपमपह्नुवते एकवृन्तगतफलद्वयन्यायेन पदद्वयार्थद्वयप्रतीतिः स श्लेषस्त्वयर्थः
अक्षरादिभिरिति वर्णपदलिंगभाषाप्रकृतिप्रत्ययविभक्तिवचनभेदादष्टधा श्लेषस्तु
संख्या। अत्र वर्णश्लेषो यथा अलंकारः शंकाकरनरकपालं परिजनो विशीर्णांगो
भृंगी वसु च वृष एको बहुवयाः अवस्थेयं स्थाणोरपि भवति सर्वामरगुरोर्विधौ वक्रे
मूर्ध्नि स्थितवति वयं के पुनरमी अत्र विधावित्यत्र विधिविधुशब्दयोरिकारोकारयो
र्भेदाद्वर्णश्लेषः पदश्लेषो यथा पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव विल
सत्करेणुगहनं संप्रति सममावयोः सदनं अत्र पृथुकानां वालानामार्तस्वरस्य पात्रं प
ले पृथु बहुलं कार्तस्वरस्य पात्रं यत्रेत्यादिक्रमेण पदभेदात् पदश्लेषायाल्लिंगवचन
योः श्लेषो यथा भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी ध्यानालम्बनतां स
माधिनिरतैर्नीते हितप्राप्तये लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरेः अत्र प्रणयिनीत्यादिना द्विवचनैकव ९५

वचने नपुंसकेन तद्द्विवचने चेति लिंगवचनयोः श्लेष एवमन्येप्यूह्यं भाषाश्लेषो यथा
महदेहरसंधम्मेतमवसमासंगमागमाहरणे सरवहृहरणं तंचितमोहमवसरउमेसहस्सा
अत्र प्राकृतेनमम देहि रसंधर्मतं भावत्स्नामाप्र्णागमभगमातं हरनेः हरवधूः स्मरणं तंवेचितं
मोहोऽपसरतु मेसहसेत्यर्थकानि पदानि संस्कृतपदे स्तेनमहरउत्सवदेसहरेणासंधासं
धानेयस्मात्त्रागमाहरणोसमासंगमवहुसरणंसारदूपयस्मात्तर्तो तमोहमवसरेउ
मेहरसहसार्थकानि पदानि प्रकृतिश्लेषो यथा अयसर्वोपाप्यहोशुहदितिसु
चवस्पति सामर्थ्यकृदप्ति त्राणामित्रारणाचनरूपात्मजः अत्र वत्सेतीनी वहिवक्यो
ल्टरिष्टहितिकिंनतिकरोत्योःक्विपिनत्स्वरूपमितिप्रकृतिश्लेषो विभक्तेर्वैचित्र्यविशेषाव
हेतनयापृथगुपादानात्तत्प्रत्ययपदेन अतिरिक्तापरे ननश्लेषो यथा रजनिरमणामौलेः
पादपद्मावलोकक्षणात्समयपरामापूर्वसंपूर्णत्यस्त प्रथमेनविरहमध्येजातु चित्तन्त्रमा
दाहप्रचितरुचिः स्यान्नंदितासानयामे अत्र नंदितेनेतिरचितलिरूपनेनाहंनंदितानेच
कःस्यान्तयामानिदिनोभावोमेस्यादित्यर्थः विभक्तिश्लेषोपथार्वसहृहरसर्ववस्वभव
केउनत्परः नयोपकारसांमुरष्यमापासितनवर्जेने अत्रहरभवेत्पनयोःसंवोधनत्त्र

त्रियायहृत्वाम्यांसुप्तिङ्विभक्त्यंतनवंएवमायासीत्यादिक्रियायदन्येचविभक्तिश्लेषःएवम
न्यत्राप्यूह्यं भेदाभावात्प्रकृत्यादेर्भेदोपिनवमोभवेत् नवमोपीत्यपिभिन्नक्रमः
उदाहरणं योसकृत्परगोत्राणांपक्षच्छेदक्षणक्षमः शतकोटिदतांबिभ्रद्विबुधेंद्रःस
सराजते अत्रैकार्थमात्रनियमनप्रकरणाद्यभावात्द्वावर्थौवाच्यावेवेति सज्ञान्यतो
दुरधिरोहत्वेनोरित्यादिवन्नध्वनित्वं ननुश्लेषस्तावद्द्विधासभङ्गोऽभङ्गपदश्चतत्रा
द्यःशब्दश्लेषःस्वरितादिगुणभेदादेकप्रयत्नोच्चार्यत्वेनयाणश्चभेदाभावाद्विकल्पतग
मफलद्वयन्यायेनार्थयोरेवश्लिष्टत्वात् यद्यर्थभेदेनशब्दभेदइतिनये नद्वितीयेपि
शब्दस्यभेदस्तथाप्युपपन्नाच्छब्दभेदप्रतीतावप्येकतोऽध्यवसायाद्वाशक्तिशब्दभेदःस
र्वथानिरवकाशस्तयासबीलकारबाधकइत्यलंकारान्तराणांप्रतिभामात्रमुत्पादयतीति
नतत्पर्यायत्वं यथा स्वयंचपल्लवाताम्रभास्वत्करविराजिनी प्रभातसंध्येवास्वापफ
ललुब्धेहितप्रदास्त्वत्रपूर्वार्द्धे भङ्गपदः द्वितीयार्द्धेसमङ्गपदश्लेषः द्वयमप्युपमाप्र
तिभोत्पत्तिहेतुः साधर्म्याभावेनतस्याः प्ररोहाभावात् यदुक्तं एकप्रयत्नोच्चार्या
णांतच्छायांचैवविभ्रतां स्वरितादिगुणैर्भिन्नैर्बन्धःश्लिष्टमिहोच्यते अलंकारान्तर ९६

गतोप्रतिभोजनयत्नपदैः द्विविधैरर्थशब्दोक्तिविशिष्टैस्तत्प्रतीयतां इति द्विविधोऽथ
लंकारसर्वस्वकारादिभिरर्थाश्रितत्वेनार्थालंकारमध्ये पठितस्तत्कथं शब्दालंकार
मध्ये पठ्यत इति उच्यते दोषगुणालंकाराणां शब्दार्थगतत्वेन यो विभागः सोऽन्वयव्य
तिरेकाभ्यामेव व्यवतिष्ठते यत्र हि पर्यायान्तरपरिवृत्तिसहत्वं नास्ति तस्य शब्दगतत्वं यत्र
तु तत्सहत्वं तत्रार्थगतत्वं यथा कष्टत्वादयो दोषाः गाढत्वादयो गुणाः अनुप्रासादयोऽल
काराः शब्दगताः पर्यायान्तरेण तदर्थोपस्थापनेन तेषामसंभवात् व्यर्थत्वादयो दो
षाः प्रौढत्वादयो गुणाः उपमादयोऽलंकारास्त्वर्थगताः पर्यायान्तरेणापि तदर्थोपस्था
पनेन तेषां संभवात् उदाहृते च स्वपं च पल्लवेत्यादौ द्वयोरप्यर्थयोः शब्दपरिवृत्त्यसह
त्वाद्द्वयोरपि शब्दालंकारत्वमेवोचितं नन्वाद्यस्याप्यर्थालंकारत्वेनैवमर्थश्लेषः किं
नास्त्येव एवमाह कस्तर्हि तस्य विषयः यत्र पदपरिवर्तनेऽपि न श्लेषभङ्गः यथा
स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं अहो सुसदृशी वृत्तिस्तुलाकोटेः ख
लस्य च अत्र स्तोकेनेत्यादिपदस्याल्पेत्यादिपदप्रक्षेपेऽपि न श्लेषभङ्गः यत्त्वोक्तं
स्वयं चेत्यादौ उदाहृते उपमा प्रतीयमानत्वोपपत्तिहेतुः श्लेषभङ्गः यत्त्वोक्तं स्वयं चेत्यादौ उ

काप्र०
९०

97

दाहृतेउपमाप्रतिभोत्पत्तिहेतुः श्लेषइति तदप्ययुक्तं प्रस्तुतोयमेवात्र श्लेषप्रतिभोत्प
त्तिहेतुः नहाधकत्वात् तथाहि साधर्म्याभावेनोपमायाः प्ररोहाभावादेवतावत्रोप
मावा ध्यायतः कमलमिव सुखमनोज्ञमेतत्कचतितरामित्यादौ मनोज्ञत्वस्य गुण
स्यदीप्तिरूपायाक्रियायावाउभयोर्वा साम्येयघोपमाविवेहतितथासकलपुरमेत
ज्ञानं सत्प्रतिबुधांमुविंवमिवेत्यादावपिशब्दमात्रसाम्येनापिसायुक्तैव साधर्म्यमात्र
स्योपम प्रयोजकत्वात् नस्यवार्थरूपस्यैवशब्दरूपस्याप्यविशेषेणासंभवात्
तथाह्युक्तं रुद्रटेन स्फुटमर्थालंकारावेतावुपमासमुच्चयौकिंतु आश्रित्यश
ब्दमात्रं साधर्म्यमिहापिसंभवतइति अथात्र साधर्म्यसंभवेपितोपमासाधार
णधर्मप्रयोगशून्याहिकमलमिवमुखमित्यत्रावन्मात्रादिरूपमाविषयः अ
त्रतुशब्दरूपसाधारणधर्मप्रयोगएवेति वैयात्याद्युक्तमतदपि नयुक्तं शून्यो
पमायानिर्विषयत्वापत्तेः साधारणधर्मप्रयोगेउपमात्वात् तदप्रयोगेत्वशून्यो
त्वात् तदेतदुक्तं तच्चकमलमिवमुखमित्यादिः साधारणधर्मप्रयोगशून्यउपमाविष
यइतिवक्तुंयुक्तं शून्योपमायानिर्विषयत्वापत्तेरिति केचित्तुप्रसक्तदन्यथाव्याख्यातेनेत २६०

था हि यत्र साधारणधर्मप्रयोगोऽउपमात्वात् न तु मयी गोत्वपूर्णात्वात् न देन दुक्तेन च
कमलमिव मुखमित्यादिः साधारणधर्मप्रयोगशून्य उपमाविषय इति वक्तुं युक्तं पूर्णो
पमायां निर्विषयत्वापत्तेरिति केचित्पुनस्तदसम्यग्व्याचक्षते तेन तथा हि यत्र साधार
णधर्मो हारेष्वुपमा संभवति प्रसिद्धत्वात् स उपमाविषयो न चात्र न घट्यते इत्यर्थः अ
पूर्णोपमाविषयो न स्यादिति यद्वा श्लेषस्योपमाबाधकत्वायेन दंशी त्रि यतेन तथा श्ले
षस्योपमाबाधकत्वे पूर्णोपमा निर्विषयैव स्यात् कमलमिव मुखं मनोज्ञमेतद्धि स्वत्र
मनोज्ञत्वस्य संबंधि भेदाश्रनात्वेनाथ श्लेषस्वीकारादिति समाधानार्थः न चैवं श्ले
षस्यात्वेत्र संकीर्णस्य लाभाभावादिति चेन्नात्र मेवदेव पातालमाश्रानात्वविवेधनं न
चामरमकड्डामेरेकोलोकचयात्मकानन्यादीवल्लेकारान्तरासंकरात् तथा हि नना
वदन्तोयमा इवाह्वयोगात् नाप्युपानालादिना रूपकं चाच्यक्ष्यगपस्यान्तस्य संभवे
पिवाच्यापेत्तपैवासंकरगवेषणमिति केंचपेन धृत्त मनोभवेनेत्यादौ नात्येव
किंचिदलंकारान्तरमिमुपमाश्लेषयोर्विभक्तोदाहरणासंभवात् बाध्यबाधकभा
वानुपपन्नमेतद्वयोर्योगे संकरपदे निवरमनुपपन्नत्वा उभयत्र निर्वर्यालोचनेनुप

मायाएवायंविषयोनश्लेषस्येत्युक्तमेव उपयंतिश्रुयंव्यपदेशाः प्राधान्येनसंभवंतीति
वक्ष्यति प्रधानेचात्रोपमाश्लेषस्यजन्निर्वाहकस्यनदंगत्वान्नहिश्लेषविनासमा
नधर्मत्ववाच्यत्वलक्षणोपमाधर्ममुपमानिर्वहति उपमानन्नश्लेषयोगेश्लेषवतीति
विनातत्प्रतीतभावेननदनुपकारकत्वादिति यद्विचोपमाव्यवहारवारणायसाधार
णधर्मप्रयोगशून्यउपमाविषयइतिस्वीकर्तव्यंतदाश्लेषेणोपमायानिर्विषयत्वमेव
स्यादिति नचैतदुक्तंप्रन्यथाश्लेषोपमायाःपानिर्विषयत्वायत्तेरिति नकेवलमुप
मायाएवश्लेषबाधकत्वेकिंतुलकारांतरस्यापि यत्वाप्रविदत्संदेहेनित्यगलल्ला
वापविरदकेस्यविरोधालंकारस्यनत्तत्राथेहृदयप्रतियादकशब्दस्यश्लेषः विंदुरोहि
तान्नपुसोहितोपार्थस्यप्रतिभामात्रविषयस्यप्ररोहाभावात् ननुप्रत्रोपिश्लेषायो
लंकारांगविरोधाभासवदितिचेत् भवेदेवंयदिविरोधाभासस्यविरोधत्वमिवश्लेषा
भासस्यश्लेषत्वमनुमतंकस्यापिभवेत् नत्वेवं तस्माद्विविधेविषयेश्लेषप्रति
भोत्पत्तिहेतुत्वलंकारांतरप्राधान्यात् तथावसहृदयप्रयुक्तामुणामित्यत्र अपरिपरितप्ति
षद्रूपकेरूपदप्रधानवश्रयाश्लेषस्तावेणकुल्लयोन्नपकोपयोमातपानदेगमि

तिश्लेषस्तेन निर्वाहकत्वं तेन प्रतिभोत्पत्तिहेतुर्व्यतिरिक्तस्तत्पर्यवाहकत्वं तेन प्रतिभोत्प
त्तिहेतुर्व्यतिरेकः अनुरागवती संध्या दिवसस्तत्पुरःसरः अहो दैवगतिश्चित्रा तथापि न स
मागमः इत्यत्र समासोक्तिहेतुरलंकारः अभिधाया नियमने श्लेषस्यासंभवात् आदाय
चापमचलं कृत्वाहीनगुणं विषमदृष्टिः यश्चित्रमच्युतशरो लक्ष्यमभांक्षीत्तमस्तु से
वयत्र विरोधपूर्वालंकारः श्लेषस्तेन तदंगमात्रं प्ररोहात् कवीनां समतायाश्च महा
मभितोदग्रगतिरिति तिग्मरश्मिवरवरचापमिनताश्चित्रमधिके चतुर्णां वेदानामवि
नवानां वीरश्चित्तवृत्तावीरभवनाद्विषन्तो नालीनाममृतमपिसंततं त्वमकृथाः अत्र महे
ये यद्यो काव्यलिंगस्य श्लेषोंगमिति श्लेषप्रतिभोत्पत्तिहेतुः काव्यलिंगं तस्मादलंकारां
तरप्रतिभोत्पत्तिहेतुः श्लेष इति रिक्तं वचः किंच प्रभानसंभ्येवेत्यादौ प्राक् श्लेषस्यार्था
लंकारत्वमिति वचनेमवनीविरुद्धं शब्दानामर्थिनत्वेन तन्व्यपदेशस्य न्याय्यत्वात्
अपि च यद्वैचित्र्यकाव्यप्रतिभासं हृद्भंगो चरसपूर्वालंकारस्यानं स्वपंच पद्मावाना
मेत्यादौ प्राक् वैचित्र्यमेवताहककं तस्यैव काव्यत्वसंभवो वेत्यमोल्ल प्रतिभया मुत्पन्न
योदंकनादिनिग्राह्यालंकारत्वमेवोचितं ननु श्लेषोर्थमसवप्रेत्तकः नह्यर्थेष्व

का॰प्र॰ ९९ ११

नीतिं विना श्लेषस्य चमत्कारित्वसंभवो वेत्यर्थालंकारत्वं श्लेषस्येति चेन्न एवं ह्यनु
प्रासस्याप्यर्थालंकारत्वं स्यान्न रसादिव्यंजकत्वरूपवाच्यसंबंधित्वेन ह्यनुप्रास
स्यालंकारताग्रन्थ इति विरोधादिदोषस्य वक्ष्यमाणत्वात् किं चैवं श्लेषवद्यो
गुणदोषयोरप्यर्थत्वं स्यात् तयोरप्यर्थापेक्षत्वे वक्तव्याभावात् शृंगारादौ हि मा
धुर्यादिगुणाः कष्टत्वादिदोषा वा पद्योक्रमेकप्रयत्नोच्चार्यश्लेषवद्वर्तेऽर्थश्लेषवत्
मिति न तदप्ययुक्तं विवौ वक्रेत्यादौ वर्णादिगुणाः कष्टत्वादिदोषा वा पद्योक्रमे
कप्रयत्नोच्चार्यश्लेषवद्वर्तेऽर्थश्लेषवद्धि श्लेषवद्भेदेऽप्यर्थश्लेषत्वापत्तेरित्यादि
स्वयमपि विचार्य चित्रं लक्षयति तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता य
द्यपि वर्णानामाकाशगुणानां खड्गाद्याकृतिहेतुत्वमसंभवि तथापि लिप्यन्तर्गतवर्णा
नामपि कालिपयः सन्निवेशविशेषवत्त्वेन यत्र खड्गाद्याकारभासस्तेन तच्चित्र
मिति विवक्षितं न हि लिपिनिष्ठत्वाच्छब्दालंकारत्वं न स्यादिति चेन्न नादृशाव
र्णविन्यासं विना हि शब्दालिपिविन्यासाभावात् शब्दानां च यत्रानेकयोरभयत्वात्
लिपेर्वर्णाभेदस्य लोकप्रसिद्धिमाश्रित्य शब्दालंकारत्वमिति कश्चित् न या ९९

पि शृंगारादि रसानुपकारकस्य कथमलंकारत्वमिति चेन्न कविनैपुण्यप्रकर्षेण विस्मयोपका
रकत्वादिति शृङ्गारम्। श्लेषनिर्वाह्यश्चैतत्र च नाहृष्टेऽरसोपकारकमिति दिङ्मात्रयुद्धादिवियते
तत्र खड्गबंधो यथा मारारिशक्ररामेभमुखैरासारंहसा सारारब्धमस्तवानित्यं तदार्त्ति
हरणाक्षमा मातनन्तानोसद्व्यंहःश्रियो वाधितसंभ्रमा मान्याथ सीमारामाणां शंमे
देश्यादुमाद्रिजा न्योमेयथा तद्भिकायांप्रथमे माशाद्यं विन्यस्य तदूर्ध्वमारोहक्रमे
णपक्षे धारायां च तद्दृश्यावर्णान न्यसे श्लिष्टेसेति वर्णं ततोऽपरधारायामवरोहक्रमे
णचतुर्दशमे मिश्रथमेन माशाद्येन श्लिष्ट तदृहितायापार्श्वे निःक्रमेणाक्रमेणासप्त वा
मपार्श्व प्रवेशक्रमेणासप्ततनोयाणवे श्लिष्ट प्रथाख्याद्भिका मांशाद्याद धःक्रमेणा
वशिष्टं यंप्रथाग्रद्भिका तदधोमेति तदृहितायापार्श्वे निःक्रमणक्रमेणाक्रमेण च
तुष्टयं वामपार्श्वे प्रवेशक्रमेणा चतुष्टयं ततो माशाद्यःश्लिष्टः प्रतीक्ष्य तत्के त
तो माकारादधः प्रोक्तवर्णद्वयं न्यसेत्प्रतत्सफलकमिति मुरजबंधो यथा सर
लाबहुलारंभतरलालिबलारवा वारलाबहुलामंदकरलाबहुलामला
अत्र न्यासः प्रथमपादस्य वर्णाष्टकं पंक्तिक्रमेण अभिलिख्याधेषामधोधोऽ

का.प्र.
९८ 100

परपादत्रयवर्णानपंक्तिक्रमेणविलिखेत् । तत्र चैतत् श्लोकान्यायेन माद्गुरेश्वरायाद्वितीया
यामुरजाकारताभवति एवमेवं पद्मबंधो यथा भासमा साहताविभा भावितात्मा शुभावाहे देवा
भावतेतेसभा अस्यन्यासः कर्णिकायां भा इति पूर्वं तत्र निर्गमक्रमेण सतेत्रा ऽग्रेपपत्रे
प्रवेशनक्रमेणापतितततोभेतिकर्णिकास्थूलश्लिष्टं ततोद्वितीयपत्रेनिःक्रमणक्रमेणासा
वेतिवर्णद्वयं ततः ताभ्यां कर्णिकास्थेनवर्णेनप्रवेशक्रमेणाश्लिष्टं रसाभेतितृतीयपत्रयप
वमग्रेपि दिक्पत्रस्य कर्णिकायाश्च वर्णाः सर्वत्र श्लिष्टा इति सर्वतोभद्रं यथा । रसासा
ररसारसायताक्षक्षतायसा सातावाततवातासा रक्षतस्त्वस्वतक्षर अस्यापादचतुष्ट
येपूर्ववत्पंक्तिचतुष्टयेन लिखिते प्रतिलोमादिपाठेन स एव श्लोकः संभवति नाप्यन्ते
भेदान दर्शिताः एते हि शब्दशक्तिमात्रप्रकाशकाः न तु काव्यरूपतां दधत्य ततो नेह तत्त्वा
दिति पुनरुक्तवदाभासो विभिन्नाकारशब्दगा एकार्थतेव शब्द एकार्थतेति एका
र्थतावभासः येषां पदानां स अर्थः एतद्द्वयमकलादानत्वसमयोरपि व्यापकमनोविशि
नष्टि विभिन्नाकारशब्दगामि सचायं द्विविधः शब्दमात्रस्य शब्दार्थयोश्च तयोरा २००
द्यमाह शब्दस्य शब्दमात्रस्येत्यर्थः अयमपि द्विधा सभंगशब्दनिष्ठो भंगमाच

निष्ठो भंगशब्दनिष्ठश्चेतयोराद्योयथा अविधदेहशारीरः सहसारथिसूतनुरगा
पादातः भातिसदानत्याग स्थिरतायामनितलतिलकः अपदेहशारीरशब्दयोः
पुनरुक्तार्थधीः समंगोचचैतोऽखिविघदाईहायत्रनाउशाईस्पतीन्यर्थकत्वात् एवं साथि
रूतशब्दयोः तयोः सहसाहटेनरथिनामुष्टउतेनुरगपादातपरम्नर्थकत्वात्
एवंसारथियाश्चसदानत्याभातिस्थिरतायोयगः एवंतउवेत्यर्थकत्वात्सभंगः पुनरुक्तो
वदाभासः शब्दमात्रालंकारत्वेचोभयोरपिशब्दयोः पर्यायपर्यवसितत्वसत्वात् अभं
गः शब्दनिष्ठोयथा चकासत्यंगनारामाः कौतुकानंदहेतवः तस्यराज्ञः सुमनसो
विबुधाः पार्श्ववर्तिनः अत्रांगनारामाशब्दयोस्त्र्यर्थकत्वपुनरुक्तधीः वस्तुतस्तु
अंगनेअरंमतिअंगनानामारामाइतिचार्थेनपुनरुक्तिः नचात्रसभंगः शब्दमात्रा
लंकारत्वेचैकस्यापिपरिवृत्त्यसहत्वात् एवंकौतुकानंदशब्दयोः सुमनसोविबुधाशब्दयो
श्चरवृत्वं उनपालंकारं द्वितीयमाह तथाशब्दार्थयोरयायथा तनुवपुरजघन्यो
सौकरिकुंजरकधिररक्तरवरनखरः तेजोधाममहः पृथुमनसामेशोहरिजिष्णु
अत्रतनुवपुःशब्दयोः पुनरुक्तधीः तहिरहस्तुतनुशब्दस्याल्पार्थकत्वात् अयं

का॰ प्र॰
९२
101

चोभयालंकारस्तनुप्रासवत् स्वपर्यायपरिवृत्त्यसहत्वात् एवं करिकुंजरयोस्तेजोधामम
हः प्रकाशानां च तदाभासत्वमुभयालंकारत्वं च द्रष्टव्यं यथा पुनरुभयालंकारोऽत्र न श्लेषान
स्तथापि शब्दमात्रालंकारस्येन इह दृष्टव्यात्रप्रकरणेऽवश्यमेव क्व व्युत्पाद्यतेऽसंगा
दुभयालंकारत्वानपायाच्चोभयालंकारभूतो यथा मत्रोक्तः उभयालंकारान
पर्यन्तु न कोऽपि भेदः शब्दमात्रालंकार इति न नान्यत्र पठितानीति सर्वं रमणी
यम ॥ इति श्रीमत्काव्यप्रदीपे शब्दालंकारनिर्णयो नाम नवमोल्लासः समाप्तः
अर्थालंकारा लक्षणीयास्ते च उपमानन्वयस्तद्वदुपमेयोपमा ततः उत्प्रेक्षा
ससंदेहो रूपकापह्नुती तथा श्लेषस्तथा समासोक्तिः प्रोक्ता चैव निदर्शना
अप्रस्तुतप्रशंसातिशयोक्तिरुदीरिता परिकीर्तिता प्रतिवस्तूपमा तद्वद्दृष्टान्तो दीपकं
तथा तुल्ययोगिता पाचैव व्यतिरेकः प्रकीर्तितः आक्षेपो विभावना च विशेषोक्तिस्तथै
व च यथासंख्यमर्थान्तरन्यासः स्यात् विरोधवत् स्वभावोक्तिस्तथा व्याजस्तुतिः
प्रोक्ता सहोक्तिवत् विनोक्तिपरिवृत्तीच भाविकं काव्यलिंगवत् पर्यायोक्तमुदात्तं च ९२
समुच्चय उदीरितः पर्यायश्चानुमानं च पर्यायोक्त परिकरस्तथा व्याजोक्तिपरिसंख्ये च वि

त्रैयेहेतुमालया अन्योन्यमुत्तरसूक्ष्मसारौ तद्वदसंगतिः समाधिस्तु समेन स्याद्विषमत्ताधि
केन च प्रत्यनीकमीलितं च स्यात् तामेकावली स्मृतौ भ्रांतिमान् प्रतीपेन सामान्यं च विशे
षवत् तद्गुणातद्गुणौ चैवव्याघातश्च परिकीर्तितः संसृष्टिसंकरौ चैवमेकषष्टिरुदीरिताः तेष्वने
कालंकारस्थलव्यापित्वेन सौकुमार्यातिशयात्त्वप्रधानभूयमात्प्रथममुद्दिष्टत्वयति साधर्म्यमुप
माभेदे ननु साधर्म्यस्य प्रतियोगिनिरूपणपानदनविधाने न्यूनत्वं लक्षणस्यावास
स्पितित्वेन सौकुमार्यात्तेपादुपमानोपमेयरूपयोस्तत्पोल्लाभात् न च प्रतियोगपन्न
योगिमात्राक्षेपः तिप्रसंगः उपमानोपमेये विना अन्यस्य कार्यकारणादिमात्रस्य का
र्यकारणादिमात्रस्य साधर्म्याभावात् एवं चोपमानोपमेययोः समानेन धर्मेण सं
बन्धउपमेतिलक्षणं अत्र चोपमानोपमेययोरादेयः साधर्म्यप्रतिपत्तिमात्रफलको
ननु व्यावर्तकः न त्वेवं भेद इत्यनुपादेयः न स्याद्याहतोपादेव लाभसंभवात् नह्य
भेदे साहश्यात्मकं साधर्म्यमिति चेन्न न साधर्म्ये यद्देश्यारोपितसाधारणासमीनध
र्मसंबंधमात्रपरत्वेनारोपितसाधर्म्यमिति चेन निर्वचनस्यानन्वयपालंकारस्य व्या
वृत्तेयत्वात् अलंकारोऽसमीनोपिमणीपसाधर्म्यमात्रस्योपमानाभावात्प्रतो

का॰प्र॰
२२
102

विभजते॰ पूर्णालुप्ताव॰ यत्रोपमानोपमेयसाधारणधर्माणामुपमाप्रतिपादकस्य
च सर्वेषामुपादानं सा पूर्णा॰ एतच्चतुष्कमध्ये एकस्य द्वयोस्त्रयाणां वा ऽनुपादानं
यत्र सा लुप्ता तयोः पूर्णां विभजते॰ श्रौत्यार्थी च भवेद्वाक्ये समा
से तद्धिते तथा॰ अग्रिमा प्रथमोद्दिष्टा पूर्णेत्यर्थः वाक्यं विग्रहः तेनोपमानादि
पदानि चत्वार्यपि यत्रासमस्तानि भिन्नविभक्तिकानि सा वाक्यगा॰ यत्र तु तेषु कयोर
पि समासः सा समासगा॰ तद्धितेनोपमाप्रतिपादकेन तु समस्तमुपमानवाचिन्याः
प्रकृतेर्न समासो नापि विग्रह इति तत्र तृतीय उपमाभेदः त्रिविधा ऽप्येषा श्रौत्यार्थी
भेदात् प्रत्येकं द्विधा पूर्णेत्यर्थः श्रौतत्वं चोपमानोपमेययोः साधारणधर्मसंबंधस्य
पायात्तस्याः शाब्दबोधविषयत्वं॰ अर्थापत्तिगम्यत्वं चार्थित्वं तत्र यथेववादिशब्दाना
मेव तस्यैवेत्यनेनेवार्थे विहितस्य वतेश्चोपादाने श्रौती तुल्यादीनां शब्दानां तेन तु
ल्यमित्यादिना तुल्यार्थे विहितस्य वतेश्च प्रयोगे त्वार्थी॰ ननु यथाविभागो नोपपन्नः उभय
त्र सादृश्यप्रत्ययाविशेषात् न पुनस्तुल्यादिभावः अयमेव विशेष इति यथेवादयो यथा २२
दिशब्दा यदनन्तरं सत्त्वया तत्तस्यैवोपमानतां प्रतीतिरिति उपमानविशेषणानीति॰

अनउपमानेन तत्संबंधबोधयत्नुनश्च नरूपमेषे अन्यविशेषणस्यान्यत्र संबंधबोधक
त्वादर्शनादिति चेत्रः श्रावणप्राप्तिस्वाभाव्यादन्यविशेषणानेऽप्यन्यत्र संबंधबोधकत्वा
त्॰ तथा च घटस्य चरत्वं॰ षष्ठ्यानयादर्शनात्॰ षष्ठी हि पदान्तरसंयोगात्तान संबंधबोधकत्वमत्र
प्रतीतिरित्युपसर्जनविशेषणानेऽपि प्रधानेऽपि संबंधबोधयति॰ तस्मात्तु प्रतीत्यनु
पपत्त्याश्रितानामनुपपत्त्या च संबंधबोधे विशेषानुशासनाद्विभागश्रुतिमत्तनेत्रा॰ तथा
हि॰ पद्ममिवमुखमित्यादावुपात्तस्यातिप्रसवारमणीयत्वादेः संबंधमविशे
षीकृत्यापर्यवसानतयार्थादिमख्यानां धर्मविशेषसंबंधपर्यवसानकत्वात्॰ तस्मादे
प्राक्ता मेकपद्येनतत्स्यमुखमित्यादिनुपमेये॰ पद्मतुल्यमुखस्येत्यादावुपमाने॰
मुखं पद्मं चन्द्रमित्यादावुभयत्रापि सामान्यतस्तत्संबंधबोधयितात् विशेषाने श्रुति
